५८ पत्रे

गदाधरीटीकायां कारिकाख्यायां अवयव
ग्रंथः

१५५९

नं. १४१५

अवपवग्रंथः

ग॰टी॰
१

श्रीगणेशाय नमः॥ श्रीकृष्णप्राणवल्लभायै श्रीवृषभानुकुमार्य्यै नमोऽस्तु॥ राधादामोदरौ देवावन्योन्यायांगतस्करौ॥ परस्परहृषीकावष्टंभा
चलगतीस्तुमः १ विप्रतिपन्नं[...]विशिष्टपरामर्शो हेतुर्नेत्याकांक्षां॥ निरासतत्प्रामाण्यज्ञानसंपादनं। लक्षणोपपादकतयेति। उपपादकत्वं
चानुमितिलक्षणेत्यादिनाप्युक्तं[...]मांसकमतेपि विशिष्टज्ञानस्यस्वात्तादृशपरामर्शत्वेनकारणतालाभार्थंतांचष्टे। विशिष्टेति। नन्वत्र
तृतीयार्थस्तज्ज्ञानजन्यजिज्ञासाधीनत्वंतस्यप्रवृत्तिनिरूपणोऽन्वयोवाच्यस्तस्यैवतदुपपादकत्वात् तत्त्वेह न दृश्यते किंच व्यवस्थापय
तीत्यस्यव्यवस्थितिजनकशब्दप्रयोगा[...]कूलकृतिमानर्थः। व्यवस्थितेर्द्वितीयार्थविषयितान्वयः। कथितस्यविशिष्टपरामर्शत्वावच्छिन्नहे
तुत्वस्ययुक्तिमन्तरेणव्यवस्थापयितुमशक्यत्वात्तत्कथनमेवतद्व्यवस्थापनं। युक्त्यभिधानंचहेत्ववयवः पक्षधर्मत्वेत्यादितुप्रतिज्ञेतितयोर
भेदबाधोऽतस्तथाविधहेतुतासाधकयुक्त्यभिधानफलकप्रतिज्ञापर्यंतं विवक्षति अनुमितीति। लाघवंप्रमाणंयुक्तिः। सामानाधिकरण्ये
न प्रमाणासहकारिणोव्यभिचारानिर्णयकालीनलाघवज्ञानस्यव्यभिचारशंकापरिभूयावच्छेदकावच्छेदेनकारणताग्राहकतयोपपको
र्गः। प्रकृते प्रमाणंचान्वयव्यतिरेकौ तयोः सलाघवयोस्तथाकारणताग्राहकत्वं। कल्प्यत्वाविशेषेपिलघुरूपावच्छिन्नस्यैवकल्पयितुंयु
क्तत्वादित्यग्रेवाच्यं। कल्प्यत्वाविशेषेपीत्यनेनव्यभिचारानिर्णयतत्संशययोः साम्यं। लघुरूपेत्यनेनाननुगतानांविशेषणानांतदनुपस्थिति राम॰
प्रदर्शिता। युक्तत्वंचयत्साधकत्वंसमस्यर्थः। तुमुनोऽप्यप्रकृत्तत्वात्तदिच्छाधीनेच्छाविषयत्वंसंसर्गः। प्रतिज्ञाचपक्षधर्मत्वेत्यादिनाप्यनिर्देशः १

नत्वव्यवहितोत्तरकालकर्त्तव्यत्वेन कथनं तद्बोधकासत्त्वात् । तथा च विशिष्टपरामर्शत्वावच्छिन्नकारणतासाधकयुक्त्यभिधानेच्छाधीनेच्छा
विषयप्रतिज्ञाकर्तेति बोधः । ननु युक्तेः कथं लक्षणोपपादकत्वमत आह । तादृशेति । विशिष्टपरामर्शकारणतायाः परमतसिद्धत्वेनानुपपा
द्यत्वान्न युक्तेर्लक्षणोपपादकत्वमतः कारणतानिष्ठेत्युक्तं । तथा च परमते तत्संज्ञानद्रूपावच्छिन्नत्वमिति तन्निरासद्वारा तदुपपादकत्वमित्य
र्थः । एतावता पक्षतानिरूपितसंगतित्वं कथं लक्षणोपपादकत्वस्य पक्षतानिरूपितत्वादिसत्तोयदभिधानानंतरं यदभिधानप्रयोजकजि
ज्ञासाजनकज्ञानविषयो योऽर्थः स तन्निरूपितसंगतिरित्याशयेनाह इदानीमपीति । पक्षतां तन्निरूपणोपीत्यर्थः । उपपाद्यनिर्णये उपपाद
काकांक्षा यत्रानवतारादाह । मीमांसकेत्यादि । मीमांसकैः कारणतावच्छेदकांतरेऽप्रवृत्तिन्यायमतसिद्धकारणतावच्छेदकमादाय व्यभिचा
रज्ञानाद्विशिष्टपरामर्शत्वनिष्ठावच्छेदकताज्ञानेऽप्रामाण्यपत्तानं कारणतानवच्छेदकत्वरूपविषयसंशयाधायकमिति भावः । तथा च दर्शि
तसंशये सति एकतरकोटिनिर्णयेच्छा परामर्शकारणतायां परामर्शत्वावच्छिन्नत्वनिर्णयेच्छारूपा तत्तदुपायेच्छामाह तदुपपादकप्र
माणाकांक्षेति । विशिष्टपरामर्शत्वस्यानुमितिजनकतावच्छेदकत्वोपपादकं किमिति जिज्ञासेत्यर्थः । तत्तीयार्थः संगतिलक्षणघटकतया प्र
योजकत्वं संगतित्वान्वयी । इयमपि परामर्शकारणतायां परामर्शत्वावच्छिन्नत्वोपपादकं किंचित्स्यादिति ज्ञानाधीना । न च पक्षतानिरूपणोन
पक्षताज्ञानेपितत्स्यनिरूपणोपपादकताज्ञानाप्रयोजकत्वमिति वाच्यं । स्वसमानाधिकरणपरामर्शनिष्ठकारणतानिष्ठधर्मघटितसंबंधनि

ग.टी.
२
४

वीहकत्वात्। वस्तुतस्तु मीमांसकविप्रतिपत्त्यवतारवशेन कारणतायां परामर्शतावच्छिन्नत्वानिर्णयादनुमितिं निरूपयति तत्कारण
त्वेन निरूप्यत्वं पक्षताया अनुमितिपरामर्शतावच्छिन्नत्वोपपादकत्वस्य प्रकृतपक्षतोपपादकत्वरूपसंगतेर्बोध्यं मूले पक्षताया उपलक्ष
णत्वे धूमो वह्निव्याप्य इति ज्ञानसाधारणाद्धेतुता अवस्थापनभ्रमः स्यादतो व्याचष्टे मूले इति। व्याप्त्योपस्थितिस्त्रिममूलानुरोधादाह। व्याप्येति।
संयात्यत्वे इति। अन्यथा व्याप्यवानित्यत्र तात्पर्यं बोध्यं। विशेष्यतापीति। विषमतात्वेनेत्याशयः। पक्षविषयतावच्छिन्नहेतुविषयतावच्छेदे
देनेत्यर्थः। धूमो वह्निव्याप्यः धूमवांश्च पर्वत इति समूहालंबनवारणायन्नेनेति अवच्छेदेनेति च। उद्देश्येति। न च विशिष्टपरामर्शत्वावच्छे
द्यानुमितिहेतुत्वरूपसाध्याप्रसिद्धिः। लाघवमात्रेणावच्छेद्यतांतभानोपगमात्। यो यद्धर्मावच्छिन्नान्वयव्यतिरेकानुविधाय्यन्वयव्यतिरे
कितावच्छेदकयत्कार्यतावच्छेदकः स तत्कार्यतावच्छेदकावच्छिन्नप्रतियोगिकतद्धर्मावच्छिन्नकारणताश्रय इति सामान्यव्याप्तेश्च हेतु
त्वपरामर्शान्वयव्यतिरेकानुविधाय्यन्वयव्यतिरेकप्रतियोग्यनुमितिकत्वरूपः। अग्रे परामर्शहेतुत्वेनेत्यग्रिममूले। न तु प्रथमोपस्थितत्वं
विशिष्टपरामर्शोत्पत्तिक्षणावृत्तिध्वंसप्रतियोगिक्षणवृत्त्युपस्थितिविषयत्वं तच्च ज्ञानद्वयस्य संभवतीत्याशंक्य ज्ञानस्वप्रकाशत्वमालंब्यो
पपादयति। ज्ञानद्वयस्येति। ज्ञानस्य प्राकाश्यस्य प्रसाध्यांगतया कल्पनालाघवमात्रे। ऐक्यमेवेत्यनेन निर्भरो वक्ष्यते। अनुपयुक्तमिति। अ
न्यथासिद्धत्वापातात्। दीधितावनुमितेः पूर्वमिति। अथ व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञाने अनुमितिनियतपूर्ववर्त्तित्वसोभयवाहिसि

राम०
२

इत्थं तेऽपि पक्षधर्मताज्ञानस्य तथात्वं नोभयवादिसिद्धं नैयायिकैस्तस्य नियतपूर्ववर्तित्वानंगीकारात् परामर्शस्य तन्नाशादिति कल्पनाला
घवस्यावश्यकत्वं। परं तु सर्वत्र पक्षधर्मताज्ञानमपेक्षाबुद्ध्यात्मकमित्यभिमानेनेदमिति तत्त्वा। ग्रंथकृन्मते द्वितीयपक्षे विशेषगुणस्यानुत्पा
दात् तत्र विशेषगुणोत्पादोपगमेऽपि तस्यापीत्यादिग्रंथे औत्सर्गिकत्वयेतिपदासंगत्यापत्तेश्च। वाऽन्यत्रे रागा दृशपक्षधर्मताज्ञानस्य सा
र्वत्रिकत्वासिद्धेः। अत्र केचित्। पक्षधर्मताज्ञानकालीनत्वोपलक्षिततत्तत्क्षणमात्राधिकरणत्वाप्यतावच्छेदकप्रकारकव्याप्तिप्रकारकनिश्च
यत्वेन हेतुताज्ञानद्वयकारणतावादिमीमांसकसंमता। तादृशसमानकालीनत्वस्योपलक्षणतया कारणतावच्छेदकत्वान्तादृशकार
णस्यानुमितिनियतपूर्ववर्तित्वं नैयायिकसिद्धमेवेति। न चयत्र पक्षधर्मताज्ञानमेव पक्षे बाधनिश्चयात्मकं तत्र व्याप्यवत्त्वाभाव
निश्चयरूपप्रतिबंधकं तत्तो व्याप्तिस्मरणं तत्र तृतीयक्षणे व्याप्यवत्त्वाभावनिश्चयसत्त्वेन परामर्शानुत्पादेऽपि ततोऽनुमित्यापत्तिस्तृतीयक्ष
णे बाधनिश्चयनाशादिति वाच्यं। इष्टत्वादिति। तन्न। पक्षधर्मताज्ञाननाशोऽक्वचिदपि फलोपधायकमीमांसकमते सिद्धत्वाभावात्। यद्धर्मावच्छे
देन व्याप्तिज्ञानं तद्धर्मावच्छेदेन पक्षधर्मताज्ञानं हेतुरितिदीधितिसमभिधानेनासंगत्यापत्तेः तस्यापि कारणतान्तर्गतत्वात्तस्य पूर्वसत्त्वापेक्ष
णात्। न च तस्यापि विनिगमनाविरहेण सप्रकारणतामभिप्रेत्यैव तदभिधानमिति वाच्यं। तादृशाभिमानस्य तृतीयपक्षधर्मताज्ञानस्य
नैयायिकसिद्धानुमितिपूर्ववर्तित्वाभावस्यैव विनिगमकत्वात्। उक्तापत्तेर्विशेषपतनेऽव्यभिचारस्य स्फुटत्वाच्च। पक्षधर्मताज्ञानस्य कार

ग॰ टी॰
३
3

णतावच्छेदकत्वेपिकारणतावच्छेदकस्यापिप्रकारतापत्त्यपेक्षणाच्च । केचित्तु व्याप्तिज्ञानस्य कारणतावच्छेदकसंबंधः समवाय एव पक्षधर्मता
ज्ञानस्य तु आपाद एव तथा च व्याप्त्या संबंधेन तस्य नियतपूर्ववर्त्तित्वमुभयवादिसिद्धमेवात एव तत्कारणमित्यभिमानेनैवायं ग्रंथः । न च नि
रूपदवस्य पक्षधर्मताज्ञानस्योद्बोधकात्तुल्यत्वं व्याप्तिस्मरणादनुमित्सायत्तिरिति वाच्यं । पक्षधर्मताज्ञानद्वितीयक्षणे व्याप्तिस्मरणांत द्वितीयक्षणे
परामर्शः तद्द्वितीयक्षणेऽनुमितिरित्येवोत्सर्गिकीरीतिरित्यभिमानादिति तदसत् । तादृशव्याप्तिस्मरणद्वितीयक्षणे एव मीमांसकैरनुमितिस्वी
कारात्तन्मते समवायेन पक्षधर्मताज्ञानस्य कारणत्वस्वीकारे बाधकाभावात् । परं परासंबंधेन हेतुत्वकल्पनाया अन्याय्यत्वात् । अत्रोच्यते मीमांस
कानामयमभिप्रायः । विशिष्टपरामर्शकारणत्वेनाभिमतं पक्षधर्मताज्ञानं व्याप्तिस्मरणं चानुमितिहेतुः । अनुमितिरपि विशिष्टपरामर्शोत्पत्त्य
धिकरणत्वेनाभिमतलक्षणे एव स्वीक्रियते । एवं च विशिष्टपरामर्शान्यथानुपपत्त्या तन्नियतपूर्ववर्त्तित्वसिद्धौ तदुत्पत्त्यधिकरणक्षणोत्पत्तिकस्या
पि नियतपूर्ववर्त्तित्वं सिध्यतीति ममानुमितिपूर्वत्वं तवानुमतमिति । एतदेव तवापीति पूरणीयमित्यनेन सूच्यते इति गदाधर्यामास्मादिज्ञानमि
ति । न च व्याप्तिज्ञानस्य विशेषणतावच्छेदकप्रकारकनिर्णयविधयास्त्वावश्यकत्वं पक्षधर्मताज्ञानस्य तु कुत इति वाच्यं । तस्यापि पक्षतावच्छे राम॰
दकज्ञानविधयावश्यकत्वात् । नन्वनुपर्वत इति ज्ञानस्यावश्यकत्वेपि धूमवान्पर्वत इत्येतावत्पर्यंतमनावश्यकमित्याशंकते यद्यपीति । लौकिकप्र ३
त्यक्षे संबंधितावच्छेदकप्रकारकज्ञानं हेतुः तथा च पर्वतादौ धूमसंयोगलौकिकप्रत्यक्षे संबंधितावच्छेदकप्रकारकज्ञानविधया धूमवान्पर्वत इति

ज्ञानस्यावच्छेदकत्वमित्याशयः तन्न तथापि धूमः पर्वतश्चेत्यादिज्ञानस्यैवावच्छेदकत्वाद्धूमवान्पर्वत इति ज्ञानस्यानवच्छेदकत्वात्। अत्र केचित् वह्निव्याप्यधू
मवान्पर्वत इति ज्ञानवत्पर्वतवृत्तिधूमो वह्निव्याप्य इति ज्ञानस्यापि हेतुजनकपर्वतवह्नित्वविशिष्टे व्याप्तिवैशिष्ट्यावगाहित्वे सति व्याप्तिविशिष्टवै
शिष्ट्यावगाहि विषयिताशालिज्ञानत्वेन हेतुता एकविशेषणविशिष्टेपरवैशिष्ट्यविशिष्टवैशिष्ट्यविषयतायां एव निवेशः। न च पर्वतवृत्तिधूमो व
ह्निव्याप्य इति ज्ञाने विशिष्टस्य वैशिष्ट्यविषयता संभवति इति वाच्यं। तुल्यवित्तिवेद्यतया धूमेपि आधेयतासंबंधेन पर्वतज्ञानकाले आधारतासंबंधेन प
र्वतेपि धूमज्ञानात्। अत्रापि तादृशविषयत्वमप्याहतमेवेति। प्रकृते च पक्षधर्मतांशस्यानुयोगितावच्छेदकप्रकारकज्ञानविधयोपयोगात् एकविशे
षणविशिष्टेपरवैशिष्ट्यबुद्ध्या वह्न्यनुयोगितावच्छेदकप्रकारकज्ञानस्य हेतुत्वात्। एतेन पक्षतावच्छेदकप्रकारकज्ञानविधयोपयोगित्वमते पर्वत इति ज्ञान
स्यावच्छेदकत्वमायात न तु धूमवान्पर्वत इति ज्ञानस्येत्यापास्तं लाघवं च व्याप्त्यंशे पक्षधर्मतांशे च निष्प्रयत्वाप्रवेशेन। संशये हि विषयविशिष्टवैशिष्ट्यविष
यताया अभावादित्याशयः। इदं तु विशेष्ये विशेषणमिति रीत्या परामर्शदनुमित्या न शोभते परे तु संयोगलौकिकप्रत्यक्षे संबंधितावच्छेदकप्रकारकज्ञानं हे
तुः तथा च पर्वतांशे धूमसंयोगलौकिकप्रत्यक्षे संबंधितावच्छेदकप्रकारकज्ञानविधया धूमवान्पर्वत इति ज्ञानस्यावच्छेदकत्वमित्याशयः। तन्न तथापि धूमः
पर्वतश्चेत्यादिज्ञानस्यैवावच्छेदकत्वाद्धूमवान्पर्वत इति ज्ञानस्यानवच्छेदकत्वात् मीमांसकविचारग्रंथैदंपर्यमाह एतद्धीति। अग्रे वक्ष्यमाणमग्राइत्याद्यग्रिमे
मूले। ग्रंथेनेति धूमवान्पर्वत इति ज्ञानस्यैव सर्वत्रोद्बोधकत्वमित्यभिमानस्यैतेन निराकरणात् ताननूपपादितावेद्धिशिष्टपरामर्शसिद्धिस्तदातस्यका

ग॰टी॰ ४ ५ रणत्वमनपवादमिति किंमीमांसकशंकातात्पर्यमित्यत आह। तावतेति। अत एव मीमांसकानां कल्पनालाघवाभिमानादेवाव्याप्य
तोन च गगनादीनां व्याप्यवच्छेदेनाप्रसिद्ध्यते इत्यादिना। पर्वते धूमदर्शनस्यार्थाव त्रिकत्वे पि न क्षतिरिति मतमाह केचिदिति। पक्षेति इदमा
पाततः। हेतुतावच्छेदकसामानाधिकरण्येन व्याप्यवगाहिपरामर्शस्य व्यभिचारज्ञानाप्रतिबध्यतया न्यायमते कारणत्वाभावात्। एतत्समर्थी
लदोषस्येति। उक्तस्थलेव स्तुतो व्याप्यतावच्छेदकावगाहने व्यवच्छेदकत्वेन न तदवगाहनं मिह तु वस्तुतोपि न तदवगाहनमिति भेदः। सम्प्र
गिति। अन्यथानुमितिहेतुत्वेनैवेत्यत्र जुनपातावृथा तत्पक्षेति। अत एव गगनमर्त्तीति निश्चयदशायां साध्यव्याप्यहेतुमद्गगनवदिति ज्ञा
नासंभवेपि गगनपक्षकानुमितिर्निराबाधेवेति दृष्टव्यं। अत्र साध्यव्याप्यवह्निर्न हेतुप्रकारकपक्षमुख्यविशेष्यकज्ञानस्यैवानुमितिहेतु
त्वाज्ज्ञानाद्दशामूलार्थवर्णनमसंगतमित्यस्वरसः। गतमिति। तत्प्रकारकं तद्विशेष्यकसंस्कारस्यैव तत्प्रकारकतद्विशेष्यकोपनीतभानोपधायक
त्वानुरोधेनैवज्ञाने तद्विशेष्यकत्वनिवेशात्। तन्नियमपरित्यागे च तत्र तद्विशेष्यकत्वस्यापि वैयर्थ्येन परित्यागात्। तथा च महानसादौ धूमभा
नादपि पर्वतादौ धूमभानसंभवे तद्विनाभिमानं पर्वतो धूमवानिति ज्ञाननियमानिर्वाहादिति भावः। स्वरूपसंबंधादीत्यादिना। खंडपरिग्रहः
। कल्पनां। अयं पक्षः णोविशिष्टपरामर्शवान् स्तोम निक्षणोत्पत्तिकध्वंसप्रतियोगित्वसंबंधेनानुमितिमत्स्यादित्यनुमानं। न चेति ज्ञानद्वयादे राम॰
वेत्येवकारार्थस्फुटीकरणं। सामान्यरूपेणाकिंचिद्धर्मावच्छेदेनव्याप्तिज्ञानत्वादिना। विशेषरूपेणेति विभिन्नव्याप्यवच्छेदकप्रकारकत्वानद्व ४

पश्चाद्वृत्तस्य मयीत्वस्य दुर्वचत्वात्। दंडचक्रादिवत्सहकारितानाभायपूरितं पत्रेति विवरणेऽति। अनुमितावितिः। अग्रिमहेतुपदानुषंगाम
यानतस्य कारणतावच्छेदकताकल्पमुपेतिविघतेइतियद्धर्मावच्छेदेनेति। एतेन धूमत्वसामानाधिकरण्येन व्यभिचारज्ञानदशायां नानु
मित्यापत्तिः। अभिहितमिति। तद्धर्मावच्छेदेनपक्षधर्मताज्ञानोत्पावतिपक्षकस्यावच्छेदकत्वानुपगमे धूमवान्पर्वत इत्यस्य यथाव्याप्त्या
पत्तिरवच्छेदकत्वविवक्षावैयर्थ्यं चेति दीधितौ तेनैव रूपेणोपस्थितमिहितं। अत्र इदमालोचनीयं। एवमपि धूमो वह्निव्याप्यो धूमवद् भूमिति ज्ञा
नाद्भूरेव न्यूनानुमित्यापत्तिः। मीमांसकमते समानप्रकारकत्वेन कार्यकारणभावात् समानविशेष्यताप्रत्यासत्त्या तादृशकार्यकारणा
भावबलान्न दृशापत्तिवारणसंभवादिति। अत्राहुः पक्षधर्मताज्ञानानुमित्योः समानविशेष्यताप्रत्यासत्त्यैव कार्यकारणभाव इत्यभि
प्रायेणायं ग्रंथः। अतएव भट्टाचार्यैरपि व्याप्यतया पक्षधर्मतया चेति ग्रंथे समानविशेष्यकत्वं पक्षाद्यङ्गीक्रियते इति। मीमांस
कमते तयोः समानविशेष्यताप्रत्यासत्त्या कार्यकारणभावो न कल्प्यते किंतु तयाव्याप्यव्यापकभाव इति न दोष इत्यन्ये। सर्वत्रेति सार्व
त्रिकत्वं प्रयोजकतायां का चिन्तकत्वं तु तदभावे इति बोध्यम्। तथात्वं फलोपधायकतावच्छेदकत्वं कल्पनालाघवं स्फुटीकर्तुमाचष्टे धर्म
परमिति। मीमांसकानां व्याप्यतावच्छेदकप्रकारकत्वेऽपि हेतुतावच्छेदकतायाः संबंधो न नैयायिकमते इति कल्पनालाघवमाहतस्येति।
उपजीव्यत्वं चेत्कारणत्वं तदाह व्याप्यतेति अनुमितिपूर्वं शिष्टसत्ता मीमांसकमते नैयायिकमते तु केवलव्याप्तिज्ञानसत्ताऽनुमितिसत्ता

ग॰टी॰
५
5

निपामिकेसाधायेनाह एतावतेति।उत्तरकालमिति।अयंफलमुखगौरवप्रभेद एवेतिभावः।तदुदस्तीति।हेतुताग्रहकालेहेतुदृष्टत्वेनाग
हीतेत्यर्थः। तथाचमूलेऽनुमितिपूर्वं तद्धेतुताग्रहदशायामसिद्धोपपक्षधर्मताविषयकत्वासिद्धेःपश्चादपिपक्षधर्मताविषयकत्वस्योपस्थि
तोपगपदुपस्थितिसमावात्एककारणतानवच्छेदकत्वात्व्याप्यत्वज्ञानत्वपक्षधर्मताविषयकत्वयोर्गुरुपदुपस्थितेरेककारणतावच्छे
दकत्वसाधिकायाअभावादितिवाच्यः।कार्यकारणभावेग्रहीतेहि ज्ञापमानंगौरवंनदुष्यतीति अत्रतुतथाकार्यकारणभावग्रहएवनास्तीत्याशयः
।विशिष्टपरामर्शासिद्धेस्तात्पर्य। अतिप्रसक्तेःस्वरूपसंबंधरूपावच्छेदकत्वासंभवःतस्यानतिरिक्तवृत्तित्वनियतनिर्वचनइतिलाघवात्तदेवाह।
अनतिरिक्तवृत्तित्वेति।अन्यथेत्यस्यज्ञानद्वयंविनेत्यर्थ[redacted]मभिप्रेत्याहज्ञानद्वयकल्पकतयेति।व्याप्तिप्रकारकपक्षधर्मताज्ञानस्यज्ञान
द्वयकल्पकत्वेनासिद्धावुभयथाप्यसिद्धत्वादितितस्येत्यादिमूलार्थमभिप्रेत्याहतथाचेति।स्मृतेःसन्निकर्षसहकारित्वमुत्पादनास्मन्मूलेपथेति।व्या
प्यभावस्यापिस्मृतेःपरामर्शस्यननिश्चयत्वमित्याशंकावारणायधूमत्वासाधारणेति।मीमांसकसिद्धान्तमितिसामग्र्यांसत्यामेवविशिष्टपरा
मर्शइत्यभिमानंनिराकुर्वन्नाशंकितदूषणपरिहारमाशंकतेयेति।पक्षतावच्छेदकनिर्विकल्पकमुदाहरणायविशिष्टविशेष्यकज्ञानेति।प्राथम्या
भावादिति।परामर्शस्यव्याप्तिज्ञानोत्तरत्वात्पक्षधर्मताज्ञानत्वावच्छेदेनाशयः।अवच्छेदकतावगाहीतिहेतुगर्भ।गादाधर्यांअन्यत्रापिमी
मांसकसिद्धज्ञानद्वयोत्तरं।तथाविशिष्टपरामर्शःवर्त्तमानेति।व्याप्त्यवच्छेदकसंस्कारस्यफलोपधायकसामग्रीघटकतामुदाहरणाय एवंविधमा

नेत्यत्रापि धूमाव्याप्यत्वेति। पक्षीयधूमो वह्निव्याप्यो धूमत्वादित्यर्थः। तत्रापि हेतोः सन्निकर्षेति। तथा च प्रत्यक्षविशिष्टज्ञानसामग्रीविरहादिति मूला
संगतिः। अनवकाशादिति। उपनायकज्ञानस्य मनोभिन्नप्रमाणसहकारित्वेन च स्फुरणादिरूपतत्सामग्रीकालीनत्वेन चापादकासिद्धेः। मानसा
न्येति। इंद्रियासन्निकृष्ट इति मूले सन्निकर्षो लौकिकोऽभिमतः तत्र मानसमाशंकते अथेति मूले मनसा वह्निविषयकपरामर्शजनने कथं तानु
दासायवह्निविषयकसंशयनिश्चयप्रयोजननं दर्शयति। यथेति वह्निरित्यंतं अंब वह्निरिंद्रियासहकारेण वह्निविषयकलौकिकप्रत्यक्षजनकत्व
स्याभावः सहकारित्वस्य भेदगर्भतया घ्राणादावेव तादृशजनकत्वप्रसिद्धिः घ्राणादेरपि मनःसहकारेणाजनकत्वादप्रसिद्धिरतः वह्निरस्तु मि
द्रियविशेषणां मनसोपि वह्निरिंद्रियासहकारेण सुखादिप्रत्यक्षजनकत्वाद्द्वितीयं वह्निः पदं। मिद्धा मनःसंयोगो निर्देति मथुरा। अनुभवो नि
श्चयरूपः। इहापि इंद्रियासन्निकृष्टातींद्रियलिंगस्थलेपि ज्ञानांतरं हेतुमान् पक्ष इति ज्ञानं। विशेष्ये हेतोर्लौकिके ति मानसाविषयत्वाप्रसिद्धि
वारणाय लौकिकज्ञानाविषयत्वं तस्यादेरतो मानसेति। सुखादिमानसे च न वह्निरर्थमानं तैर्ज्ञानप्रत्यासत्त्युपगमात् अतो न तत्र व्यभिचारः। मथुरा
नाथभट्टाचार्यास्तु पदसाधारणं सहकार्यासाद्य मनो वह्निगोचरां पूर्वाद्यार्थविशेष्यकपत्सकारिकां प्रमां प्रत्यक्षप्रमितिं जनयति तत्संवेतद्विशे
ष्यकतत्प्रकारकप्रमायाः करणं भवतीत्यर्थः तथा च पर्यवद्वात्यार्थविशेष्यकपदर्थप्रकारकप्रत्यक्षप्रमितित्वस्य तु भवतुव्याप्यजातावच्छिन्नका
र्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणताश्रयत्वे सति स्वभिन्नमनोभिन्नप्रमाणजन्यवृत्तिप्रत्यक्षत्वव्याप्यजात्यवच्छिन्नकार्यतानिरूपितका

ग॰ टी॰ रणतानाश्रयत्ववद्वृत्तित्वं तदर्थविशेष्यकतदर्थप्रकारकप्रमायाः करणं भवतीति व्याप्तिधीरेवात्राभिमता। जन्यज्ञानत्वाद्यवच्छिन्नजनक
६ शरीरात्मादेः कार्यत्वावच्छिन्नजनककालादेर्विशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नजनकविशेषणज्ञानत्वावच्छेदकप्रकारकज्ञानादेश्च वारणाय प्रमात्वं
6 तं। तत्रापि विशेषणतावच्छेदकप्रकारकज्ञानादेस्तत्तद्व्यक्तित्वेन जन्यताकत्वमादायातिप्रसंगो नो जातिपदं। तदवच्छिन्नत्वं न तत्सयोग्यताव
च्छेदकताकत्वं। पक्षीभूतव्याप्तिस्मरणादेस्तत्प्रकारकप्रत्यक्षत्वावच्छिन्नजनकत्वेन मायनयेष्वसहरूपासिद्धेः। किंतु तन्निष्ठावच्छेदकताकत्वं सुखा
दिसन्निकर्षस्य मनोन्यप्रमाणानां तत्तारासहकारित्वाद्व्यभिचारो नो वह्निविषयमर्थविशेषणं। परामर्शादेः अभावज्ञानत्वावच्छिन्नस्य वृत्तिकारणता
श्रयव्याप्तिज्ञानादिसहकारितया व्यभिचारो नो ज्ञानत्वादिकमपहाय प्रत्यक्षप्रमितित्वनिवेशः। लौकिकप्रत्यक्षं प्रति विषयत्वेन जनके संख्यादौ
व्यभिचारो नातादात्म्यसंबंधावच्छिन्नत्वनिवेशः। न च निर्विकल्पद्वारा विशिष्टप्रत्यक्षजनके तत्र प्रमाकरणत्वनिष्टमेवेति वाच्यं। तथापि निर्विक
ल्पकाजनकविषये व्यभिचारस्य दुर्वारत्वात्। विपरीतज्ञानोत्तरप्रत्यक्षे विशेषदर्शनादेर्नैकारणत्वं अपि तु विपरीतज्ञाननिवर्तकतया कथं चि
दुपयोगित्वमिति न तत्र व्यभिचार इति वदंति। तत्र परामर्शादेर्व्याप्तिज्ञानसहकारित्वेपि न क्षतिः व्याप्तिज्ञानस्य पर्यासिद्धेरितरवत् प्रमाणाप्रमाणत्वा
भावादतः प्रत्यक्षप्रमितिपर्यंतानुधावनं व्यर्थमित्याशयेनाह अनुभवार्थकमिति॥ विषयहेतुतायाः प्रामाण्ये कत्वात्तादात्म्यसंबंधानवच्छिन्न राम॰
त्वं व्यर्थमित्याशयेनासाधारणं पनिर्वक्तुमारभते। अत्रेति। जन्यगुणत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुत्वाद्दोषवारणाय रूपवृत्तित्वेनेति। तादृश ६

प्रमेति वह्निर्गोचरानुभवे त्वर्थः। संयोगत्वाद्यवच्छिन्नेद्रव्यत्वेन हेतोः शारीरादेर्वारणाय यानुभववृत्तित्वप्रवेशः। तर्कालंकारास्तु इदं व्याप्तिस्मरणाय यदनु
भवत्वाव्यापकज्ञानवृत्तिजातित्वावच्छिन्नकार्यतानिरूपितविषयत्वाद्यनवच्छिन्नकारणताश्रयत्वे सति वृत्तिधर्मावच्छिन्नप्रमाकरणतानिरूपितकार्य
तावच्छेदकीभूतमानसज्ञानावृत्तिजातित्वावच्छिन्नकार्यताप्रतियोगिककारणताशून्यत्वे च सति यादृशपदार्थवह्निर्गोचरप्रमोत्पादकं स्यात्तद्वत्त्वं मान
सान्यतादृशतादृशप्रमाप्यः फलोपहितकरणांशादितिव्याप्तिशरीरं। अत्र संयोगत्वावच्छिन्नप्रतिद्रव्यत्वेन हेतोः शारीरादेर्वारणाय ज्ञानवृत्तीति वदंति।
तत्र भट्टाचार्यमते विषयहेतुताया अप्रामाणिकत्वाद्विषयत्वाद्यनवच्छिन्नत्वमपार्थं। अनुभवत्वाव्यापकत्वं अनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्व
मनुभवत्वव्याप्यत्वमेवेति तत्र न कश्चिद्विशेषः। किंच पदसाधारणसहकार्यसाध्यमनो वह्निर्गोचरां प्रमां जनयतीति मूललभ्यं मनोनिष्ठं वह्निर्गोचरप्रमा
जनकत्वं भवद्भिरुक्तं। न च गदाधोरणापितत्वकमेव किं त्वसाधारणसहकारित्वमात्रमुपात्तं अतएव प्राक्मनने स्यादिनामनःप्रतियोगिकमसा
धारणसहकारित्वमर्थइत्यभिधाय वह्निर्गोचरप्रमोत्पादकत्वमेव फलितार्थोभिहितः तथा चास्माकं तत्सरित्यागेनापराध इति वाच्यं। तथापि वह्निर्गो
चरप्रमोत्पादकत्वस्य पृथक् निवेशानं व्यर्थं। ज्ञानवृत्तित्वस्यानेव वह्निर्गोचरप्रमावृत्तित्वनिवेशेनैव मनसः कारादिवारणात् ज्ञानवृत्तित्वनिवेशस्य एव पृथक्कृत
न्निवेशोऽतिगौरवात्। न चासाधारणपदार्थो न सहकारिपदार्थोन्य एवेति वाच्यं। लाघवेनासाधारणसहकारिपदार्थनिवेशस्यैवौचित्यात् एतद्दभि
प्रेत्यैव वह्निर्गोचरप्रमाजनने यदसाधारणसहकारि भवतीत्याद्यभिहितं प्राक्। तादृशज्ञानवृत्त्यनुभवत्वव्याप्यत्वनिवेशे संयोगत्वादेर्वारणायत्वमा

ग॰टी॰ ७

त्वमर्थमित्यत आह। तादृशधर्मत्वस्येति। जातिपदं च समवायेनानुभवत्वव्याप्यत्वनिवेशलाभार्थं तेनानुभवत्वस्य कालिकविषयितादिना
नुभवत्वव्याप्यत्वेपि न क्षतिः। अनुभवत्वस्यानुभवत्वाव्याप्यत्वादस्ति द्विमार्गं कपदिह इति। व्यासीति। नतन्नेति। न चापादकासिद्धिरापत्तेरप्रति
कूलात्तदाहार्यनिर्वाहकतादिति वाच्यं। तथा सत्यापाद्याभावेनापादकाभावसाधने सिद्धसाधनप्रसंगात्। एतद्दोषेति। उभयपचक्षुर्जन्यतायाएकत्वा
दितिभावः। जनकतायेति। जन्यतायां स्वानिरूपितत्वदाने पि तद्भिन्नवृत्तिचक्षुरनिरूपिताधिजन्यतास्ति निरूपकभेदेन जन्यताभेदादिसाशयः। त
ज्जन्येति। अत्रापुकृदोषवारणाय स्वानिरूपितत्वदेयं। तज्जन्येति। स्वानिरूपितमनोभिन्नप्रमाणजन्यतानिरूपकत्वनिवेशे आलोकाद्यवार
णात्। तादृशजन्यतावच्छिन्नजन्यतानिरूपकत्वार्थकं जनकपदं फलेति। फलानुपधायकालोकवारणाय विशेष्यदलेपि फलोपधानं निवेश्यं
। आदिना इंद्रियत्वानवच्छिन्नत्वस्य जात्यवच्छिन्नत्वस्य वा निवेशः। इंद्रियत्वं चात्मभिन्नत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं न जातिः पृथि
वीत्वादिना सांकर्यात्। तज्जन्यतावच्छेदकेति। एतेन स्वभिन्नमनोभिन्नप्रमाणजन्यवृत्तिप्रसक्षत्वव्याप्यजात्यवच्छिन्नकार्यतानिरूपकत्व
रूपमघटापरिष्कारे कार्यतावच्छिन्नं प्रतिकालत्वेन जन्यस्य सत्त्वावच्छिन्नं प्रतिद्रव्यत्वेन च कारणतात् तथाविधत्वगादिजन्यचाक्षुषादौ चक्षुरादेर्ज
नकतया दृष्टांतासिद्धिवारणाय द्रव्यावृत्तित्वं जन्यताविशेषणं तेनैव दर्शितं तदग्रादेपं चाक्षुषत्वस्य तज्जन्यतानवच्छेदकत्वात्। द्वितीयकार्यका ए॰म॰ ७
रणाभावस्य प्रामाणिकत्वे प्रसक्षत्वव्याप्यत्वेनैव तद्दोषनिरासात्। विशेषणज्ञानेति। विशिष्टानुभवत्वं तत्कार्यतावच्छेदकं तत्र प्रमाणज

न्यतावच्छेदकं प्रत्यक्षत्वेन प्रत्यक्षनिष्ठभेदप्रतियोगितावच्छेदकमिति नायादकासिद्धिरित्यर्थः। ननु बहिरिन्द्रियस्थलेऽप्यैक्यकारणताकल्प-
नेगौरवमनुमित्यादौ विशेषणज्ञानस्यानपेक्षणादित्यतोऽलौकिकप्रत्यक्षत्वस्यैवोपनायकज्ञानजन्यतावच्छेदकत्वमंगीकृत्य समाधत्ते अ-
थवेति। निरुक्तंप्रत्यक्षनिष्ठभेदप्रतियोगितावच्छेदकत्वं। अंशे धकारे व्यभिचारवारणाय भावेति। एतच्च द्रव्याविषयकं गुणादिप्रत्यक्षमंगीकृत्य
तदनुपगमे त्वाह द्रव्येति। तथा च द्रव्यभानार्थमालोकः गुणादिभाने नियतोऽपि अन्यथासिद्ध इति भावः। आदिना विशिष्य तत्तद्रूपचाक्षुषत्वपरि-
ग्रहः। अत्र मथुरानाथेन निर्विकल्पकादिकमजनयित्वैव साक्षात्तद्विशेष्यकतत्प्रकारकचाक्षुषादिजनके चक्षुःसंयोगादौ व्यभिचारवारणाय
स्वभिन्नमनोभिन्नप्रमाणजन्यवृत्तीत्यादि विशेष्यं तत्र चक्षुरादेः स्वात्मकप्रमाणजन्यचाक्षुषत्वावच्छिन्नजनकत्वान्मनोरूपप्रमाणजन्यवृ-
त्तितदवच्छिन्नत्वाच्च दृष्टान्तासिद्धिरतः स्वभिन्नत्वमनोभिन्नत्वयोर्निवेशः। मनोभिन्नत्वं च मनस्त्वघटितधर्मानवच्छिन्नजनकत्वमतश्चाक्षु-
षादिकं प्रति चक्षुर्मनोयोगादेः कारणत्वेन चक्षुरादौ नासिद्धिः। न वा विभिन्नप्रमाणसत्वगादेरपीन्द्रियत्वे नकारणतामते तज्जन्यचाक्षुषादि-
कमादाय सगयतः इन्द्रियत्वं न जातिः किं तु ज्ञानकारणमनःसंयोगाश्रयत्वं। न चैवं ज्ञानसामान्यं प्रति त्वचो हेतुत्वनमं दृष्टान्तासिद्धिः। प्रमा-
णवृत्तिजन्यतापारत्वगवृत्तितेन विशेषणीयत्वात्। तत्र प्रमाणत्वं यदि प्रमाकरणत्वमात्रं तदा तत्र स्वभिन्नमनोभिन्नालोकादिसाधारण-
त्वात्तद्दोषोद्धारइति अननुभवत्वव्याप्यजातिमत्त्वावच्छिन्नलौकिकविषयत्वानवच्छिन्नकार्यताप्रतियोगिककारणताश्रयत्वं तद्व्याच्यं चक्षुरादेस्सा-

ग.टी.
८
8

मान्यतश्चाक्षुषत्वावच्छिन्नंप्रत्येवजनकत्वात्तादृशप्रमाणत्वमस्तु तद्रव्यांधकारसमूहालंबनेव्यभिचारवारणायद्रव्यवृत्तित्वविशिष्टलौकिकवि
षयतासंबंधेनचाक्षुषत्वावच्छिन्नंप्रत्यालोकत्वेनकारणतायावाच्यतयातत्कार्यतावारणायलौकिकविषयतासंबंधावच्छिन्नत्वनिवेशः। नचै
कस्याश्चक्षुरादिव्यक्तेस्तादृशकारणताश्रयव्यक्तं तत्जन्यवृत्तिकार्यताप्रतियोगिककारणताश्रयतयाऽसिद्धिरितिवाच्यं।स्वभिन्नत्वंप्रमाणावि
शेषणमपहायकारणतायांस्ववृत्तित्वोपादानादित्यभिहितं।तत्रचक्षुरादेरिवालोकस्यापिशुद्धचाक्षुषत्वमेवकार्यतावच्छेदकमितिजातिपर्या क
प्तावच्छेदकताकत्वमुपेक्ष्यलौकिकविषयत्वानवच्छिन्नमुक्तंतत्रविशेषणरूपेणसंसर्गतायाःप्रामाणिकत्वाद्द्रव्यविषयकत्वविशिष्टचाक्षुष
त्वादेरनायत्याकार्यतावच्छेदकत्वोपगमेनोक्तव्यभिचारवारणसंभवात्लाघवेनपर्याप्तिनिवेशएवदर्शितइति।एवंस्ववृत्तित्वंकारणताविशे
षणमुपेक्ष्यस्वानिरूपितत्वंजन्यताविशेषणंतत्समानव्यावर्त्यत्वमुपात्तमिदंलघुधेयमित्यादिनातद्दूषितंस्वेवास्याधारणत्वेननिवेशनीयतात्।एवंम
हुरानाथेनशरीरादिसाधारणकारणतामादायजन्यसत्त्वावच्छिन्नंप्रतिद्रव्यत्वेनकारणतामादायचासिद्धितादृश्यावारणायानुभवत्वव्याप्यजात्यव
च्छिन्नत्वंकार्यताविशेषणंदर्शितं।अथद्रव्यत्वावच्छिन्नकारणतामाश्रित्यचक्षुर्वृत्तितयाकथंदृष्टांतासिद्धिःप्रसज्यते।अत्रकेचित्जन्यसत्त्वेनद्रव्यत्वेनका
र्यकारणभावमितिपाठएवनास्तीत्याहुः।नवीनास्तुस्ववृत्तित्वंस्वनिष्ठप्रमितिकारणतावच्छेदकानवच्छिन्नत्वंतथाचद्रव्यत्वावच्छिन्नजनकतायांच राम.
क्षुरादिनिष्ठप्रमाणतावच्छेदकानवच्छिन्नत्वमस्त्येवेतितत्रस्ववृत्तिसंगतिरित्याहुः।परेतुहिविधंप्रत्यक्षत्वव्याप्यत्वेप्रत्यक्षवृत्तिभेदप्रतियोगिता ८

वच्छेदकत्वे सति प्रत्यक्षवृत्तित्वं तद्घटितं च तन्न द्वितीयकल्पे व्याप्तिस्मरणोऽपि द्विपदोपं ग्रंथः स्वभिन्नशरीरादिरूपप्रमाणाजन्यवृत्त्यनुमिति
त्वावच्छिन्नकारणतावत्तात् एवमपि तादवस्थ्यपदासंगतिस्तत्र एकस्याश्चक्षुरादिव्यक्तेः तादृशकारणतात्र्यपचक्षुरादिव्यक्तौ तज्जन्यवृ
त्तिकार्यताकतया स्वभिन्नत्वरूपविशेषणेन दुर्वारत्वात् स्वावृत्तित्वविशेषणव्यावर्त्यादृष्टांतासिद्धेरेव पूर्वमभिधानादिति चेन्न स्वावृत्तित्वा
नुपादाने दृष्टांतासिद्धिमात्रं नाभिप्रेतं किं तु स्वभिन्नव्याप्तिस्मरणादिकमादायानुमितित्वमादाय स्वरूपासिद्धिरपीति न तदसंगतेः। अन्ये तु तत्क
ल्पे तादृशज्ञानत्वावच्छिन्नत्वं तादृशजातिपर्याप्तावच्छेदकताकत्वं जन्यसत्तावच्छिन्नकार्यत्वं च न तथेति तादृशपाठोऽसंगत एवेति तन्न मनः। अ
नुमवत्वव्याप्यत्वदलस्य तन्नव्यावृत्तिसंगतये जन्यानुयोगिकसमवायेन ज्ञानत्वसत्तादेः शरीरादिजन्यतावच्छेदकत्वात्तन्मते पर्याप्तिस
त्वाच्च। न चैवं परामर्शस्यापि तत्प्रत्यक्षत्वात्साध्यकानुमित्यनुयोगिकत्वविशिष्टसमवायेनानुमितित्वस्य जन्यतावच्छेदकतया तादृशज्ञा
तिपर्याप्त्यवच्छेदकताकजन्यताकत्वमव्याहतमिति वाच्यं। तथा सति जन्यतायां तत्प्रत्यक्षत्वानवच्छिन्नत्वेनासंगतापत्तेः। अत्रेदमवधेयं। ज
न्यानुयोगित्वविशिष्टसमवायत्वादिना संसर्गतापन्नस्य सत्ता ज्ञानत्वज्ञानत्वं जन्यसत्त्वं च यथाप्रयथं कार्यतावच्छेदकमिति जातिपर्याप्त्युपादानादेव
न तद्दोषः। न चैवमनुभववृत्तित्वं व्यर्थमिति वाच्यं। संयोगत्वावच्छिन्नं प्रतिद्रव्यत्वेन कारणतया शरीरादेः प्रमाणत्वेन तत्सार्थक्यात्। अथ ज्ञानाथा
स्तुपक्षीभूतव्याप्तिस्मरणादेः तत्प्रकारकप्रत्यक्षत्वावच्छिन्नजनकतया स्वरूपासिद्धिः। चक्षुरादिप्रमाणं तज्जन्यवृत्तिकार्यताकत्वात्। एवं

ग॰टी॰ कालत्वेन कार्यत्वेन द्रव्यत्वेन जन्यत्वेन च कार्यकारणभावमादाय चक्षुरादेरपि लिङ्गादिप्रमाणान्तरजन्यकार्यताप्रतियोगिककारणता

९ यादृष्टान्तासिद्धिश्चेत्सत्तः प्रत्यक्षत्वव्याप्यजातिसवच्छिन्नत्वं सहकारिताघटककार्यताविशेषणं प्रत्यक्षत्वव्याप्यत्वं च प्रत्यक्षवृत्तिभेदप्र

1 तियोगितावच्छेदकत्वे सति प्रत्यक्षवृत्तित्वं तेन पक्षीभूतव्याप्तिस्मरणादेरपि परामर्शपक्षतात्मकनिरुक्तस्वभिन्नप्रमाणजन्यत्वानुमि

तित्वावच्छिन्नकार्यताककारणत्वेऽपि न स्वरूपासिद्धिः। स्वभिन्नप्रमाणत्वघटकानुभवत्वव्याप्यजातिसवच्छिन्नत्वं वा तादृशजातिपर्याप्ताव

च्छेदकताकत्वं परामर्शादिकार्यतायां न तथा एवं च प्रत्यक्षवृत्तित्वं न देयं तादृशजातिसवच्छिन्नत्वं तु मुख्यविशेष्यविधया समवायसंबन्धेन ज्ञाते

न व्याप्तिस्मरणादेः कार्यतावच्छेदककोटौ प्रत्यक्षत्वन्यूनवृत्तिधूमत्वादेः प्रवेशेऽपि नासिद्धिः स्वभिन्नप्रमाणत्वघटककारणतायां स्वावृत्ति

त्वदानाद्व्याप्तिज्ञानादिप्रयोज्यानुमितिव्यक्तिमादाय नासिद्धिः। न च तथापि महत्त्वे व्यभिचारः प्राचीनमते द्रव्यलौकिकप्रत्यक्षत्वावच्छि

न्नं प्रति द्रव्यवृत्तित्वविशिष्टलौकिकविषयतासंबन्धेन प्रत्यक्षत्वावच्छिन्नं वा जनकतया निरुक्तासहकारित्वसत्त्वादिति वाच्यं। तन्मते असाधारणप

शरीरेतरात्मसंबन्धानवच्छिन्नत्वस्य महत्त्वावृत्तित्वस्यापि कारणतायां निवेशात्। न च तथाप्युद्भूतरूपे व्यभिचारः तस्य प्राचीनमते तरद्रव्यलौकि

कप्रत्यक्षत्वाद्यवच्छिन्नं जनकत्वेऽपि निरुक्तासहकारित्वसत्त्वादिति वाच्यं। तस्य लाघवेन द्रव्यलौकिकचाक्षुषत्वावच्छिन्नं प्रत्येव जनकत्वात्। एम॰ ९

मीमांसकेर्वाय्वोः प्रत्यक्षत्वोपगमात् जरन्नैयायिकानां तु रूपादिमत्त्वमपि स्पर्शवत्त्वे कारणतायां महत्त्वावृत्तित्वविशेषणमित्याहुः। तन्न प्र

माणत्वघटकजातिपर्य्याप्तिपक्ष एव निर्भरः। एवमुद्भूतरूपे व्यभिचारं मूर्त्तत्वे चाक्षुषत्वं तज्जन्यतावच्छेदकमंगीकृत्य वारयति। नचेत्यादिना। मूर्त्ते
ति। द्रव्यत्वे लौकिकचाक्षुषत्वं तु न तत्कार्यतावच्छेदकं। आकाशादेश्चाक्षुषाप्रसिद्धेस्तत्साधारण्येन द्रव्यत्वेन निवेशे प्रयोजनाभावात्। न च मूर्त्त
चाक्षुषत्वस्य तथात्वे ऽननुगमः मूर्त्तत्वस्य जातिरूपत्वाभावादिति वाच्यं। उद्भूतरूपवत्त्वस्यैव तन्मूर्त्तत्वात्। महत्त्वावृत्तित्वं च देयमित्याशयेना
ह एवमिति। परे तु मथुरामते तत्स्थले कार्यतायां लौकिकविषयतानवच्छिन्नत्वनिवेशादेव चक्षुःसंयोगादौ व्यभिचारवारणसंभवात् म
नोन्यप्रमाणांतरासहकारित्वदलं कारणतायां तादात्म्यसंबंधानवच्छिन्नत्वं च व्यर्थं। न च सुखत्वसन्निकर्षे व्यभिचारवारकं बहिःपदं व्यर्थमि
ति वाच्यं। तन्न चक्षुर्निष्ठलौकिकविषयत्वानवच्छिन्नत्वस्य निवेश्यत्वात्। यत्तु प्राचीनमते सामान्यलक्षणायाश्चाक्षुषं प्रतिकारणत्वाद्व्यभि
चारे एतर्हि दृष्टप्रयास इति तन्न नैः सामान्यप्रत्यासत्तेरनुगमात्। नव्यमते प्रत्यक्षत्वस्य सामान्यलक्षणकार्यतावच्छेदकत्वेन स्वमतेपि व्यभि
चारवारणयोगात्तत्कार्यतावच्छेदकशरीरे ऽलौकिकविषयतानिवेशावश्यकतया विषयत्वानवच्छिन्नत्वविशेषणेन तद्वारणासंभवा
च्च। एतेन न्यायमते व्यभिचारवारणाय यत्प्रयासः अत एव ग्रंथकृता रूपावृत्तित्वं कारणतायां दत्तमित्यपास्तमिति वदंति। तन्न स्वपदं द्रव्यचा
क्षुषत्वादेरलौकिककार्यतावच्छेदकत्वाभिधानाद्विषयत्वानवच्छिन्नत्वविशेषणेन तद्वारणयोगात् प्रमाणांतरासहकारित्वस्यावश्यकत्वा
त्। शब्दफलानुपधायकेति हेतुगर्भं अत एव जगदीशेनेदं व्यतिरेकिणामितीदं पदमुपात्तं। यत्तु जगदीशेन स्वावृत्तिधर्म्मावच्छिन्नप्रमाक

रणतानिरूपितकार्यतावच्छेदकीभूतमानसज्ञानाश्रतिज्ञात्स्ववच्छिन्नकार्यतानिरूपकत्वंप्रमाणांतरासहकारित्वमभिधायव्याप्तलौकि
कप्रत्यक्षत्वावच्छिन्नंप्रत्येवन्यायमतेउपनायकज्ञानस्यहेतुतयाऽभिप्रायरतोरूपासिद्धिवारणायमानसान्नतित्वप्रवेशइत्यभिहितंत
दसत्।इंद्रियत्वहस्तत्वात्रतिधर्मावच्छिन्नकारणतानिरूपितकार्यतायामनोनिरूपितत्वेनेवग्रंथकृतांवादरणसंभवात्तभवतानिरुक्तप्रमाणां
तरासहकारित्वनिवेशापत्यागौरवादिति।प्रमाणांतरेति।संयोगाभावत्वेनप्रमाणां विशेषणतीयं।तच्चेति।स्वभिन्नमनोभिन्ननिरूपितजन्यता
प्रवेशेचाक्षुषत्वादेः स्वभिन्नचक्षुरादिमात्रकांत्ररजन्यतावच्छेदकतापर्याप्तिमत्वेनोपनायकज्ञानजन्यतावच्छेदकीभूतप्रत्यक्षत्वस्यमन
नोभिन्नेंद्रियत्वावच्छिन्ननिरूपितकार्यतावच्छेदकतापर्याप्तिमत्वेनचासिद्धेर्वारणायत्वानिरूपितत्वमनोनिरूपितत्वयोर्निवेशः।इंद्रि
यत्वंचमनस्त्वघटितधर्मएवेतिनाग्रिमग्रंथासंगतिः।व्यापारवदिति।व्यापारवत्वेसत्यसाधारणफलोपहितकारणत्वमित्यर्थः।असाधा
रणफलोपहितकारणत्वंचस्वजन्यानुभवत्वव्याप्यजातिमत्त्वावच्छिन्नकार्यताविशिष्टवहिर्गोचरप्रमाविशिष्टत्वं।अनुमित्युपधायकेइष्ट
पत्तिवारयति।अनुमितीति।उक्तोपाधयस्त्वेनव्यापारवत्साधारणकारणत्वसत्वेन।आलोकसंयोगेआपाद्यसत्वेनविशेषणात्कारणत्वस्यावश्य
कत्वाद्धृथासंगत्यमभिधानं।आलोकादेःकुतोनप्रमाणव्यवहारइत्याशंक्यव्यापारवत्वेसत्यसाधारणकारणत्वमात्रंनतदवच्छेदकंतथास
त्यालोकादेःतद्विरहानुपपत्तेः किंत्वसाधारणकारणत्वेव्यापारवत्वेचसतिप्रमाणांतरासहकारित्वमित्याहप्रमाणेति।करणत्वस्येति।व्या

मित्यत्र तत्समानप्रकारपरामर्शप्रतिकारणत्वमेव व्यापारात्स्यादिति भावः। यज्ज्ञानस्याश्रयेत्वनुक्तौ प्रत्यक्षं प्रत्युपनायकज्ञानस्य कारणतयानुमित्यादौ
चसव्यापारतयाऽपादकासिद्धिर्यज्ज्ञानमिति शब्दे नज्ञानत्वादिकमादाय व्यभिचारश्चेत्यत आह यज्ज्ञानत्वावच्छिन्नेति कारणतान्वयि। चाक्षुषत्वाद्यव
च्छिन्नकारणतावद्वृत्तिं च नापादकमित्यनुपदं स्पष्टं किंतु प्रत्यक्षत्वावच्छिन्नकारणतावद्वृत्तिं। इष्टापत्तिवारणायानुमित्यादीति। आदिना शाब्द
बोधपरिग्रहः। तज्जातीतिगौरवमस्वरसः। सुखादिमनःसन्निकर्षवारकतावह्निः पदस्याह वह्निरिति। प्रत्यक्षत्वावच्छिन्नमनोन्यकारणस
मवहितेवह्निर्विषयस्मृत्युत्पादकेव्यभिचारः। इष्टापत्तिवारणायापाद्यस्यप्रमाघटितत्वादतः प्रमापदमनुभवार्थकं। उपगमादिति। तादृशास
मग्रीपदेनानुमितिसामग्र्युपा [redacted] दाने इष्टापत्तिः। उपनीतेति। उपनीतविषयत्वविशिष्टं न प्रत्यक्षं साक्षात्त्वेनागत्यमाणत्वात् उपनीत
विषये इन्द्रियसन्निकर्षाजन्यत्वाच्चेति प्रयोगः ज्ञानलक्षणाया अप्रसक्तत्वादिति भावः। ननु वह्निर्विषयकप्रमायामसाधारणत्वमापादकं तच्च
व्यापारवत्त्वाघटितं न व्यापारवदसाधारणत्वघटितार्थकपूर्वोक्तापत्तिजननायालं व्यापारवत्त्वघटितं तु तन्नियतव्यापाराभावेनासंभवीति नियतव्या
पाराभावेनेत्यग्रिममूलेन वक्ष्यते अस्यतु प्रत्यक्षत्वविरुद्धज्ञातिमत्त्वमाहेतुत्वापादकस्यानिरासेन संभवतीत्यत आह तत्र चेति। साक्षात्त्वमिति।
एवं च प्रत्यक्षत्वरूपजातिगर्भापादकासिद्धिरिति भावः। इत्यादय इत्यादिना अग्रिमेणान्वयः। नचांशिकोपनीतभाने प्रत्यक्षत्वेमानाभाव इत्य
त आह आंशिकेति। नचांशिकोपनीतभानासंग्रहेपि न क्षतिः तत्र विशेषणाज्ञानविधये वोपनयापेक्षासंभवादिति वाच्यं। अहं सुखी भूतलं

ग॰टी॰ चघटवदितिलौकिकालौकिकमानसेभूतलज्ञानानपेक्षाप्रसंगात्तस्यभूतलविशिष्टबुद्धित्वाभावात्।तादात्म्येनभूतलादेः प्रकारत्वमुपगम्य
११ तद्विशिष्टधीत्वोपपादनेऽनुपनायकज्ञानकारणतायाएवासिद्धापत्तेः।जातिविशेषस्यकार्यतावच्छेदकत्वाप्रसक्त्याप्रमाणांतरत्वापत्तेरन
वकाशः।अन्यदेवेति।उपनयस्यजातीयप्रमाहेतुतामात्रस्यैवोपगमात्।कारणत्वइति।तथाचबाधकाभावविशिष्टविजातीयप्रमाहेतुत्वमेव
विजातीयप्रमाकरणत्वसाधकमितिभावः।परंतुजगदीशेनफलायोगव्यवच्छिन्नकारणत्वसाधकमित्युक्तंतत्रनियतव्यापाराभावेनप्रमायाम
करणत्वादितिग्रंथासंगतेः।व्यापारवत्त्वघटितकरणत्वासिद्धेरुक्तकरणत्वसिद्धिविरोधित्वात्।ग्रंथकारमतेतत्करणताव्यवहारएवापाद्यः।अग्रेच
व्यवहारविषयतावच्छेदकाभावान्नतदापादनसंभवइतिरीत्यानासंगतिः।ज्ञानस्येति।मूलेनिद्रादिपदस्यतत्कालीनज्ञानपरत्वमितिभावः।योग्य
तादीति।अतींद्रियेइंद्रियसन्निकृष्टमपियोग्यताशून्यंतद्भिन्नंयोग्यमपिइंद्रियसंयोगशून्यं।आदिनालोकसंयोगघटितसामग्रीलाभः।विशिष्टा
नुभवरूपत्वेदोषवशादप्रमेतिदृष्टांतासंगतिरतःसंसर्गविषयकेति।संशयस्यप्रयोःपरोक्षज्ञानत्वाप्रसक्तेः।प्रसक्तेति।अवजनीयत्वादिति
।तत्रदोषाभावादितिभावः।आदिपदेनासंसर्गाग्रहसहितयोर्धर्मिस्मरणकोटिग्रहयोर्लाभात्तयोःस्थलभेदाभिप्रायकतामाहधर्मिणी
ति।धर्मधर्मिणोरनुभवेअसत्त्वादेःस्मरणेतुसंस्कारादिसत्त्वयोजनासंभवात्स्वयंधर्मिज्ञानंचेतिस्मरणंचेसत्त्वनयोजितं।कथमितिमूलेइंद्रियासं रामः॰
न्निकृष्टधूमेसधूमोवह्निव्याप्यइतिस्मरणाभावदशाभिप्रायकं।उक्तिसंभवादिति।तावतैवविशिष्टपरामर्शव्यभिचारोद्धारादितिभावः।परिशेषःवि ११

शिष्टपरामर्शाद्वृत्तित्वे सति किंचिन्निष्ठत्वं कारणतानिष्ठमित्याहुर्व्याप्तीति। केचित्तु व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वमनुमितिकारणतावच्छे
दकं स्वसमानाधिकरणत्वस्यावच्छेदकधर्मं तत्समानाधिकरणत्वोभयसंबन्धेनानुमितिमात्रवृत्तिकार्यतानिरूपितकारणतावत्त्वात् अंतर
पदं स्वभिन्नत्वलाभायेत्याहुः तच्चिंत्यं। व्याप्यतावच्छेदकप्रकारकज्ञानत्वेनोक्तज्ञानद्वयं स्फुटीकरोति। व्याप्येतेति। गुरुत्वान्यथायज्ञानत्वावच्छिन्न
स्येति। स्थलेपीत्यनेन नतदुत्तरत्वलाभः॥ हृदयमिति। अनुमितिरूपत्वेनुमितौ विलंबापत्तिः संस्मृतिरूपत्वे संस्कारस्य नियमतउद्बुद्धत्वं सर्वकार्यमित्या
शयः। अथेति मूलं धूमत्वसामानाधिकरण्येन पर्वतीयत्वज्ञानदशायां पर्वतीयत्वावच्छेदेन वन्ह्यव्याप्यत्वसंशयमइत्यर्थः। पर्वतीयत्वावच्छेदेन
वन्ह्यव्याप्यत्वसंशये वह्निव्याप्यत्वावच्छेदकत्वेनागृहीतधूमत्वस्य पर्वतीयत्वसामानाधिकरण्येन ज्ञानं विशेषदर्शनतया प्रतिबंधकं। धूमः प
पर्वतीय इति ज्ञानस्य पर्वतीयत्वसामानाधिकरण्येन धूमत्वावगाहित्वादिति समाधत्ते धूम इति। तस्य प्रतिबंधकत्वानुपगमे तादृशसंशयोत्तरं
परामर्शोत्पादं प्रसंजयति अन्यथेति। तत्र संशयस्य प्रतिबंधकत्वोपगमे तु स्वमते तत्सत्त्वानुमितिप्रतिबंधकत्वमाह। संशयेनेत्यादिनास्यमि
त्यंतेन। गादाधर्यां संशयोत्पादस्य वास्तवत्वे तदाशंकाया असंगतिमाह अतएवेति। पुरस्कारःतन्निष्ठधर्मितावच्छेदकताकत्वं। निश्चयमा
त्रेति मात्रपदं सामान्यधर्मपुरस्कारेण विशेषे निश्चयस्य निवर्तकत्वव्यंजकं। तादृशसंशयनिरासवैयर्थ्याशंकावारणायानुमितीत्ति दुर्वार इ
ति। तस्य पर्वतीयत्वसामानाधिकरण्यावगाहितया तत्सामानाधिकरण्येन धूमत्वदर्शनस्याकिंचित्करत्वादिति भावः। पर्वतीयत्वेति। अन्यथा

ग॰टी॰ १२ ख्यातिमयेनेतिशेषः। अनुद्देति तद्धर्मावच्छेदेन विपरीतनिश्चयस्य तद्धर्मवत्तितधर्मावच्छिन्नेतद्धर्मज्ञानविरोधित्वेपि तत्सामानाधिकरण्येन विप
रीतनिश्चयस्य तद्धर्मावच्छेदेन तद्धर्मज्ञानं प्रत्येव विरोधित्वादिति भावः। ननु पक्षे इति धूमत्वविशिष्टव्याप्तिवैशिष्ट्यज्ञानमादाय नैयायिकाना
मुद्देश्यसिद्धिः यसिद्धौ तत्र तत्वादिसत्तो मीमांसकैः धूमः पर्वतीय इति ज्ञानस्य विरोधदर्शनत्वनिर्वाहकं पर्वतीयत्वसामानाधिकरण्येन धूमत्वावगा
हित्वं यादृशनियमवत्तादुपेयं तादृशनियमादेव नैयायिकसिद्धविशिष्टपरामर्शस्य संशयनिवर्तकत्वमाह वस्तुतस्त्विति। अविरोधित्वेपीत्यनेन द्रव्य
त्वसामानाधिकरण्येन गंधादिनिश्चये पृथिव्यन्यद्रव्यत्वावच्छेदेन गंधाभावसंशय उपपादितः। स्वयं यत्र पदवच्छिन्न इति दीधितिमनुसारेण न च सामान्यनि
श्चयस्येत्यादिशंकायां धूमत्वावच्छेदेन व्याप्तिनिश्चयाद्धूमत्वावच्छेदेनाव्याप्यत्वसंशयानुत्पादेऽपि गमेन पर्वतीयधूमत्वावच्छेदेनाव्याप्यत्वसंशयोपपा
दनस्य व्यावर्तकधूमत्वदर्शनस्य पर्वतीयत्वावच्छेदेनाव्याप्यत्वसंशयविरोधितामात्रप्रदर्शनोत्तरमयुक्तत्वमाशंका तद्ग्रंथस्य धूमत्वावच्छेदेन व्याप्ति
निश्चयस्य पर्वतीयधूमत्वावच्छेदेनाव्याप्यत्वशंकाविरोधित्वेपि तात्पर्यमुपवर्णितं। येतु तद्ग्रंथस्य पर्वतीयत्वावच्छेदेनाव्याप्यत्वशंकाविरोधिव्यावर्तकी
भूतधूमत्वदर्शनपरतामात्रं ननु तत्र तत्स्य धूमत्वावच्छेदेन व्याप्तिस्मरणस्य पर्वतीयधूमत्वावच्छेदेनाव्याप्यत्वसंशयविरोधितापरत्वमप्यसंभवादिति
न चेत्यादिशंकायां व्यावर्तकीभूतधूमत्वदर्शनात् पर्वतीयत्वावच्छेदेनाव्याप्यत्वशंकानुत्पादेऽपि गमेनैव पर्वतीयधूमत्वावच्छेदेनाव्याप्यत्वसंशयस्यु रा॰म॰ १२
पपादयन्ति तन्मतमाह परे त्विति। मा भूदितीति। मा भूदित्यंतस्येत्यर्थः। ते न सामान्यनिश्चयस्येति शब्दार्थोऽप्यतिगतो भवति। ननु शंकापूर्वग्रंथस्य

पर्वतीयधूमत्वावच्छेदेनाव्याप्यत्वशंकाविरोधि धूमत्वावच्छेदेनव्याप्तिनिश्चयेन तात्पर्यं तदायन्नहीत्यादिसमाधानान्तं गतिरित्याशंकान्तं समा-
धानमवतारयति समानेति। सामान्येइति। तथाच यथा पर्वतीयत्वमात्रेण धूमत्वदर्शनस्य पर्वतीयत्वरूपसामान्यधर्मविशिष्टविशेष्यकतया
तादृशसामान्यधर्मविशिष्टेऽव्याप्यत्वसंशयविरोधित्वं तथैव तस्य पर्वतीयधूमत्वरूपविशेषविशिष्टविशेष्यकतया तादृशविशेषधर्मविशिष्टे-
ऽव्याप्यत्वसंशयेऽप्यविरोधित्वमित्यर्थात्सामान्य इत्यस्य वैयर्थ्यं तत्र विशेषधर्मावच्छेदेनाव्याप्यत्वसंशयस्य सामान्यधर्मे सामानाधिकर-
ण्येनाव्याप्यत्वज्ञानं तथा पर्वतीयत्वसामानाधिकरण्येन धूमत्वज्ञानस्याविरोधित्वशंकावारणाय समानप्रकारकत्वं प्रतिक्षिप्य समानविषयक-
त्वेन विरोधित्वमादर्तं तथास्त्याह तथाचेति। भिन्नेति सामान्यलक्षणानुपगमेन धूमो वह्निव्याप्य इति स्मरणस्य पर्वतीयधूमविषयकत्वासंभवा-
त्। तथाच तथाविधस्मरणस्यैव विशेषधर्मावच्छेदेनाव्याप्यत्वसंशयनिवर्तकत्वतात्पर्यं तद्रूपस्य कुतोनास्तीति भावः। व्याप्यतया संस्कारोद्वारणाया-
ह तदिति। न संशय इति दीधितेर्नानाहार्यसंशय इत्यर्थमाह तदभावेनेति। न चेच्छारूपकारणविरहादप्रसिद्धेश्चानाहार्यसंशयो माभूत् धर्मितावच्छेदक-
तासंबंधेनानाहार्यस्याप्रामाण्यत्वसंशयस्याप्रामाण्याभावेऽदुर्वार इति वाच्यं। तन्मते धर्मितावच्छेदकतासंबंधेनानाहार्यस्याप्रामाण्यत्वज्ञानं प्रतिस्याप्रामाण्याभाव-
वृत्तिविषयतासंबंधेन ज्ञानसामान्यस्य प्रतिबंधकत्वात्। प्रतिबंधकतामिति समवायेनेत्यादिः। संशयानुत्पादेनानुभवो हेतुरतः प्रयति अनुभवव-
त्त्वादिति। नहि धूमत्वावच्छेदेन व्याप्तिज्ञानानुत्पत्तिस्तत्र स्वरूपसंबंधरूपतदवच्छेदकताया अप्रामाणिकतया अन्यथाख्यातापत्तेरित्यत आह मीमां-

ग०टी० प्रकारानामिति। अनतिप्रसंगाय कालिकादिसंसर्गकज्ञानस्य प्रतिबंधकत्वादिवारणाय। व्याप्यत्वाभावो योसंशयपत्वस्येति पुरुषत्वविशिष्टे स्था
१२ णुत्वाभावावगाहितायाविरोधिताबीजत्वएव तदंशे संशयत्वस्याविरोधिताबीजत्वं घटते तुल्यत्वादिति· अस्माकं तु पुरुषत्वविशिष्टे स्थाणु
त्वानवगाहित्वविशिष्टपुरुषत्वविशिष्टे स्थाणुत्वाभावावगाहित्वस्य विरोधिताप्रयोजकत्वान घटादिसंशयत्वतुल्यतेति भावः। बाधे विध
13 मितावच्छेदकविशिष्टप्रकाराभावावगाहितायाविरोधिताबीजत्वं व्यवस्थापयति एतेनेति। संसर्गेति। संशयत्वमात्रस्याविरोधिताबीजत्वाभावा
त्। करादीति। तच्छून्य इत्यादिः। प्रतिबध्यतायामपि धर्मिणि प्रकाराभावगाहित्वमेव तंत्रमित्याह व्यभिचारधियइति। बाध्येप्याह एवमिति
। अनुद्बुद्धसंस्कारान्येत्यविषयत्वेन प्रतिबंधकत्वेत्याह उद्बुद्धेति। धूमत्वेति। पर्वतीयधूमत्वावच्छेदेन वह्निव्याप्यत्वाभावसंशयमधिकृत्य न च सा
मान्यनिश्चयस्येति ग्रंथः तदवच्छेदेन वह्निव्याप्यत्वाभावभ्रममधिकृत्य न च धूमत्वपुरस्कारेणोत्पन्नमग्रंथः उभयत्रापि धूमो वह्निव्याप्य इति सम
रणमेव विरोधितपासमाधानेदर्शितमिति विपरीतज्ञानमात्रस्य प्रतिबध्यत्वलाभः। वस्तुतस्त्विति मूलं। वस्तुतोऽनुमितिरेव भवति न तु संश
यः तु का रूपाऽपः संशयसत्वेऽनुमितिरनिष्टा न तु तदसत्वे इति भावः॥ भावत्वं संशयेति। इच्छां विनेत्यादिः अत्रापीति इद भावोऽभावो वेति पक्ष
धर्मतायाय द्रूपेणाप्रयोरनिश्चयः तयोरेव रूपांतरेण तन्निश्चयस्य सिद्धांतविरुध्यमानत्वादिति भावः। यद्धर्मिकेति। वैपरीत्यिकारणोद्धारः॥ व्यतिरेकज्ञा राम०
नसामान्यप्रवेशोत्वाह। व्यभिचारज्ञानसामान्येति। अन्वयत्वसंशयव्यतिरेकनिश्चयोपरक्तिप्रतिबंधकोत्तन्निश्चयसद्वे तु तदनुमितेर्व्याप्तेरिवेति प्रत्य १२

स्म्भूलं। अत्र पञ्चम्यां यद्व्यतिरेकज्ञानत्वव्यापकप्रतिबंधकताकत्वं तन्निश्चयत्वावच्छिन्नजन्यतयोव्याप्तिः प्रवृत्तिः पक्षः तत्र प्रामाण्यव्यतिरेकज्ञानत्व
व्यापकप्रतिबंधकताकत्वहेतुना फलसाधनताज्ञाने प्रमात्वनिश्चयत्वेन हेतुता साध्या। ईश्वरज्ञानमादाय सिद्धसाधनवारणाय ईश्वरानंगीक
र्तृबौद्धमतेऽर्थांतरप्रसंगवारणाय वा तन्निश्चयत्वावच्छिन्नजनकतायाः साध्येऽन्तर्भावः। नच परामर्शे व्याप्तिनिश्चयोऽन्यथासिद्ध इति दृष्टांतासि
द्धिः प्रतिबंधकत्वं अवच्छेदकत्वं स्वरूपसंबंधविशेष इति सांप्रतं। व्याप्तिसंशयादेर्व्याप्यभावनिश्चयेऽतिरिक्तप्रतिबंधकत्वकल्पनभयेन व्याप्यभा
वज्ञानत्वेनैव प्रतिबंधकत्वात्. नच तथैव विवक्ष्यतामिति वाच्यं. व्याप्यभाववद्घटाभाववान् धूम इति ज्ञानप्रतिबध्ये तद्विशेष्यकघटवत्ताज्ञाने
व्याप्तिनिश्चयाजन्ये व्यभिचारात्. नच यदभावप्रकारितात्वेनावच्छेदकता विवक्षणीया. व्याप्यभाववान् धूमो घटाभाववानिति निश्चयमादाय व्य
भिचारात्. विनिगमनाविरहेण तत्तत्प्रतिबंधकतायां व्याप्यभावप्रकारितावच्छिन्नत्वात्। नचावच्छेदकतान्यप्रकारिता विवक्षणीया। व्याप्यभा
रितिवाच्यं। अवच्छेदकतापर्याप्तेरप्रवेशेन पक्षधर्मत्वावगाहितायां अधिकत्वेऽपि परामर्शवृत्तिजनकताया एव तादृशत्वात् तदनुसामान्यलाभोपा
वद्विशेषोपादानादेव भवति। नचेह तदस्ति। व्याप्यभाववत्तद्भेदकोटिकसंशयस्य व्याप्तिसंशयत्वाभावेन यत्संशयपदेनोपादानासंभवात्। किं
च यत्संशयपदं यद्रूपावच्छिन्नविषयकसंशयपरमेवर्पं वाच्यं व्याप्तिसंशयसामान्यांतर्गतानां किंचिद्रूपेण व्याप्तिप्रकारकनानासंशयाना
मनुमित्यादावप्रतिबंधकत्वात् वक्ष्यमाणरीत्या संशयसामान्यविघटकसत्त्वात् एवं च व्याप्यभावाभाववत्त्वेन व्याप्तिकोटिकव्याप्यभावसंशयस्या

ग॰टी॰ व्यसंग्रहः व्याप्तित्वावच्छिन्नसंशयत्वाभावात्‌ तथा च कथं व्यतिरेकज्ञानत्वेन निवेशसंभव इति चेन्न। तत्र दीधितावेव व्यतिरेकपदस्य तत्सना
१४ ध्यतिरेकसंशयत्वेनोभयोपादानसंभवात्। अत्र दीधितिकृन्मते व्यतिरेकसंशयपदलक्ष्यैव व्यतिरेकनिश्चयपदलक्ष्यैव वा हेतुघटकता। दलांतर
१५ स्य सामान्यपदोपादानसूचकत्वेन व्यर्थत्वात्‌ तथाहि व्याप्यत्वाभाववत्तानिश्चयात्मकव्याप्यादिसंशयप्रतिबंधेतरवत्ताज्ञानादौ हृदवत्ता
निश्चयाघजन्ये व्यभिचारवारणाय पक्षे शयादिपदं तत्सामान्यपरं। न च पक्षसंशयत्वेन व्यतिरेकपदव्यक्तसाध्यवदभावसंशयत्वेन वा प्रतिबं
धकत्वं स्वावच्छेदकत्वस्वरूपसंबंधविशेषय इति सांप्रतं। व्याप्तिसंशयादेर्व्याप्यभावनिश्चये ऽतिरिक्तप्रतिबंधकत्वकल्पनभयेन व्याप्यभाववत्ता
नत्वेनैव प्रतिबंधकत्वात्‌· न च तथैव विवक्ष्यतामिति वाच्यं· व्याप्यभाववद्घटाभाववोभयवान्‌ धूम इति ज्ञानप्रतिबध्ये तादृशोभयघटवत्ताज्ञाने व्याप्ति
निश्चयाजन्ये व्यभिचारात्। न च यद्भावप्रकारितात्वेनावच्छेदकता विवक्षणीया· व्याप्यभाववान्‌ धूमो घटाभाववानिति निश्चयमादाय व्यभि
चारात्‌· विनिगमनाविरहेण तत्प्रतिबंधकतायां व्याप्यभावप्रकारितावच्छिन्नत्वात्। न चावच्छेदकतान्यप्रकारिता विवक्षणीया। व्याप्यभाव
वद्धूमकालीनघटवानिति ज्ञानप्रतिबध्ये तादृशघटाभाववत्ताज्ञाने व्यभिचारात्। न च प्रकारतावच्छेदकविषयत्वेन तत्रावच्छेदिकेति वा
च्यं। एवमप्यवच्छेदकधर्मदर्शनादिमुद्रया व्याप्यभाववज्ञानस्य घटवत्ताज्ञानविरोधित्वात्‌ इयावर्त्तकविशेषणांतरस्यापि प्रवेशे महागौ राम॰
रवात्। अव्यभिचारग्रहे प्रतितदभावनिश्चयत्वेन विरोधितया तद्घटकाव्यभिचाराभावज्ञानत्वावच्छिन्नप्रतिबंधकताके ऽव्यभिचारग्र १४

हेत्व्यभिचारस्य दुर्वारत्वाच्च। नच भिन्नधर्मिकाणां किंचिद्रूपेणाव्याप्तेर्भाववत्प्रकारकनानासंशयानां सामान्यतो गृहीतानामनुमितावप्रतिबंध
कत्वादृष्टं तत्सिद्धिरिति वाच्यं। साध्यघटकनिश्चयसमानधर्मितावच्छेदकपदरूपावच्छिन्नाभावसंशयस्य वाच्यत्वात्। एवंच तद्घटकदलां
न्तरोपादानवैयर्थ्यादितरपदोपादानवैयर्थ्यमेव। नच तादृशसंशयत्वव्यापकतायामतिरेकज्ञानत्वव्यापकत्वादन्यतरपादानन्निवेशस्यानु
चित इति वाच्यं। तथा सत्यनुचितगौरवापत्तेः। नच पदव्यतिरेकज्ञानत्वेन प्रतिबंधकतानिवेशेपि स्वरूपसंबंधरूपावच्छेदकत्वस्यैव निवेशो
स्त्विति वाच्यं। ग्राह्याभावज्ञानत्वस्य ग्राह्याभावनिश्चयत्वघटकतया ग्राह्यज्ञानप्रतिबंधकतावच्छेदकत्वात् ग्राह्यनिश्चयाजन्ये ग्राह्यज्ञाने व्यभि
चारात्। नच पदव्यतिरेकज्ञानत्वपर्याप्तप्रतिबंधकतावच्छेदकतानिवेशसंभवः ग्राह्याप्रकारकत्वविशिष्टग्राह्याभाववन्मात्रज्ञानत्वे एव तत्
त्पर्याप्तेरिति वाच्यं। प्रत्येकापर्याप्तस्योभयत्रपर्याप्त्यभावात् व्यतिरेकज्ञानत्वत्वावच्छिन्नपर्याप्तिः संबंधो वाच्यः। तत्रापि चेदवच्छेदकत्वं
स्वरूपसंबंध एव तदाऽनवस्था अनतिरिक्तवृत्तित्वं चेत्तदा महागौरवात्। तथाच यद्रूपावच्छिन्नविशेष्यकपदरूपावच्छिन्नाभावप्रकारकज्ञा
नत्वव्यापकप्रतिबंधकताकं यत्तन्निश्चयत्वावच्छिन्नजन्यमित्यर्थः। नचाव्यभिचारव्यतिरेकरूपव्यभिचारस्य संशयो निश्चयश्चाव्यभिचारग्र
हप्रतिबंधकः व्यभिचारसंशयप्रतिबंधकतायां व्याप्तिग्रहोपाये मणिकारैरेवोक्तत्वात्। तथाचाव्यभिचारव्यतिरेकज्ञानसामान्यप्रतिबंध्ये
तन्निश्चयाजन्येऽव्यभिचारग्रहे व्यभिचारो दुर्वार इति चेन्न। ग्राह्यसंशयस्याप्रतिबंधकत्वात्। व्यभिचारसंशयस्य व्याप्तिग्रहप्रतिबंधकत्वाभिधानंच त

ग० टी० १५ त्प्रतिबंधकतामते नेतिन्तन्नैवोक्तत्वान्नञ्द्विरोधः यत्तु घटादिसंशयस्य घटादिग्रहाप्रतिबंधकतया संशयपदेन घटादिनिश्चयाहेतुके
घटादिज्ञाने व्यभिचारस्य वारणेऽपि अव्यभिचारनिश्चयाजन्यतन्निश्चये अव्यभिचारव्यतिरेकसंशयनिश्चयप्रतिबंधे व्यभिचारवारणार्थं प्रति
बंधकीयसंशयाद्युपदर्भावत्वप्रकारकतानेयत्वं विवक्षणीयं तत्प्रतिबंधकताया अव्यभिचाराभावत्वाप्रकारकव्यभिचारत्वप्रकारकसंशयसा
धारणत्वतया न दोष इत्यालोके उक्तं तदनुपादेयं। घटादिसंशयस्य तन्निश्चय इव व्यभिचारसंशयस्यापि अव्यभिचारनिश्चये ग्राह्यसंशयत्वाविशेषेण
प्रतिबंधकतयैव निर्वाहात् द्विवक्षावैयर्थ्यात्। यन्मतमालंब्य मणिकृतां व्यभिचारसंशयप्रतिबंधकत्वाभिधानं घटादिसंशयेतन्निश्चयप्र
तिबंधकताया अपि तन्मते सिद्धतमात् द्विवक्षया घटनिश्चयाहेतुके घटवत्ताज्ञाने संशयपदेन व्यभिचारोद्धारस्य दुष्करत्वात्। न च धूमः प्र
मेयवान् इति प्रमेयत्वेन व्याप्यभावज्ञानस्याप्रतिबंधकत्वात् साधनाप्रसिद्धिः यद्रूपावच्छिन्नाभावत्वेन प्रकारिता निवेशात्। अव्यभिचारा
भावाभावत्वेन व्यभिचारसंशयस्य ग्राह्यसंशयतया व्यभिचारशंकासमाधातुं तदप्रतिबंधकतामतस्यावलंबनीयत्वात् एतत्सर्वमभिप्रेत्य
निर्गलितं प्रदर्शयति। तच्च तत्त्वमिति। अत्रालोककारानुयायिनः यद्व्यतिरेकज्ञानत्वव्यापकप्रतिबंधकताकत्वनिवेशासंभवेऽपि यथाश्रुतम
लानुरोधेन प्रतिबंधकताविशेषणात् तया निश्चयोपादानमावश्यकं अन्यथा संशयपदवैयर्थ्यं स्यात्। अत्रापि घटाभावनिश्चयात्मकसांकु रा० म०
रविशेषव्यतिरेकनिश्चयसामान्यस्य तादृशस्यापत्तिं चिन्तितं कुरसंशयस्य एवं तादृशनिश्चयात्मकसांकुरविशेषसंशयसामान्यस्य तादृ १५

शस्यपत्तिं चिद्व्यतिरेकनिश्चयस्यचशंभवेनांकुरनिश्चयाजन्येघटवत्ताज्ञानेव्यभिचारइत्यतः संशयनिश्चयोभयसामान्यं विवक्षणीयं नचैवमपिपादृशां
कुरविशेषीयसंशयसामान्यतद्व्यतिरेकनिश्चयसामान्योभयस्यचराभावनिश्चयत्वंतत्रव्यभिचारोदुर्वारइतिवाच्यं। तादृशांकुरेप्रमाणाभावस्यैवालोक
रिष्यत्वीसंमतत्वात्। नचैवमपिसंशयत्वादिमध्येज्ञानत्वप्रवेशात्संशयत्वादिवैयर्थ्यमितिवाच्यं। तज्ज्ञानत्वव्यापकताघटकात्प्रतियोगितावच्छेदकत्वा
भावादन्यस्यैवतस्यसंशयत्वादिव्यापकताघटकत्वेनावैयर्थ्यात्। अत्रचव्यभिचारज्ञानस्यव्याप्तिनिश्चयेमणिमंत्रादिवत्तदृण्यशेवप्रतिबंधकतानतुग्राह्या
भावावगाहितया। कथमन्यथासंतताभावगर्भव्यभिचारग्रहस्यान्योन्याभावगर्भव्याप्तिधीविरोधिता। ग्राह्याभावावगाहितयाप्रतिबंधकत्वमेवचसं
शयमात्रत्वमितिव्यभिचारसंशयप्रतिबंधकत्वंयुक्तमेव। एवंचयथाग्राह्याभावनिश्चयप्रतिबध्यघटवत्ताज्ञानेसंशयपदेनव्यभिचारवारणंतद्वटसंशय
स्यग्राह्याभावावगाहित्वेनप्रतिबंधकताशून्यतयातत्रैवव्यभिचारसंशयस्यतंत्रप्रतिबंधकतयातत्प्रतिबध्येव्यभिचारनिश्चयाजन्येव्याप्तिनिश्च
येव्यतिरेकनिश्चयपदेनव्यभिचारवारणं। अव्यभिचारसंशयरूपतत्प्रतिबध्येव्यभिचारनिश्चयप्रतिबध्येचाव्यभिचारनिश्चयाजन्येऽव्यभिचारनिश्चयेव्य
भिचारवारणायपदभावत्वप्रकारकत्वनियतस्यविशेषणांशावश्यकं। परंतुनिश्चयपदत्वेयाग्राह्यभिन्नत्वेनपक्षपदार्थेविशेषणीयोलाघवात्तेनाव्यभिचारनिश्च
येनव्यभिचारः। नचैवंग्राह्यव्यतिरेकज्ञानप्रतिबध्येविशिष्टज्ञानमात्रेपक्षपदेनग्राह्यस्मृदुर्धरतयाव्यभिचारासंभवात्संशयपदवैयर्थ्यमितिवाच्यं। एकप
दार्थेपरपदार्थनिष्ठाभावप्रतियोगित्वंयोग्यतासाचग्राह्यभिन्नेतितद्व्यतिरेकनिश्चयप्रतिबध्येमाद्रबोधेव्यभिचारवारणायसंशयपदोपादानात्यो

ग॰टी॰ १९ रयत्तासंशयपत्तु न प्रतिबंधक इति तद्दसत् । यतः एतन्नते सकलव्यभिचारज्ञानस्यैव सर्वविधाव्यभिचारज्ञाने स्वतंत्रविरोधिता अन्यथा ग्राह्याभा
वावगाहितया ग्राह्याभावांतरसंशयवद्व्याप्त्यव्यभिचाराभावसंशयस्यप्रतिबंधकत्वानुपपत्तेः । एवं च ग्राह्याभावेतरैकविधव्यभिचारधीप्रति
16 बंधेऽन्यविधव्यभिचाराभावग्रहे व्यभिचारोद्धारे एवेति । न च पदभावत्वप्रकारकतानियतोपत्तप्रतिबंधकपदव्यतिरेकनिश्चयः पक्षप्रतिबंधक
पत्संशयस्य यद्भावत्वप्रकारकतानियतः इत्येकदेशोपदभावत्वप्रकारकतानेपत्त्यस्य द्वैधानिवेशोऽनर्थः । व्यभिचारसंशयस्य व्यभिचारनिश्चय
स्य चाव्यभिचाराभावत्वाप्रकारकतया एकत्र तदुपादानेपि दर्शितव्यभिचारवारणासंभवादिति वाच्यं संशयनिश्चययोः पदभावत्वप्रकारकतानै
यत्यवैकल्पिकत्वात् । अत्र स्वप्रतिबंधकपत्संशयत्वव्यापकपदभावत्वप्रकारकताकत्वे सति पदव्यतिरेकनिश्चयत्वव्यापकप्रतिबंधकताकत्वमेवो
हेतुः । तेन पदभावत्वप्रकारक एव पत्संशयः पदव्यतिरेकनिश्चयस्य यत्प्रतिबंधकस्तन्निश्चयस्तद्धेतुरित्यत्र न साध्यसाधनविरोधः व्याप्तिग्रहे व्या
प्यभावं स्वव्यभिचारत्वावच्छिन्नविषयकयोः संशयोः प्रतिबंधकाचितिसंशयत्वव्यापकत्वप्रवेशः । अथ पत्संशयप्रतिबध्यत्वमात्रनिवेशो सिद्धिवि
धयाय ज्ञानप्रतिबध्यायामनुमितौ तन्निश्चयाजन्मायां व्यभिचारोऽतः संशयत्वनिवेशो वाच्य एव न त्विदानीं अनुमितिशाब्दबोधादिप्रतिबंधके समाना
कारकसिद्धिशाब्दबोधादौ स्वप्रतिबंधकपक्षज्ञानत्वसत्त्वेपि पदभावत्वप्रकारकताविरहाद्वेवादोषादिति वाच्यं पादत्रा विषयविशेषके नादौ संसारे कस्या राम॰ १९
पि न सिषाधयिषाद्वयमध्यावतिसिद्धिभिन्नसिद्धिस्तत्र बाधमात्रमादाय यत्र वा विषयविशेषे पक्षतावच्छेदकसामानाधिकरण्येनैव समूहालंबना

त्मकसिद्धिबाधनियमः तत्र सामानाधिकरण्येनानुमितौ तादृशसिद्धिमादाय व्यभिचारोऽतः संशयत्वनिवेशात्। वस्तुतस्तु व्याप्तिज्ञानत्वेन व्याप्य
भाववत्त्वप्रकारकत्वव्याप्यव्याप्तिनिश्चये तदसत्त्वादिति साधनाप्रसिद्धिः। न च तस्यानुमितिप्रतिबंधकत्वं बाधादिसमूहालंबनात्मनस्तस्य तथात्वा
दिति तदुपादानं व्याप्तिकोटिकव्याप्यत्वाभावकोटिकसंशयोपगमे तु अनुमितिप्रतिबंधके तत्र व्याप्यभाववत्त्वप्रकारकताभावेपि न क्षतिः। प
त्संशये मुख्यविशेष्यतानिरूपितप्रकारतानापन्नाभावांशे प्रतियोगितासंबंधेन तत्प्रकारकत्वस्य निवेशनीयत्वात्। स्वप्रतिबंधकव्यभिचारसंशय
त्वव्यापकव्यभिचाराभाववत्त्वप्रकारताकेऽव्यभिचारनिश्चये तदजन्ये व्यभिचारवारणाय पक्षव्यतिरेकनिश्चयप्रतिबध्यत्वोपादानं। स्वविरोधिवि
षयकसमूहालंबनात्मकघटवत्त्वसंशयत्वव्यापकघटाभाववत्त्वप्रकारताके तादृशसमूहालंबनात्मकघट व्यतिरेकनिश्चयप्रतिबध्ये घट
वत्तानिश्चयाजन्येऽव्यभिचारनिश्चये व्यभिचारो। तत्तत्तादृशनिश्चयत्वव्यापकत्वनिवेशः। तादृशनिश्चयत्वावच्छिन्ननिवेशस्तु न युक्तः। अनु
मितिं प्रति व्याप्यभावनिश्चयत्वेन प्रतिबंधकत्वे व्याप्यभावादिसंशये पृथक् प्रतिबंधकतांकल्पनप्रसंगभयेन व्याप्यत्वाभाववज्ज्ञानत्वेनैव प्रतिबं
धकत्वात्। पक्षस्वप्रतिबंधकव्यभिचारसंशयत्वव्यापकव्यभिचाराभाववत्त्वप्रकारताके सिद्धिविधयाव्यभिचारव्यतिरेकनिश्चयत्वावच्छिन्नप्र
तिबंधकताके च व्यभिचारनिश्चयाजन्येऽव्यभिचारनिश्चये व्यभिचारात्। स्वरूपसंबंधरूपावच्छेदकत्वमिति तदशुद्धमेव। विषयविशेषे व्यापकत्व
निवेशेपि दोषावारणात्। वस्तुतस्तु व्यभिचारप्रसक्तनिर्णयं प्रत्येव व्यभिचारसंशयः प्रतिबंधकः तत्र च न व्यभिचारव्यतिरेकनिश्चयः प्रतिबंधक

इति न किंचिदेतत्। अथ धूमालोकादिधर्मिकव्याप्यभाववन्निश्चयादिभेदेन प्रतिबंधकताभेदात् कस्यामपि प्रतिबंधकतायां यद्रूपावच्छिन्नसं
शयत्वस्य यद्रूपावच्छिन्नाभाववन्निश्चयत्वस्य वा आपक्तेरिति दृष्टांतासिद्धिरिति चेन्न। पूर्ववद्यद्रूपावच्छिन्नज्ञानधर्मितावच्छेदकत्वेन सं
शयनिश्चययोर्निवेशात्। अथ कालिकादिसंबंधेन व्याप्यभावप्रकारकसंशयविरहेऽपि तत्संबंधेन व्याप्यभाववन्निश्चयसंभवान्न प्रतिबं
धकताविरहात् साधनाप्रसिद्धिरिति चेन्नादेशिकविशेषणतासंसर्गकत्वेन निश्चयविशेषणात्। यद्रूपावच्छिन्नप्रकारितावच्छिन्नप्रतिबध्यता
निरूपितप्रतिबंधकतावच्छेदकविषयितानिरूपकत्वपर्याप्त्यधिकरणसंसर्गावच्छिन्नत्वेन वा व्यतिरेकप्रकारितापर्युपादेयतयातेन व्यभिचारा
दीनामन्यादृशस्वरूपसंबंधोपगमेऽपि व्यभिचारनिश्चयसंग्रहात् न यद्भावत्वप्रकारकत्ववैयर्थ्यं। अथ तत्प्रतिबंधकसंशयत्वस्य यद्भावत्वप्रका
रकत्वव्याप्यत्वविवक्षणेऽनुमितिप्रतिबंधकपक्षधर्मताभाववन्निश्चयात्मके मेयत्ववद्घटत्वादिमानापि संशये व्याप्यभावत्वप्रकारकताभावाद्दृष्टां
तासिद्धिः। न च तस्य व्याप्यभावावगाहित्वं नास्तीति वाच्यं। घटाद्यभावत्वेन व्याप्यभावावगाहनसंभवात्। न च यद्भावत्वेनावगाहित्वं विवक्षितं। तथा
सत्येतत्संदर्भवैयर्थ्यात्। तदुपादानेऽपि व्यभिचारसंशयव्यभिचारनिश्चययोर्मिथः प्रतिबध्ये व्यभिचारनिश्चयाजन्ये व्यभिचारनिश्चये व्यभिचारा
नुद्धारात्। अव्यभिचाराभाववत्तावच्छिन्नसंशयएव तादृशाभावत्वप्रकारतासत्त्वात्। अथ प्रतिबंधकतायां यद्भावावगाहिताप्रयुक्तत्वं निवेश्यं।
अथ प्रयुक्तत्वं दुर्वचं। न तावदवच्छिन्नत्वं पक्षधर्मताविरहत्वेन व्याप्यभावावगाहितायां अपि पक्षधर्मताविरहत्वावच्छिन्नावगाहितात्वेन पक्षताविर

हृज्ज्ञानप्रतिबंधकतायामवच्छेदकतया आत्माभावावगाहितात्वप्रयुक्तत्वापत्तेः। आत्माभावत्वादिनाऽन्यावगाहिभ्रांतेरपि विरोधितया वास्तवन्तद्
भावावगाहितात्वेन तदभावावगाहितायामवच्छेदकत्वविवक्षणासंभवात्। अत एव न व्याप्यत्वमुक्तम्। भ्रांतिसाधारणप्रतिबंधकतायां तदसं
भवात्। नापि व्यापकत्वं प्रमेयत्वादिना विरोधिविषयकज्ञानस्याप्रतिबंधकतया विरोधिविषयतायास्तद्व्यापकत्वादिति चेन्न। भ्रमान्यत्वनियद्
भावविषयितावच्छिन्नत्वस्य मुक्तत्वात्। अनुगतभ्रमत्वस्य म्यचार्यैरेवाभिधास्यमानत्वात् मैवं। तथा सति संशयपदं भावत्वप्रकारकज्ञाने प्र
त्यनिवेशाकल्पे प्रतिबंधकतायां पदभावावगाहितात्वप्रयुक्तत्वं न विशेषणं अन्यथा व्यभिचारसंशयप्रतिबंधेऽव्यभिचारनिश्चये व्यतिरेकनि
श्चयपदोपादानव्यर्थत्वप्रसंगतेः। अव्यभिचारनिश्चयं प्रतिप्रतिबंधकतायां व्यभिचाराभावावगाहितात्वप्रयुक्ततयाप्यस्य पदेन व्यभिचारोपादाना
संभवादिति प्रसक्षरिप्यग्रोविरोधप्रसंगादिति चेन्न। यत्संशयपदेन पद्रूपावच्छिन्नप्रकारताकसंशयोपादानात्। समानधर्मिकपद्रूपावच्छि
न्नाभावावगाहिज्ञानत्वरूपसंशयत्वनिवेशाद्यानिप्रकारकव्याप्यमेदसंशयसुदासः। अथैवमपि व्याप्तित्वावच्छिन्नविषयताकेयरत्वादिना व्याप्तेः संशयेऽनुमि
तिप्रतिबंधकपक्षधर्मताभावनिश्चयात्मके व्याप्यभावत्वप्रकारकताभावादुष्टतासिद्धिर्दुर्वारैवेति चेन्न। मुख्यविशेष्यतांशे प्रकारतापन्नाभावांशे प्रतियोगि
तासंबंधेन पद्रूपावच्छिन्नप्रकारकज्ञानत्वस्य तदर्थत्वात्। अथ पर्वतत्वाद्यवच्छेदेन वन्ह्यनुमितौ वह्नितदभावसमुच्चयरूपप्रतिबंधकस्य वह्नित्वावच्छिन्ना
भावत्वप्रकारताकत्वाद्वन्ह्यभावनिश्चयसामान्यप्रतिबध्यत्वाच्च वह्निनिश्चयाजन्यायां व्यभिचारोदुर्वार इति चेन्न। मुख्यविशेष्ये प्रकारीभूतांशे पद्रूपाव

च्छिन्नप्रकारकतायाः स्वसामानाधिकरण्यस्यावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवंधकतावच्छेदकत्वोभयसंबंधेन यद्रूपावच्छिन्नप्रकारकताविशि
ष्टत्वेन निवेश्यत्वात् प्रत्यक्षालोकरिष्यमाणं तु यत्संशयत्वघटकविषयिताप्रयुक्तप्रतिवंधकताश्रयत्वेन संशयो निवेश्यः। नातो घटत्वादिना व्याप्ति
संशये प्रतिवंधकपक्षधर्मत्वाभावनिश्चयात्मके व्याप्यभाववत्ताप्रकारकत्वेपि दृष्टान्तासिद्धिः नापि व्यतिरेकनिश्चयपदोपादानव्यावृत्त्यसंगतिरित्यु
क्तौ स्य तन्मते यद्व्यतिरेकनिश्चयत्वव्यापकप्रतिवंधकताकत्वमित्यत्र घटाव्यभिचारोभयसमूहालंवने घटाभावाव्यभिचारोभयसमूहालंवन
प्रतिवध्ये व्यभिचारनिश्चयाजन्ये व्यभिचारइत्यतो व्यापकत्वनिवेशइति वोध्यं। अथैतन्मते स्वप्रतिवंधकताप्रयोजकपदभावविषयिताघटितयत्सं
शयत्वस्यैव व्याप्यत्वपाविवक्षणामुचितं तन्मते सति व्यभिचाराभावविषयितायाः प्रतिवंधकतानवच्छेदकतया व्यभिचारसंशयवारणाद्धि पर्यमोपा
दानव्यावृत्तिर्निर्दोषात्तेसंगमपि तु। न च संशयत्वघटकविषयितायां पदभावीयत्वानिवेशात्स्वप्रतिवंधकतावच्छेदकव्यभिचारविषयितामादाय व्य
भिचारसंशयोयं यद्यसंभवात्तद्व्यावृत्तिः संगमनीयेति वाच्यं द्वितीयहेतोः स्वप्रतिवंधकताप्रयोजकविषयिताघटितत्वमेवानिश्चयत्वे निवेश्यं न तु
तत्र पदभावीयत्वमपि प्रयोजनाभावात् एवं च तादृशविशेषणस्यैव संशयत्वे प्रवेशे संशये पदभावत्वप्रकारकत्वनियमरूपविशेषणाप्रवेश
यद्येन तद्विशेषणाप्रवेशइति प्रत्यक्षदीधितिटिप्पणीविरोधप्रसंगात्। न च निश्चये पदभावावगाहिताप्रयुक्तप्रतिवंधकताशालित्वं तत्तु न सं एम॰ १८
शयेन तत्र स्वप्रतिवंधकताप्रयोजकविषयिताघटितस्यैवोक्तत्वात्तद्विरोध इति वाच्यं यतः प्रमेयवान् धूमः पक्षावृत्तिरिति ज्ञानस्य प्रमेयत्वे

न व्याप्यभावावगाहित्वं पि व्याप्यभावत्वाप्रकारकत्वाद् दृष्टान्तासिद्धिवारणाय पद्भावावगाहिताप्रयुक्तत्वनिवेशो न सम्यक् । पक्षधर्मताविरहत्वेन
व्याप्यभावज्ञानमादाय तत्संभवात् । भ्रमान्यवृत्तित्वस्य पद्भावावगाहित्वनिवेशो गौरवात् । एतेन स्वप्रतिबंधकताप्रयोजकभ्रमान्यवृत्तिपद्भाव
विषयिताशालित्वमपि प्रयुक्तं किंतु तादृशपद्भावविषयिताघटितत्वं निश्चयत्वविशेषणं वाच्यं तत्र पद्भावानिवेशान्न द्विरोधो दुर्वार इति ।
न च पद्भावविषयितात्वावच्छिन्नप्रयोजकताकप्रतिबंधकताशालित्वं निश्चयविशेषणमिति न तद्विरोध इति वाच्यं । एवमपि संशये तद्वि
शेषणाप्रतिक्षेपप्रसक्तेर्यद्विशेषणं तन्नैव लाघवेन विषयिताशालित्वं निश्चयविशेषणमिति न तद्विरोध इति वाच्यं । एवमपि संशये तद्विशे
षणाप्रतिक्षेपप्रसक्तेर्यद्विशेषणं तन्नैव लाघवेन विषयिताया पद्भावीयनिवेशो नैवोपपत्तेः गुरुतरविपर्ययपदलवैयर्थ्यस्य दुर्वारत्वादिति
चेत्सत्यं । तथा सत्येव दीधितिटिप्पण्यां पद्भावावगाहिताप्रयुक्तत्वं न निवेश्यम् इति कंटतोऽभिधानस्वारस्यतोऽपि मिश्रटिप्पणीलिखितविशेष
णाप्रतिक्षेपलाभात् ॥ यद्रूपावच्छिन्नविषयिताघटितसंशयत्वोपादाने न निखिलदोषवारणात् । प्रकारांतरतया मिश्रटिप्पणीप्रदर्शितविशेषणाद्यरित्त
हेतुनिष्कर्षस्याविरोधादिति । वस्तुतस्तु व्याप्तिव्याप्यभेदोभयकोटिकसंशयवारणाय मुख्यविशेष्यतानिरूपितप्रकारीभूतांशे प्रतियोगितासंबंधेन तत्प्रका
रकत्वनिवेशे घटत्वेन व्याप्तिसंशयस्य तत्प्रकारकत्वात् तद्रूपावच्छिन्नप्रकारताकत्वं मिश्रटिप्पण्यामपि विवक्षणीयं । एवं च तत्र दर्शितविशेषणं व्यर्थमे
वेति । इदं पुनरिहावधेयं । संशये नेपसातविशेषणाप्रवेशाकस्येप्रतिबंधकतायां पद्भावावगाहिताप्रयुक्तत्वनिवेशेऽपि विपर्ययोपादानं सार्थकीकर्तुं

ग्राह्यत एव तथा हि व्यभिचाराभावकालीनत्ववद्धूमधर्मिकव्यभिचारसंशयप्रतिबध्येऽव्यभिचारनिश्चयेऽव्यभिचारवारणाय तत्सदनुपादाने ऽन्यथा
त्वप्रतिबंधकताप्रयोजकधर्मितावच्छेदकतारूपव्यभिचाराभावविषयिताघटिततया व्यभिचारवारणात् । न चैवमप्रमेयत्वादिना व्याप्यभावधर्मिता
वच्छेदककपक्षधर्मत्वाभावनिश्चयप्रतिबध्यतया दृष्टांतासिद्धिर्दुर्वारेति धर्मितावच्छेदकताव्याहततावगाहित्वाप्रयुक्तत्वस्य निवेश्यतया न तत्सार्थकमिति
वाच्यम् । अनुमितिसामान्यस्य दृष्टांतत्वासंभवेपि मुद्धूमत्वावच्छिन्नलिंगकानुमितेर्दृष्टांतत्वसंभवात् धर्मितावच्छेदकतान्यत्वरूपविशेषणस्यानावश्य
कतया तत्प्रयोजनसंगतेः । वस्तुतस्तु व्यभिचाराभाववान्नवेति संशयेऽव्यभिचाराभावाभाववत्त्वावच्छिन्नविषयितायाः प्रतिबंधकताप्रयोजकत्वे तदंतर्गतव्यभि
चाराभावविषयिताया अपि तथात्वात् तादृशसंशयप्रतिबध्येऽव्यभिचारनिश्चये व्यभिचारस्य वज्रलेपतया विपर्ययोपादानमावश्यकमिति । यत्तु व्यभिचारी
न वेति व्यभिचारतदभावकोटिकसंशयस्य हेतौ व्यभिचाराभाववत्ताप्रकारकतया संशयत्वघटकविषयिताप्रयुक्तत्वनिवेशपक्षेपि कथं विपर्ययपदोपादा
नव्यावृत्तिरिति तन्न । मुख्यविशेष्यतानिरूपितप्रकारीभूताभावांशे प्रतियोगितासंबंधेन तत्प्रकारकत्वस्योक्तत्वात् । न च व्यभिचारी न वेत्यादावव्यभिचार
मादाय संशयदलस्य तद्व्यतिरेकमादाय विपर्ययदलस्य च सत्त्वाद्व्यभिचारो दुर्वार इति मुख्यविशेष्यतानिरूपितप्रकारतायत्नपस्य दार्थे ग्राह्याभिन्नत्वनि
वेशं लाघवादिति विपर्ययपदं व्यर्थमिति वाच्यं । ग्राह्याभिन्नत्वस्य दूषितत्वात् । यत्तु व्याप्तिसंशयस्य व्यभिचारप्रकारकस्य यदभाववत्ताप्रकारकतया दृष्टां रा॰म॰
न्तासिद्धिरिति तत्तुच्छं । व्यभिचारस्याव्यभिचरितसाध्यसामानाधिकरण्यरूपव्याप्त्यभावात्मतया तस्य तत्कोटिकत्वासंभवात् । व्याप्तिपदं व्यापकसामाना १९

ल

धिकरणपदरूपव्याप्तिपदमिति तु केचित् । व्यभिचारी न चेति संशयपरस्तु नानुमितिप्रतिबंधकः किंतु व्याप्तिग्रह एवेति । वस्तुतस्तु व्यभिचारांशावगाहिताप्रयु
क्तानुमितिप्रतिबंधकतावतीतिदीधितिटिप्पणीलिखनात् तस्यानुमितिप्रतिबंधकत्वेपि न क्षतिः । दृष्टान्ते व्याप्तिपदस्य दर्शितव्याप्तिपरत्वेनादोषात्
। पक्षे संशयोपदर्शनावगाहिताप्रयुक्तप्रतिबंधकताशालिपदाभाववत्त्वप्रकारक एव पदव्यतिरेकनिश्चयपश्चयत्रप्रतिबंधक इति द्वितीयो हेतुः । पक्षे संश
यत्वव्यापकप्रतिबंधकताकत्वे सति स्वरूपजपदाभावावगाहिताप्रयुक्तप्रतिबंधकताशालिपदव्यतिरेकनिश्चयत्वव्यापकपदाभाववत्त्वप्रकारता
कत्वमर्थः ।। अत्रत्वप्रतिबंधकताप्रयोजकघटाभावावगाहिताघटितघटव्यतिरेकनिश्चयत्वव्यापकघटाभाववत्त्वप्रकारताके सिद्धिविधया घटव
त्ताज्ञानप्रतिबध्ये आनुमानिकघटवत्ताज्ञाने घटवत्तानिश्चयाजन्ये व्यभिचार इत्यतः संशयत्वघटितपक्षे संशयप्रतिबध्यत्वनिवेशः ।। निरुक्तप
दव्यतिरेकनिश्चयप्रतिबध्ये पटाभावनिश्चयात्मकघटवत्तासंशयप्रतिबध्यघटपटोभयसमूहालंबने घटवत्तानिश्चयाजन्ये व्यभिचार इत्यतः प
क्षे संशयत्वव्यापकप्रतिबंधकतानिवेशः । ननु संशयत्वावच्छिन्नत्वस्य प्रत्यक्षप्रयुक्तेः मिथत्वादिनाव्याप्तेः संशये प्रतिबंधकताभावात्तत्साधनाप्रसिद्धि
रतः पदरूपावच्छिन्नसंशयत्वं विवक्षितं । न चैवमपि व्याप्तित्वावच्छिन्नविषयताके घटत्वादिनाव्याप्तेः संशये प्रतिबंधकत्वाभावात्तद्दोषतादवस्थ्य
मिति वाच्यं । पदरूपावच्छिन्नप्रकारताघटितसंशयत्वनिवेशात् । यत्र विषयविशेषेत संशयोऽलीकस्तत्र सिद्धिविधया प्रतिबंधकत्वस्य पदरूपा
वच्छिन्नविषयकज्ञानत्वव्यापकत्वाद्व्यभिचारभयेन तादृशज्ञानत्वव्यापकत्वत्यागः । संशयत्वं च पदरूपावच्छिन्नाभाववत्प्रकारताशालिज्ञानत्वं ।

यद्रूपावच्छिन्नाभावप्रकारत्वं च यद्रूपावच्छिन्नप्रकारत्वानिरूपिताभावप्रकारत्वं तेन घटव्याप्युभयनिष्ठप्रकारताके घटत्वेन व्याप्यभावकोटिकसं-
शये प्रतिबंधकत्वाभावेपि न क्षतिः। तत्र पूर्वोक्तसंशयरूपे न यद्रूपावच्छिन्नप्रकारताविशिष्टत्वं अभावप्रकारताविशेषणं अन्यथा वह्न्यनुमितौ व्या-
प्तितदभावसमुच्चयस्याप्रतिबंधकत्वेपि न दोषः धूमालोकादिनानाधर्मिकव्याप्तिसंशयमादाय दोषः पूर्वोक्तरीत्या वारणीयः। विपर्ययदोषादानप्रयोज-
नं पूर्वोक्तमेव व्याप्तिग्रहे च व्याप्यभावत्वव्यभिचारत्वावच्छिन्नविषयकनिश्चयौ प्रतिबंधकाविति प्रकारताकत्वनियमानुधावनं प्रमेयवान्धूमः पक्षादृ-
त्तिरिति ज्ञाने यद्ग्रहवारणाय यदभावावगाहित्वाप्रयुक्तत्वं प्रयुक्तत्वं पूर्ववत्। स्वप्रतिबंधकताप्रयोजिकया भ्रमत्वाघटकविषयितया घटितत्वं वा निश्च-
यविशेषणत्वं नातः पक्षधर्मताविरहत्वेन व्याप्यभावावगाहिन्यनुमितिप्रतिबंधकनिश्चये व्याप्यभावत्वाप्रकारकत्वेपि दृष्टान्तासंगतिः। न च स्वप्रति-
बंधकताप्रयोजकभ्रमत्वाघटकयद्रूपावच्छिन्नाभावज्ञानत्वव्यापकप्रतिबंधकताकत्वमेवास्तु संशयेपि प्रतिबंधकतासत्त्वादिति वाच्यं। अव्यभि-
चारं पक्षदेनोपादाय व्यभिचारादिति। अथ घटपटोभयवत्तासमूहालंबने व्यभिचारः भूतलं पटाभाववद्घटवत्त्वेति संशयमादाय स्वप्रतिबंधकयत्सं-
शयत्वव्यापकयदभाववत्त्वप्रकारताकत्वस्य ज्ञानस्य प्रतिबंधकताप्रयोजकविषयताघटितसंशयत्वस्य व्याप्यत्वविवक्षणे च घटवत्ताज्ञानेपि तथात्वा-
न्नभेदेन विषयताभेदे मानाभावेन संशयत्वघटकघटाभावविषयितायाः प्रतिबंधकताप्रयोजकताया न च तादृशसंशयत्वस्य तादृशप्रकारताव्या-
प्यत्ववत्त्वप्रतिबंधकताव्याप्यत्वमपि विवक्षणीयं समूहालंबनात्मकघटवत्तासंशयस्याविरोधित्वान्न दोष इति वाच्यं। तथा सति मुख्यविशेष्यां-

शेषप्रकारीभूताभावांशे प्रतियोगितासंबंधेन यः प्रकारः तत्प्रकारकत्वावच्छिन्नप्रतिबंधकताव्याप्यत्वमेव विवक्षितं तथा च व्यभिचारत्वावच्छिन्नसंशयेतादृ
शप्रतिबंधकतासत्त्वेन विपर्ययपदस्यावश्यकत्वात् एवं च सर्वसंमतविभिन्नप्रतिबंधकतावतोः व्यभिचाराव्यभिचाराभावकोटिकाव्यभिचारसंशय
योः तथाविधाव्यभिचारत्वावच्छिन्नसंशयपक्षेपि तादृशप्रतिबंधकताविरहेणादोषादिति यदभावत्वप्रकारकतानैयत्यस्यैव पर्याप्तेः एवं व्यभिचारविषयक
संशयसामान्यप्रतिबंधेः व्यभिचारनिश्चये द्वितीयहेतोर्व्यभिचारः तत्र व्यभिचाराभावत्वप्रकारकतानियतव्यभिचाराभावावगाहिताप्रयुक्तप्रतिबंधकता
शालिनोः व्यभिचाराभावनिश्चयस्य सत्त्वात् प्रकारतावच्छेदकीभूतव्यभिचारविषयितायाः प्रतिबंधकताप्रयोजकत्वात् न च यद्रूपावच्छिन्नज्ञानसमानध
र्मितावच्छेदकत्वस्य प्रतिबंधकताप्रयोजकपदभावावगाहितायामेव विवक्षणीयं न तु निश्चय इति वाच्यं तथाप्यभावधर्मिकाव्यभिचारनिश्चये तद्दोषस
त्त्वात् प्रतियोगितासंबंधानवच्छिन्नत्वं तु न तद्विशेषणं यदभावत्वप्रकारकताव्याप्यपर्याप्तिकावगाहिताप्रयुक्तप्रतिबंधकताकत्वमात्रं निवेशनेवसंवे
सामंजस्ये निश्चयत्वेपर्याप्तिरिति चेत् अत्र नोक्तदोष इति दिक् । यदभावत्वप्रकारकज्ञाननिष्ठयदभावावगाहिताप्रयुक्तप्रतिबंधकताकान्यत्वे सतिय
त्संशयव्यतिरिक्तनिश्चयसामान्यप्रतिबध्यत्वं हेतुरिति । व्याप्त्याभावनिश्चयप्रतिबध्येव्याप्त्यज्ञानाजन्ये विशिष्टज्ञानमात्रे व्यभिचारात् अतः संशयपदं । एककोट्या
व्याप्त्याभावनिश्चयात्मकान्यकोट्या व्याप्तिसंशयप्रतिबध्येव्याप्त्याद्युदयसमूहालंबने व्यभिचारात् तत्र सामान्यपदं । अव्यभिचारं निश्चयं पर्याप्तौ तु ज्ञाने व्यभिचारसा
मान्यप्रतिबध्ये अव्यभिचारविषयकघटाभावज्ञानप्रतिबध्ये तथा व्यभिचारात् तत्र सामान्यपदं । अव्यभिचारसंशयव्यभिचारनिश्चयोभयप्रतिबध्ये

ग०टी०
२१
21

।व्यभिचारनिश्चयाजन्ये तत्र व्यभिचार इत्यतः सत्यं तं। तथा चाव्यभिचाराभावत्वानवच्छिन्नव्यभिचारविषयिताप्रयुक्तप्रतिबंधकताकतया न व्यभिचारः
।प्रमेयवान् धूमः पक्षावृत्तिरिति ज्ञानमादाय साधनाप्रसिद्धिरतः प्रयुक्तत्वं तत्स्वत्वप्रयोजकधर्मत्वाद्घटकपदभावविषयिताकत्वं तेन पक्षधर्मताविरहत्वे
न व्याप्यभावावगाहि ज्ञानमादाय न दोषः। न च बह्नित्वेन व्याप्तेः संशये घटत्वेन व्याप्तेरभावनिश्चये च प्रतिबंधकत्वाभावाद् दृष्टांतासिद्धिरिति वाच्यं यद्विष
यिताद्यरितसंशयत्वनिश्चयत्वयोर्निवेशात् व्यभिचारसंशयमात्रप्रतिबध्यव्याप्तिनिश्चयस्य व्यभिचाराभावत्वानवच्छिन्नव्यभिचाराभावविषयिता
प्रयुक्तप्रतिबंधताकान्यत्वं प्रतिबंधकतायां व्यभिचाराभावविषयिताप्रयुक्तत्वाभावादेवाक्षतमिति विपर्ययपदोपादानसार्थक्यां तद्भावव्यक्तित्वावच्छि
न्नाभाववत्तानप्रतिबंधकतायामेव व्यभिचाराभावत्वानवच्छिन्नतदभावविषयताप्रयुक्तत्वं प्रसिद्धं यदि चाभावस्य तद्व्यक्तित्वेन हेतुतापाद्य तानि दृष्टप्रति
बंधकतायां विषयतयाऽवच्छेदकताभिन्नानुमन्यते न दा स्वप्रतिबंधकतानवच्छेदकपदभावत्वानवच्छिन्नपदभावविषयतासामान्यकत्वे सतीति वक्तव्यं
अव्यभिचाराभावत्वानवच्छिन्नव्यभिचारत्वाद्यवच्छिन्नव्यभिचाररूपाव्यभिचाराभावविषयतासामान्यस्य प्रतिबंधकतावच्छेदकत्वाद्व्यभिचारस्युदासः।
सामान्यपदमप्येतदर्थमेव अन्यथा मेयत्वादिना तद्विषयिताया अपि व्याप्तिग्रहप्रतिबंधकतानवच्छेदकत्वेन व्यभिचारःस्यात् व्याप्यभाववत्तावच्छिन्नव्या
प्यभावविषयतायाः सामान्यांतर्गताया अनुमितिप्रतिबंधकतावच्छेदकत्वाद् दृष्टांतासिद्धिस्तोऽनवच्छिन्नांतं। न च व्यभिचारत्वावच्छिन्नव्याप्यभावविषय रा०म०
ताया स्तथाविधाया अवच्छेदकतया दृष्टांतासिद्धिरिति शंक्यं। व्यभिचारत्वस्य व्याप्यभावाघटितत्वात्। तादृशीं च तद्व्यक्तित्वाद्यवच्छिन्नव्याप्यभावविषयते २१

वसाधनावच्छेदिके ति। अत्र पक्षधर्मताविरहत्वेन व्याप्यभावविषयतायाः सामान्यान्तर्गततया अनुमितिप्रतिबंधकतावच्छेदकतया दृष्टान्तासिद्धिरितो
भ्रमत्वाघटकत्वेन यद्भावविषयितोपादेया। एवं च व्यभिचारत्वावच्छिन्नव्याप्यभावविषयिताया भ्रमत्वघटकतयानुमितिप्रतिबंधकतावच्छेदकत्वेपि न
दृष्टान्तासिद्धिः। एवं च तद्व्यक्तित्वाद्यवच्छिन्नघटाभावादिविषयितासामान्यस्य प्रतिबंधकतानवच्छेदकत्वात् संशयविपर्यययोरुपादानमावश्यकं। अत्र
त्रेदमाशंक्यते एवं सति पक्षसंशयप्रतिबध्यत्वं व्यर्थं स्यात्। घटवज्ज्ञानं घटाभावनिश्चयस्य अभावो घटीयो भूतलमभाववज्जेत्यादिज्ञानसाधारणेनैव प्रति
बंधकतया घटाभाववत्तानवच्छिन्नघटाभावविषयिताया अवच्छेदकत्वेनैव व्यभिचारवारणसंभवात्। प्रतिबंधकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वप्रवे
शपतदुपादानस्य पक्षालनादीतिस्थापकवलिनत्वात्। किंच घटवज्ज्ञाने घटवद्वृत्तित्वेन घटाभावविषयकस्य घटवद्वृत्तिमानिति ग्रहस्यापि विरो
धितया पदभाववत्तानवच्छिन्नघटाभावविषयितायाः सामान्यान्तर्गततायाः प्रतिबंधकतावच्छेदकतया व्यभिचार एव न प्रसज्यते। यदि चोक्तप्रणाल्या प्र
तिबंधकतायां तदवच्छेदकविषयतायां वा भ्रमावृत्तित्वं भ्रमान्यवृत्तित्वं वा निवेश्यं तथा च घटवत्ताप्रमायां व्यभिचारः तत्र घटवद्वृत्तित्वविशिष्टज्ञा
नस्य भ्रमतया तादृशाभावविषयिताया भ्रमावृत्तित्वाघटसंभवेन सामान्यानन्तर्गततया सत्वं तार्थस्वात् तादृशप्रतिबंधकतावां ततः कामिनीजिज्ञासा
दैमुलमेति संशयपदमावश्यकमित्युच्यते तदा व्यभिचारप्रमायां व्यभिचारो दुर्वारः। एवं अव्यभिचाराभाववत्तानवच्छिन्नव्यभिचारविषयत्वस्य भ्र
ममात्रवृत्तिप्रतिबंधकतावच्छेदकत्वात् भ्रमावृत्तेस्तस्य तदनवच्छेदकत्वात्। न च यद्भावविषयिताशब्देन पदीयप्रतियोगितावच्छेदकावच्छि

न्नविषयिताविवक्षिता। घटवद्भूतलत्वं च न घटप्रतियोगितावच्छेदकमिति संशयपदोपादानमिति वाच्यं। व्याप्यभावत्वानवच्छिन्नतादृशविषयि
त्वाप्रसिद्धेरुद्देश्यतासिद्धेः। न चाधेयत्वाभावत्वस्य व्यभिचरितसाध्यसामानाधिकरण्यरूपव्याप्तिप्रतियोगितावच्छेदकतया तदवच्छिन्नविषयितामादाय
नदृष्टांतासिद्धिरिति वाच्यं। तथा सति घटवद्वृत्तिद्रव्याभाववानिति ज्ञाने घटनिरूपितप्रतियोगितावच्छेदकीभूतद्रव्याभावत्वावच्छिन्नघटाभावत्वान
वच्छिन्नविषयितायाः सामान्यांतर्गततयाः घटवज्ज्ञानप्रतिबंधकतावच्छेदकत्वेन संशयपदवैयर्थ्यस्य दुर्वारत्वात्। अथ विषयितायां तद्वद्वृत्तित्वान
च्छिन्नत्वप्रवेशे संशयपदसार्थक्यं वक्तव्यं न च प्रक्षालनाद्धीति न्यायप्रसंगः। व्याप्तिमद्वृत्तिमानिति ज्ञानीयायाः सामान्यांतर्गतव्याप्यभावत्वानवच्छि
न्नव्याप्तिमद्वृत्तित्वानवच्छिन्नव्याप्यभाववविषयितायाप्रतियोगितावच्छेदकतया दृष्टांतासिद्धेर्वारणाय तद्वद्वृत्तित्वानवच्छिन्नत्वस्यावश्यकत्वादिति चे
न्न। व्याप्तिमद्वृत्तिधर्मवत्ताज्ञानस्यानुमितिप्रतिबंधकत्वे मानाभावात्। अन्यथा तद्वद्वृत्तित्वानवच्छिन्नत्वोक्तावपि साध्यसामानाधिकरण्यरूपवद्वृत्तिधर्मव
त्ताज्ञानस्यापि तथात्वापत्त्या व्याप्यभाववद्व्याप्तिमद्वृत्तित्वोभयानवच्छिन्नतद्विषयतायाः प्रतिबंधकतावच्छेदकत्वेन दृष्टांतासिद्धितादवस्थ्यात्। वस्तुतस्तु
अव्यभिचारप्रमायां व्यभिचारप्रमात्वाप्रमावृत्तित्वसाधारण्यासंभवो तद्घटकपदार्थयोर्वा भ्रमात्मकव्याप्यभाववत्ताज्ञानस्य व्याप्यभावत्वानवच्छिन्नस्वप्र
तिबंधकतावच्छेदकविषयिताकतया दृष्टांतासिद्धिर्दुर्वारैवेति। अत्रेदं समाधानं स्वप्रतिबंधकतानवच्छेदकयद्भिन्ननिरूपितप्रतियोगितावच्छेदकान
वच्छिन्नयदभावत्वानवच्छिन्नयदभावविषयतासामान्यकत्वं स संतार्थः। तद्धत्वभाववानिति ज्ञानीयघटाभावविषयितायाः घटाभावत्वानवच्छि

त्रघटस्य निरूपितप्रतियोगिताऽनवच्छेदकतद्व्यक्तित्वावच्छिन्नाभावत्वावच्छिन्नत्वप्रसिद्धेस्संशयपदमर्थवत्। व्याप्तिमदवृत्तिधर्मवत्ताज्ञानस्य
प्रतिबंधकत्वोपगमेन दृष्टांतासिद्धिवारणाय यद्विन्नेत्यादिनिवेशः। यदभाववत्तानवच्छिन्नत्वं यदभाववत्त्वविषयितानिरूपितत्वं भ्रमप्रमासाधारणा
यद्भाववत्त्वविषयितात्वेनवास्तवयदभावविषयतायानिरूपकत्वमानदोष इति दिक्। पूर्वोक्तभ्रमत्वाघटकत्वं भ्रमत्वघटकविशेष्यतान्यत्वं तेना
व्यभिचारप्रमायां न व्यभिचारः नच यद्व्यतिरेकनिश्चयप्रतिबध्यत्वप्रवेशे दृष्टांतासिद्धिः व्याप्तिनिश्चयत्वेन हेतुत्वमते व्याप्तिव्यतिरेकज्ञानाभावस्या
हेतुत्वात्। अन्यथा व्यभिचारग्रहाभाववहेतुतानिराकरणानुपपत्तेरितिवाच्यं। तद्दले प्रयोजकीभूताभावप्रतियोगित्वरूपप्रतिबंधकत्वनिवेशनात्।
नच व्याप्तिव्यतिरेकज्ञानाभावस्य व्याप्तिनिश्चयहेतुत्वेनानुमितिप्रयोजकत्वं दुर्लभं व्याप्तिसंशयं स्वग्राह्यसंशयत्वेन व्याप्तिनिश्चयएव विरोधि
त्वादिति वाच्यं। प्रयोजकत्वं हि कारणतावच्छेदकत्वं तच्च व्याप्त्यभावभेदस्यानुमितिजनकतावच्छेदकतयाऽक्षतमिति। एतेन प्रयोजकत्वं नियतपू
र्ववर्त्तित्वमित्यपास्तं। व्याप्तिसंशयानंतरक्षणोत्पन्नव्याप्तिस्मरणात्मकनिश्चयजन्यानुमितौ पूर्वक्षणे तत्संशयाभावासत्त्वेन तस्यनियतपूर्ववर्त्तित्वा
भावादिति। अत्र प्रवृत्तेः प्रामाण्यनिश्चयजन्यत्वे बाधः। भाविज्ञानादौ प्रामाण्यनिश्चयेप्यप्रवृत्तेरित्यालोच्य विषयतासंबंधेन प्रामाण्यनिश्चयवि
शिष्टार्थतानत्वेनैव हेतुता एवं च स्वसमानाधिकरणप्रामाण्यनिश्चयानधिकरणक्षणानंतरक्षणोत्पन्नत्वं साध्यं। अत्र प्रामाण्यनिश्चयपदं शा
पामपि तदभावसामान्यावच्छेदेन सत्त्वेपि ईश्वरीयप्रामाण्यनिश्चयस्य नित्यतया प्रामाण्यनिश्चयसामान्यानधिकरणक्षणाप्रसिद्धावपि प्रामा

ग॰टी॰
२३
27

रापनिश्चयनाशेऽपिप्रवृत्तिस्थितावपिनक्षतिरितिभावः। मणिमंत्रादिनान्यायेनव्यभिचारांतरमथहस्यप्रतिबंधकत्वमनंगीकुर्वतामाशयसंशया
प्रतिबंधकत्ववादिनां दीधितिकृतां यथाश्रुतमेवव्यतिरेकज्ञानत्वव्यापकत्वनिवेशनं (प्रतीयमितिच्छत बुद्ध्यो विदांकुर्वंतु। व्याप्तिप्रकारत्वस्याग्रे
वीजं। तदाह प्रकृते इति। इतरकारणासत्त्वे इति न्याये नव्याप्यमेदज्ञानस्यकारणीभूताभावप्रतियोगित्वरूपप्रतिबंधकताया अत्वात्तद्रूपासिद्धिः। व्या
प्यमेदज्ञानप्रतिबध्यत्वस्य तदभेदज्ञाने संभवात्प्रसाधनाप्रसिद्धिः। सा च प्रतिबंधकत्वांतःप्रवेशघटकत्वेनेत्यर्थः। पूर्वं रथ। व्याप्तिनिश्चयोगाच्च
इतिपूर्वग्रंथेन। गौरवमिति। व्यतिरेकज्ञानत्वेन प्रतिबंधकत्वेव्याप्याभेदाभाववद्वह्निरोधकत्वावच्छिन्नव्याप्यमेदप्रकारकत्वाभावाप्रकारकत्वेस
ति तादृशप्रकारकत्वप्रकारकत्वरूपनिश्चयत्वघटकसत्त्वेन गौरवमित्यर्थः। व्याप्यमेदाप्रकारकत्वे सतिव्याप्याभेदप्रकारकत्वरूपनिश्चयत्वघटकसं
त्वं तस्य लघुत्वादिति। कल्पनेति। परामर्शहेतुतया तदावश्यकत्वादिति मूले नियतपूर्वभावित्वस्योक्तत्वादिति भावः। व्याप्तिप्रकारत्वेति। कारणताव्यव
स्थापनपरत्वे तु अवच्छेदकलाघवस्यकल्पनालाघवेनबाधादेवनकारणतासिद्धिरितिभावः। कार्यानुत्पत्तिनैयत्यस्यप्रतिबंधकत्वशब्दार्थत्वेन
व्याप्यमेदज्ञानमितिनजत्वयोः संभवतीत्यत आह। एवं चेति। तथा च व्याप्यमेदज्ञानस्यफलानुत्पत्तिनिर्वाहकं कारणीभूताभावप्रतियोगित्वं नो
च्यते व्याप्यमेदज्ञानाभावस्यकारणत्वं नोच्यते इति मूलार्थः। प्रागुक्तत्वात्। अनुपदमेव विशेषदर्शनात् धूमे व्याप्यमेदज्ञानमितिपूर्वमुक्तत्वात्। मू राम॰
ले इयं धूमव्यक्तिः पर्वतीयधूमः। यद्यपि तस्य पर्वतीयइत्यर्थः तथा च धूमत्वरूपव्याप्यवर्त्तिकप्रकारकदर्शने इत्यर्थः संभवतीति धर्मितावच्छेदकता २३

यासुरसोनेत्यर्थोनावश्यकत्तयाप्यग्रेव्यक्तीभविष्यतीतिपंक्तिदर्शनात्तथैवार्थइत्याहदीधितीति।मूलेनुमितिसत्त्वादेवेतितत्रानुमितेरेवेत्यापत्तेरित्यर्थः
।अन्यथाग्राह्याभाववज्ज्ञानस्यप्रतिबंधकत्वानुपगमे।पक्षनिष्ठेति।उद्देश्यतासंबंधेनवन्ह्यनुमितौविशेष्यतासंबंधावच्छिन्नतादृशाभेदाग्रहविशिष्टनिष्ठवि
षयतावच्छेदकतासंबंधेनतादृश[illegible]व्याप्योपस्थितिविशिष्टोपस्थितेरित्यर्थः।कृदृष्टान्तिधूमेतादृशाभेदाग्रहस्यहेतुत्वेपिनतादृशधूमे
तादृशभेदग्रहरूपान्यथाख्यातिः।किंतुज्ञानद्वयं।एवंकृदेधूमइत्यपिज्ञानद्वयंविभिन्नज्ञानीयविषयतयोर्निरूप्यनिरूपकभावोपगमात्तादृशधूमनि
ष्ठविषयतावच्छेदकतासिद्धिः।भेदग्रहाभावस्यकारणत्वेयुक्तिमाह इतरेतिए तन्मतेपरामर्शस्याहेतुत्वादितिबोध्यं।नन्वभेदनिश्चयस्यकारणत्वम
वच्छेदकत्वलाघवात्साक्षाधितमपेक्षेसतःकल्पनालाघवमाह मूलेपरामर्शेति।युक्त्यंतरमाहअतएव।व्याप्याभेदनिश्चयमपेक्ष्यभेदग्रहाभावस्यकारण
त्वादेव।असन्निकृष्टेतिधूमासन्निकर्षदशायांनतत्र चाक्षुषादिविशिष्टपरामर्शः।नापिमानसः उपनायकत्वानस्यप्रमाणांतरत्वापत्तेः।अततत्तदनुमिस्व
तुरोधेनभेदाग्रहएवकारणतयोपेयइतिभावः।यदपेक्षयागौरवंतदनुपस्थितेगौरवाग्रहइत्याहतदेति असन्निकृष्टलिंगकस्थलेतदनुपस्थितिर्बोध्या।
व्यापत्तीति।अनुमितिर्यद्यभेदतानाजन्यास्यात्तदाभेदग्रहाप्रतिबध्यास्यादित्यापत्तीत्यर्थः।गोपदेति अविशेषितएवेत्यादिः।संभवेपीति।इंद्रियादावपिइं
द्रियत्वादिनागोपदशक्यतासत्वात्।साक्षादितिसाक्षाद्वहतिद्रव्यत्वादेर्व्यभिचारितयागोपदशक्यतावच्छेदकत्वनिवेशः।अक्तेरितिमूलं।अत्रहेतुमाह नही
ति।नन्वाधेयतासंबंधेनव्यक्तेःप्रकारत्वेसास्नादिसाधकेतद्विशिष्टद्रव्यत्वादिकमादायव्यभिचारः।विशेषरूपेणागोत्वनिष्ठाधेयतात्वेनसंबंधतायांचनमा

ग॰टी॰ नमित्यत आह। ग॰ आधेयतयेति। सत्तो व्याप्यवृत्ते स्वविशेष्यकेत्यभेदानुमितौ निर्विशेषितेऽपि तादात्म्येन लिंगत्वाहे। विशिष्टंतित्वि। गोरूपादौ द्रव्यत्वादौ च व्यभि
२४ चारवारणाय सकलगोवृत्तित्वगवेतरासमवेतत्वयोरव्यापकत्वादिति भावः। अनतिप्रसक्तत्वेति। गवेतरासमवेतत्वमात्रस्य समवायसंबंधेन वृत्तिमद्वृत्ति
25 त्वप्राप्तेरिति प्रसक्तत्वासमवेतत्वनिवेश इत्यर्थः। व्यापकसामानाधिकरण्यस्य प्राप्तं ते व्याप्तित्वाभावास्य दिग्भागः। दृष्टांतविधामज्ञानं तं मतमाहयत्विति। इदं
त्वावच्छिन्ने धूमत्वसंदेहे स धूमत्वावच्छेदेन पक्षधर्मता निश्चयाविरोधित्वान्मूलासंगतिमाशंक्य व्याचष्टे पर्वतवृत्तिरिति। तत्संशयत्वेति। ननु धूमभेदभाने
धूमत्वभानावश्यकत्वेऽपि धूमत्वादौ धूमभेदविरोधभाने तद्धर्मितावच्छेदकतया धूमत्वत्वभानमावश्यकमिति चेत्। अत्राहुः संशये कोट्योः परस्परविरोधभा
नेमानाभावः तथा च धूमभेदादौ धूमाद्यवृत्तित्वरूपधूमत्वविरोधभाने नैव स्वरूपतो धूमत्वकोटित्वात् अथवा स्वरूपतो भासमानधूमत्वावच्छेदेन धूमभेदाभावभा
नस्य धूमत्वादौ धूमादिभेदतादात्म्येन धूमत्वत्वादिभानाविषयमाच्च परस्परविरोधभानमिति। अन्यथा धूमत्वं धूमभेदाविरुद्धमिति ग्रहेऽपि तादृशसंशयापत्तेः
। तथा च धूमत्वत्वे नैव धूमत्वकोटित्वमावश्यकं। केचित्तु मूले यमिति यथाश्रुतं उभयथापि वह्निव्याप्य इति साध्यसंबंधितावच्छेदकरूपात्मकव्याप्तिनिश्चयः धू
मत्वादेर्विशिष्टसंदेहेऽपि संभवति व्याप्तिवादे दीधितिकृता तथैवाभिधानात्। न चेति। तथा च व्याप्यतावच्छेदकप्रकारकव्याप्तिनिश्चयस्य व्यभिचारः। तस्य
व्याप्यांशे तदप्रकारकत्वादिति भावः। न च धूमत्वावच्छिन्नलिंगकानुमितिं प्रति धूमत्वावच्छेदेन व्याप्तिनिश्चयत्वेन हेतुत्वे प्रकृतानुमितेर्व्याप्यतावच्छेदकाप्रका राम॰
रकव्याप्तिज्ञानजन्यतया धूमत्वावच्छिन्नलिंगकत्वात्तत्र व्यभिचार इति वाच्यं। आलोकत्वाद्यनवच्छिन्नलिंगकपर्वतपक्षकवह्निसाध्यकानुमितिं प्रत्येव धूमत्वा २४

वच्छेदेन व्याप्तिनिश्चयः कारणमित्याशयात् विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकतानियमस्यैव नाव्यभिचारस्योक्तत्वादि
त्याकुत्तरदत्तम् । यत्र धूमत्वेन व्याप्तिनिश्चयो प्रामाण्यज्ञानास्कंदितः आलोकत्वेन व्याप्तिनिश्चयश्च तत्रानुमितेरालोकत्वानवच्छिन्नलिंगकतया व्य
भिचारेणोक्तकार्यकारणभावासंगतेः । न चालोकत्वाद्यवच्छिन्नलिंगकान्यत्वं विवक्षितं । यत्र धूमत्वेन व्याप्तिनिश्चयः आलोकत्वेन व्याप्तिनिश्चयो
ऽप्रामाण्यज्ञानास्कंदितः तत्र जातदनुमितेः धूमत्वेन व्याप्तिनिश्चयकार्यत्वानुपपत्तेः । न चाप्रामाण्यज्ञानाभावविशिष्टालोकत्वादिप्रकारकव्याप्तिनिश्च
यान्यतरत्वं विवक्षितं यत्र धूमत्वेनालोकत्वेन च व्याप्तिनिश्चयः सिद्धिधूमलिंगकेच्छोभयं च तत्रानुमित्यनुपपत्तेः आलोकत्वेन व्याप्तिनिश्चयस
हकारिणः पक्षताया अभावात् पक्षतासहकारिणः परामर्शस्य तादृशानुमितिजनने ऽयोग्यत्वात् । वस्तुतस्तु अयं धूमो नवेसाद्येकसंशयप्रदर्श
नेनैव निर्वाहे आलोकत्वसंदेहप्रदर्शनं आलोकत्वप्रकारकव्याप्तिनिश्चयस्यापि व्यभिचारप्रदर्शनार्थं तथा च धूमत्वाद्यनवच्छिन्नधूमलिंगकता
दृशानुमितावालोकत्वप्रकारकव्याप्तिनिश्चयत्वेन हेतुत्वं वाच्यं तन्नोक्तप्रणाल्याऽप्रामाण्यज्ञानाभावविशिष्टधूमत्वादिप्रकारकव्याप्तिनिश्चयेनुकंरत्वघटि यानुगत
तमेव जन्यतावच्छेदकं भवेत् तथा च धूमत्वेनालोकत्वेन च व्याप्तिनिश्चयोत्पन्नानुमितेः कस्यापि तादृशप्रकारकव्याप्तिनिश्चयकार्यत्वानुपपत्तिः । एतेन
प्रभाकरमते पक्षताया अहेतुत्वाद्दोषोद्धार इति निरस्तं । वस्तुतस्तु भवदुक्तरीत्या द्वितीयोऽपि न व्यभिचारः एत उभयथेत्यादिग्रंथो न व्याप्यतावच्छेदक
प्रकारकव्याप्तिनिश्चयव्यभिचारप्रदर्शकः न्यायमते तन्नानुमित्युपपादकासत्त्वेन तदपकर्षेऽपि इष्टापत्तेः सुकरत्वात् अतो न्यायमतसिद्धानुमितिकार

ग॰दी॰
२५
25

णासम्भावप्रतीतेर्वाच्यः तत्र च पक्षवृत्त्यर्थकमप्रयोजकं वर्तते अन्यथा परामर्शस्य प्रकारस्य पर्यवसानापत्तेः। तथा च व्याप्यतावच्छेदकपक्षधर्मनिश्च
यव्यभिचारप्रदर्शक एवेत्यभिप्रेत्याह उभयथापीति अवधारणात् लाभार्थं साध्याभाववद्वृत्तित्वं व्याप्तिः। परामर्शविषयमुख्यमेव वा तेन व्या
पकसामानाधिकरण्यपरत्वमपेक्षितं तावच्छेदकघटितत्वेऽपि न क्षतिः। धूमत्वविशिष्टज्ञानादृशसामानाधिकरण्यं वा व्याप्तिः। अथैवमपि पर्वती
यत्वविशिष्टे धूमत्वसंदेहे वह्न्याप्त्या विशिष्टधूमत्वनिर्णयो न जायते न त्वनुमितिजनकतया भिमतः निर्णयः असमानधर्मितावच्छेदकतात्पर्या
त्याभावानवगाहित्वाच्चेति न तथाविधसंशयदशायामनुमित्यनुपपत्तिः। एवमुभयव्यापि वह्निव्याप्यइत्यस्य संगतं इदं पदार्थपर्वतवृत्तिविशिष्टे व्याप्ति
निश्चयस्य मापमतेऽनुमितिजनकत्वात् तथाभिधानेन तत्र तन्निर्वाहासंभवात् तस्याप्यनुमितिहेतुत्वोपगमे उपसंहारग्रंथे व्याप्तिविशिष्टपक्षवैशि
ष्ट्यज्ञानस्य हेतुत्वाभिधानविरोधात्। मैवं। पक्षमुख्यविशेष्यक एव परामर्शोऽनुमितिहेतुरिति मते पक्षवृत्तित्वविशिष्टे धूमत्वसंदेहे पक्षे धूमत्वविशि
ष्टसंशये सोचित्यावर्जित तया पक्षांशे व्याप्यतावच्छेदकविशिष्टवैशिष्ट्यनिर्णयासंभवइति न संगतेः। एवं पक्षवृत्तित्वावच्छिन्नेव्याप्यभावादिरू
पविशेषणासंदेहे पक्षे व्याप्तिविशिष्टसंदेह औचित्यावर्जितइति पक्षांशे व्याप्यत्वविशिष्टवैशिष्ट्यनिर्णयासंभवइति तादृशसंशयविरोधिव्याप्ति
निश्चयाभिधानसंगतेः। वस्तुतस्तु पक्षवृत्तिर्धूमो न वेति संशयस्य पक्षवृत्तित्वविशिष्टे धूमत्वनिश्चयइव धूमत्वविशिष्टे पक्षवृत्तित्वनिश्चयेऽपि विरो
धित्वमावश्यकं। धूमतावच्छेदेन पक्षावृत्तित्वस्य पक्षवृत्तितावच्छेदेन धूमभेदनिर्वाहस्येतया तदवच्छेदेन धूमभेदसंशयाद्धूमतावच्छेदेन पक्षावृ रा॰म॰ २५

त्तित्वसंशयस्यैवैतिसावर्जितत्वात्। एवं पक्षवृत्तित्वविशिष्टव्याप्तिनिश्चयः व्याप्तिविशिष्टपक्षवृत्तित्वनिश्चयं प्रति व्याप्तिविशिष्टपक्षवृत्तित्वसं
शयापकपक्षवृत्तित्वावच्छिन्नधर्मिकव्याप्त्यभावसंशयविरोधितयोपयुज्यत इति धूमत्वादिसंशयव्याप्तिनिश्चयाभिधानसंगतिः। मणिकृतां तु
उक्तानुपपत्तिशंकाकुलतया पुरोवृत्तिधूमादिः पक्षः व्याप्तिसंबंधेन वह्निः साध्यः तादात्म्यसंबंधेन धूमो हेतुरित्याभिमतः एवं च धूमत्वरूपव्याप्यता
वच्छेदकावच्छिन्नस्य पक्षे संशय उक्तस्तथा च वह्निव्याप्यत्वेन धूमस्य तादात्म्यसंबंधेन पक्षे निश्चयादनुमितिस्तु स्यात्तत्र व्याप्यतावच्छेदकप्रकारकपक्षध
र्मज्ञानस्य व्यभिचारप्रदर्शकं मूलमिति पुनः प्रसिद्धस्थले पर्वते धूमत्वावच्छिन्नवत्तासंशयस्थलीयव्याप्तिविशिष्टवज्ज्ञाननिश्चयजन्यानुमितौ व्याप्यतावच्छे
दकप्रकारकपक्षधर्मतानिश्चयव्यभिचारोपेक्षाबीजं किं ज्ञानं तीत्यभिप्रायेणाशंक्य तिष्ठत्र वह्नेरिति। अत एवेति एतेन पुरुषत्विस्यादिमूलमवतारितं।
।धूमेत्येतो ति अन्यतरस्मिन् व्याप्त्यभावस्य पूर्वमकथनात्। गौरवादेर्व्याप्यतानवच्छेदकत्वबीजस्य कथनाच्च भ्रम उक्तः। व्यभिचाराभावेनेति मूलं व्यभिचारस्
पहेतोः स्वरूपासिद्ध्यापर्वतवृत्तीतिज्ञानादनुमित्यापत्तेः। उक्तं गौरवादिना। धूमालोकयोः पृथक् व्याप्तितः अन्यतरत्वेन व्याप्ते स्यात्तेन तत्र न्यूनवृत्ते धूमत्वाद
रनवच्छेदकत्वादनापत्त्या अन्यतरत्वस्य व्याप्यतावच्छेदकत्वं दुर्वारमित्याशंकायां भावं प्रकाशयति ग अन्यतरेति तत्त्वं धूमालोकभिन्नभेदत्वं ननु तादृशभेदे
वह्निव्याप्तिव्याप्यसत्त्वेनानुमित्यभावप्रयोजकं अकारणविरहत्वादिसत्त्व आह व्याप्तीति। प्रकृतोपयोगं सूत्रादर्शयति वह्निव्याप्तीति। मूले प्रसक्तं चक्षुरादि। तत्र
धूमालोकान्यतरस्मिन्। व्याप्यत्वज्ञानं वह्निव्याप्यत्वज्ञानं। इंद्रियसन्निकर्षो विशेष्यांशे लौकिकत्वे विशेषदर्शनं विपरीतज्ञाने तत्प्रसक्तेऽउपयुज्यते। स

ग॰टी॰ २६ 26 त्वात्संभवात्। प्रसक्तेः। वह्निव्याप्यत्वप्रसक्तेः। सहकारिप्रसक्तसहकारिणुरूपतया विषयतासंबंधेन ज्ञाननिष्ठप्रसक्तसकारणतानवच्छेदकत्वादिति भा
वः। प्रत्यक्षसहकारित्वात्प्रत्यक्षोपयोगित्वात्। न तु तद्व्याप्यत्वज्ञानत्वेन हेतुतेति भावः। तत्रायमालोको धूमो वेति शंकात्मकपरामर्शस्थले व्याप्य
ताज्ञानोपक्षीणं पक्षे वह्निव्याप्यत्वविशिष्टहेतुप्रसक्तोपयुक्तं तथा च प्रसक्तात्मकपरामर्शस्थलेऽभिचार इति भावः। दी॰ उपयुज्यत इति विशेषदर्शन
स्य स्वमतेऽकारणत्वात्। ग॰ व्याख्येति। व्याख्येयो वह्निव्याप्यताभावः। तद्विरोधित्वं तदभावावच्छेदकत्वं तदधिकरणवृत्तित्वं वा। तत्स्वस्येति। अन्यतरत्व
त्वस्येत्यर्थः। दीधितौ अवच्छेदकः स्वरूपसंबंधरूपावच्छेदकताश्रयः अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वाश्रयो वा। केचित्तु व्याप्यतावच्छेदकप्रका
रकपक्षधर्मताज्ञानविशिष्टस्य व्याप्यतावच्छेदकवृत्तिव्याप्यभेदाग्रहस्य हेतुत्वेऽन्यथाख्यात्यापत्तिवारणासंभवादाह अस्तु वेति। ग्रहोऽपीति विशे
षदर्शननिर्वाहाय। तथा च तद्दशायां तथाविधभेदाग्रह इति भावः इति दीधितिमवतारयंति प्राञ्चः। अत एव धूमो वह्निव्याप्यवान् धूमो वह्निमानि
ति ग्रंथेन। अयोग्यादिमूलेऽति। व्याप्तिमद्व्यापकवह्निसामानाधिकरण्यं व्याप्तिः तस्याः धूमव्यापकवह्निसामानाधिकरण्याद्वृत्तिधूमत्वालोकव्यापक
वह्निसमानाधिकरणवृत्तित्वालोकत्वादिप्रत्येकं न्यूनवृत्तित्वावच्छेदकत्वादतो व्याप्तित्वं तदनुगमकमुपेत्य व्याप्तित्वेनावच्छेदकत्वं तत्रासामुपेयं। त ॥ राम॰ २६
त्राभेदेनावच्छेद्यावच्छेदकभावभंगशंकावारणाय योग्यादिमूलं। धूमत्वादेराश्रयः प्रत्येकं धूमादिः महाव्याप्तेस्तु धूमालोकादिः सकल एवेत्या
श्रयभेदः। तादृशधूमत्वादिरूपव्याप्तेः प्रत्येकधूमत्वादिः। महाव्याप्तेस्तु व्याप्यत्वमिति अवच्छेदकभेदः। कल्प्यत इतीति। अतींद्रियादिहेतुके व्याय

मतेकारणांशकल्प्यं। शाब्दपरामर्शेतु मीमांसकमतेतत्कल्प्यमित्यविशेषः। निर्भर इति तथा च लघुगुरुरूपाभ्यां युगपदुपस्थितावित्यग्रिमग्रंथोपि न स्वमंत्रपु
क्तिपद्धर्मीकः इत्यनेन तेन पौनरुक्त्यं शंकेति। या संसर्गेनेति व्याप्तिप्रकारतानिरूपिता या व्याप्तिनिष्ठविशेष्यता तन्निरूपिता या हेतुव्यापकसाध्यीयसामानाधि
करण्यप्रकारता या निरूपकं सामानाधिकरण्यमात्रमिति न पूर्वोक्तदोषवारणासंभवः अत संसर्गेति। वस्तुतो व्याप्तिप्रकारतानिरूपितविशेष्यविषय
तेत्यभिधाने विशेष्यताद्वयात्तथाविधाया व्याप्तिप्रकारताया एवग्रहः स्यादतः संसर्गतापदं एतच्च समानाधिकरणप्रकारताविशेष्यतयोर्निरू
प्यनिरूपकभावमतेन। विशेष्यतयाधर्मितावच्छेदकताख्यप्रकारतायाः निरूप्यनिरूपकभावोपगमात्साध्याभाववदवृत्तिर्धूमो धूमवान्पर्वत
इत्यादिज्ञानसंग्रहः। सांकर्यशंकावारयति नानाफलेति। विशिष्यधूमत्वादिनेति। स्वस्वेकोव्याप्यमात्रवृत्तित्वस्वस्य मेव व्याप्तिघटकं अन्यथा स्वव्याप
कताभंगापत्तेः। एवं चेंधनादिवारणाय विशेष्यविधयापि स्वत्वं निवेश्यं तथा च हेतुतावच्छेदकानवगाहि शाब्दादिपरामर्शसंग्रहः स्यादतः
स्वस्वैकांतनिराकृतं। निवेशे चेति। अथात्र कारणतावच्छेदकानुगमवारणाय किंचिद्धर्मावच्छिन्नविषयतात्वेन निवेशमुपेत्य तन्न चेत्सा
दिग्रंथस्यावतारितत्वात् तमनिराकृत्य स्वदोषपूरणानसंगच्छते धूमव्यापकवह्निसमानाधिकरणोंधनवानिति ज्ञानस्य व्यापकतानिरूपकता
वच्छेदकत्वेनोपलक्षणीभूतकिंचिद्धर्मविशेषणेनैव वारणासंभवात्। न च पर्वतो वह्निव्याप्यधूमवानित्येवमादिज्ञानवारणाय धूमाभावाप्रका
रकत्वे धूमत्वावच्छिन्नप्रकारकत्वं निश्चयत्वमिति विशिष्यधूमविषयतानिवेशश्चावश्यक इति वाच्यं व्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रका

न्यः=
स्वनिष्ठावच्छेदकत्वाँ[illegible]त्वमपि बोध्यं ४

ग.टी. २८ रतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वस्वावच्छिन्नप्रतियोगिताकभेदवत्त्वोभयसंबंधेन किंचिद्धर्मवत्त्वस्यैव व्याप्यवत्तानिर्ता
यत्वरूपत्वात्। स्वावच्छिन्नप्रतियोगिताकत्वं च स्वनिष्ठयास्वावच्छिन्नाभावप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधा
वच्छिन्नसंबंधावच्छिन्नप्रतियोगितावच्छेदकतातन्निरूपकत्वं अत्रस्वावच्छिन्नाभावप्रकारतानिरूपितत्वं स्वनिरूपकप्रकारतानिरूपितत्वसंबंधे
न स्वाश्रयव्याप्यत्वनिष्ठावच्छेदकताभावच्छेदकत्वविशिष्टान्यायास्वभिन्नस्वावच्छिन्नप्रतियोगितानिरूपितानुयोगितासंबंधावच्छिन्ननिरवच्छिन्नाव
च्छेदकताकप्रकारतानिरूपितत्वं। तेन नीलधूमाभाववान्जातस्वच्छिन्नाभाववान्वापर्वतो वह्निव्याप्यधूमवानेतिज्ञानसंग्रहः। आद्ये तथाविधनी
लत्वनिष्ठावच्छेदकताविशिष्टान्यत्वाभावात् द्वितीये धूमत्वनिष्ठजातित्वावच्छिन्नावच्छेदकतायानिरवच्छिन्नत्वाभावात्। वह्निव्याप्यधूमत्वादिनां
ऽभावसंशयवारणाय साध्यव्याप्यत्वनिष्ठावच्छेदकतान्यत्वनिवेशः। एवं वह्निव्याप्यनीलधूमवान्नवा वह्निव्याप्यजातिमत्वान्नवेति संशययो
स्तादृशनीलत्वनिष्ठावच्छेदकताविशिष्टतया जातित्वावच्छिन्नावच्छेदकतासत्त्वेन संग्रहः स्यादतः प्रथमसंबंधे स्वावच्छिन्नप्रकारतेत्यस्य स्वनिरू
पकप्रकारतानिरूपकत्वसंबंधेन स्वनिष्ठावच्छेदकताभिन्नावच्छेदकताविशिष्टान्यनिरवच्छिन्नस्वनिष्ठावच्छेदकताकप्रकारतेत्यर्थः। उक्तस्थ
ले च तद्घटितसंबंधेन धूमत्वविशिष्टत्वाभावान्न दोषः। एवं समुच्चयसंग्रहाय द्वितीयसंबंधघटकाभावप्रकारतायां स्वाश्रयविशेषावच्छिन्नसंसर्ग ए.म. २८
तानिरूपकत्वसंबंधेन स्ववैशिष्ट्यं निवेश्यं तेन धूमालोकादिविशेषाणामननुगमेऽपि न क्षतिः। भावकोटावेव विशेषावगाहिसंशयवारणाय स्वा
व्याप्यत्वानिष्ठावच्छेदकतान्यत्वमपि

27

वच्छिन्नाभावविरोधावच्छिन्नसंसर्गतानिरूपकत्वस्यावच्छिन्नत्वोभयसंबंधेन स्वविशिष्टायाप्रकारतातन्निरूपितपक्षविशेष्यताकत्वस्यावच्छि
न्नाभावप्रकारतानिरूपितपक्षविशेष्यताकत्वोभयसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वनपिततीयसंबंधः। विरोधाव
च्छिन्नसंयोगेन धूमेपरामर्शसंग्रहार्थं द्वितीयसंबंधः। अवच्छेदकावच्छेदेनान्यतरकोट्यवगाहिज्ञानं संशय इति मते प्रथमसंबंधघटकहेतुप्रकारतायां
शुद्धसंयोगावच्छिन्नत्वं द्वितीयसंबंधघटकाभावप्रकारतायां पक्षतावच्छेदकव्यापकत्वविशिष्टदैशिकविशेषणतासंबंधावच्छिन्नत्वं प्रवेश्यसामाना
धिकरण्येनानुमित्युपयोगितादृशनिश्चयत्वं निर्वक्तव्यं। तेन समुच्चयसंग्रहः। एवं तादृशहेतुप्रकारतायां दैशिकविशेषणतासंबंधावच्छिन्नत्वं प्रवे
श्यावच्छेदकावच्छेदेनानुमित्युपयोगितादृशनिश्चयत्वं वाच्यं। संशयस्तु नैकतरनिश्चयत्ववानिति तद्व्युदासः। वस्तुतस्तु सामानाधिकरण्येनावच्छे
दकावच्छेदेन च निश्चययोर्निश्चयत्वमेकमेव। तादृशहेतुप्रकारतायां संयोगावच्छिन्नत्वमात्रं न तु शुद्धत्वमपि तादृशाभावप्रकारतायां पक्षतावच्छे
दकावच्छिन्नत्वविशिष्टदैशिकविशेषणतासंबंधावच्छिन्नत्वं च निवेश्यं स्वावच्छिन्नपक्षतावच्छेदकव्यापकत्वविशिष्टसंयोगावच्छिन्नप्रकारतानि
रूपितप्रकृतपक्षविशेष्यताकत्वस्वावच्छिन्नप्रकारतानिरूपितप्रकृतपक्षविशेष्यताकत्वोभयसंबंधावच्छिन्नस्वनिष्ठप्रतियोगिताकभेदवत्त्वमपि सं
बंधः। तेनावच्छेदकावच्छेदेन हेतुमत्तानिर्णयसंग्रहः। तादृशसंशयव्युदासश्च। अनुमितिवैचित्र्यं च बीजांतरनिबंधनमेवेति। एवं च वह्निव्याप्यनीलधू
मवान्वह्निव्याप्यजातिमत्त्वान्वा पक्ष इति ज्ञानयोः पृथगेव हेतुतावद्व्याप्यवत्ताज्ञानं च फलाजनकमेवेति न कश्चिद्दोषः। विशेष्यतानवच्छिन्नविशेष्य

ग॰टी॰
२८
28

ताकत्वादिरूपनिर्णायकत्वं चाग्रे स्वयमेव दूषयिष्यते। न चेदं ज्ञानं धूमाभाववति धूमप्रकारकमित्याद्यप्रामाण्यग्रहाभावानां विशिष्य निवेशात्तद्धेन
विशिष्य धूमादिविषयतानिवेश आवश्यकः अन्यथा तादृशाप्रामाण्यज्ञानदशायामन्यलिंगकपरामर्शादप्यनुमित्यनुत्पादप्रसंगादिति वाच्यं। स्वाव
च्छिन्नाभाववद्विशेष्यकतावच्छिन्नत्वप्रकारतानिरूपितत्वस्वावच्छिन्ननिरूपितत्वसंबंधावच्छिन्नावच्छेदकताकत्वोभयसंबंधेन किंचिद्धर्मविशिष्टप्र
काशित्वप्रकारतात्वेनानुगमय्य तादृशप्रकारतानिरूपिततन्निरूपितत्वसंबंधावच्छिन्नावच्छेदकतावच्छेदकधर्मावच्छिन्नत्वसंबंधावच्छिन्नज्ञानसामान्या
भाववद्विशिष्टपक्षव्याप्यतावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकनिर्णयत्वेन हेतुत्वोपगमात्। इदं ज्ञानं धूमाभाववति धू
मप्रकारकमिति सप्रामाण्यज्ञानसत्त्वेन दोषः। आलोकाभाववति आलोकप्रकारकं आलोकाभाववति धूमप्रकारकं धूमाभाववत्यालोकप्रकारकमित्या
दिज्ञानसत्त्वे चानुपपत्तिर्न। स्वावच्छिन्नाभाववद्विशेष्यकतावच्छिन्नत्वप्रकारतानिरूपितत्वं च स्वनिरूपकप्रकारतानिरूपकत्वसंबंधेन साध्यव्याप्यत्व-
निष्ठावच्छेदकताभिन्नावच्छेदकताविशिष्टं यत्तदन्यस्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकानुयोगितासंसर्गावच्छिन्नप्रकारतानिरूपिताभाव
प्रकारतानिरूपिताधिकरणप्रकारतानिरूपितविशेष्यित्वप्रकारतानिरूपितावच्छिन्नत्वप्रकारतानिरूपितत्वं तेन नीलधूमाभाववति धूमप्रका
रकमित्यादिज्ञानदशायामनुमित्युपपत्तिः। वह्निव्याप्यधूमाभाववति वह्निव्याप्यधूमप्रकारकमित्यप्रामाण्यज्ञानीयप्रकारितासंग्रहार्थं साध्य राम॰
व्याप्यत्वनिष्ठावच्छेदकतान्यत्वनिवेशः। जातिविशेषवदभाववति धूमप्रकारकमित्येतादृशज्ञानकालेऽनुमित्युपपत्तये निरवच्छिन्नत्वनि २८

नि=
३ व्याप्यत्वनिष्ठावच्छेदकताने दर्मनिवेश ॥

स्था
वेशः॥ यदि च वह्निव्याप्यधूमाभाववति धूमप्रकारकमित्यप्रामाण्यग्रहकाले ऽनुमित्युत्पादः प्रामाण्यिकत्त दोषावच्छिन्ननिरूपितत्वसंबंधाव
च्छिन्नावच्छेदकताकत्वेऽस्यत्वत्रस्यावच्छिन्नावच्छेदकतायां साध्यव्याप्यतावच्छिन्नत्वं निवेश्यं। व्याप्यता विषयकाणां धूमप्रकारकमित्यप्रामां
ण्यग्रहाणां च प्रतिबंधेवाभावो निवेश्यः। यद्वा स्वीयप्रकारितावृत्तिप्रकारतावद्धर्मावच्छिन्नत्वसंबंधावच्छिन्नप्रतियोगिताकत्ताभाव एव व्या
प्यप्रकारतायां विशेषणीभूयप्रकारणतावच्छेदकः प्रकारतावत्त्वं च स्वनिरूपितनिरूपितत्वसंबंधावच्छिन्नावच्छेदकतावच्छेदकत्वस्वनि
रूपितावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितविशेष्यितानिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपिताभावनिष्ठाव
च्छेदकतानिरूपितानुयोगितासंबंधावच्छिन्नावच्छेदकतावच्छेदकत्वोभयसंबंधेन ग्राह्यं। निरवच्छिन्नत्वादिनिवेशनं पूर्ववत्। वह्निव्याप्य
नीलधूमवत्ताज्ञानादेः पृथक्कारणतायामेव प्रकारितांशे विशेषणीभूय नीलधूमाभाववति नीलधूमप्रकारकमित्याद्यप्रामाण्यग्रहा
भावाः कारणतावच्छेदकात्तन्निवेश्य न प्रकारत्वकुशलमतिभिरूह्यः। न चैवं पुरुषांतरीयाप्रामाण्यग्रहदशायां परामर्शादनुमित्यनुपप
त्तिरिति वाच्यं। तत्पुरुषीयानुमितौ तत्पुरुषीयज्ञानाभावविशिष्टतादृशप्रकारताशालितत्पुरुषीयपरामर्शत्वेन हेतुत्वात्। स्वसमानाधिक
रणस्वविशेष्यनिरूपितत्वं वा प्रतियोगितावच्छेदकसंबंधे प्रवेश्यं ज्ञानभेदेन विषयितैक्ये तु पक्षविशेष्यतानिरूपितप्रकारतावज्ज्ञानत्वेन
हेतुत्वं। प्रकारतावत्त्वं च व्याप्यत्वधर्मितावच्छेदकतायत्नस्यावच्छेदको यो धर्मस्तद्धिशिष्टप्रकारतानिरूपितविशेष्यत्वसामानाधिकरण्यो

ग॰टी॰ २९ 29

भयसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभाववत्त्वस्वनिरूपकत्वोभयसंबंधावच्छिन्नं। प्रकारतायां धर्मवैशिष्ट्यं च स्वावच्छिन्नाभाववद्वृत्तिविशेष्यतानि
रूपितत्वावच्छिन्नत्वस्वावच्छिन्नप्रकारतात्वावच्छिन्नत्वोभयसंबंधावच्छिन्नमुपादेयं। ज्ञानांतरविशेष्यकधूमाभाववद्वृत्तिविशेष्यतानिरूपितधूमत्वावच्छि
न्नप्रकारताग्रहदशायां स्वविशेष्यकालोकाभाववद्वृत्तिविशेष्यतानिरूपितालोकत्वावच्छिन्नप्रकारताग्रहदशायां च विद्यमानधूमपरामर्शे स्वप्रकारतीय
तादृशावच्छेदकधूमत्वविशिष्टप्रकारतानिरूपितज्ञानाभावसत्त्वादसंतमेवोक्तप्रकारताकत्वमितिनानुपपत्तिः। स्वावच्छिन्नाभाववद्वृत्तित्वादिकं च पू
र्ववत्। एवं तु शोनिरूप्यस्वनिष्ठावच्छेदकतायां स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेन व्याप्यत्वनिष्ठावच्छेदकतान्यावच्छेदकताविशिष्टान्यत्वविशि
ष्टनिरवच्छिन्नत्वनिवेशान्नीलधूमाभाववत्तिजातिमदभाववत्तिगधूमप्रकारकमित्याद्यप्रामाण्यज्ञानानास्कंदितः। एतेन पूर्वकल्पेऽप्रामाण्यग्रहास्कं
दितपरामर्शोत्तरं परामर्शांतरसत्त्वेऽपि अप्रामाण्यग्रहनाशे सत्येवानुमितिरित्यसम्यक्तादेयं। न चैवमपि धूमलिंगकानुमित्सासति धूमपदशायामालोकप
रामर्शादनुमितिवारणाय विशिष्यधूमपरामर्शत्वादिना हेतुत्वमावश्यकमिति वाच्यं। लिंगविशेषनियंत्रिकपक्षतायाः कारणत्वेन न धूमः किंतु पर्वतत्वाव
च्छिन्नविशेष्यकवह्निविधेयकानुमितित्वावच्छिन्नं प्रति वह्निव्याप्यवत्तानिर्णयविशिष्टपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निविधेयताप्रकारका
नुमितीच्छाविरहविशिष्टसिद्ध्यभावत्वेनैकमेव हेतुत्वं। परामर्शवैशिष्ट्यं च स्वीयपर्वतत्वावच्छिन्नविशेष्यतानिरूपिताया व्याप्तिप्रकारतानिरूपितप्र ग॰म॰
कारतातदवच्छेदकधर्मावच्छिन्नलिंगकत्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताकत्वसामानाधिकरण्योभयसंबंधेन धर्मावच्छिन्नलिंगकत्व २९

प्रकारतानिरूपितविशेष्यत्वं चस्वावच्छिन्नलिंगकत्वप्रकारतानिरूपितत्वस्वाप्यधर्मावच्छिन्नलिंगकत्वप्रकारतानिरूपितत्वोभयसंबंधेन किंचिद्धर्मि
विशिष्टान्यत्वेन विशेषणीयं। तेनैकत्र द्वयमिति रीत्या एकविशिष्टेऽपरवैशिष्ट्यमिति रीत्या धूमालोकोभयलिंगकेच्छानुदासः पर्वतमहानसपक्षका
नुमितिर्जायतां महानसपक्षकाभिन्नपर्वतपक्षकानुमितिर्जायतां वह्नियुगोभयानुमितिर्जायतामितीच्छानिरासः पर्वतपक्षकानुमितिरूभयपक्षका
नुमितिश्च जायतामितीच्छासंग्रहश्चोत्यः। न चैवमपि पर्वतो वह्निव्याप्यधूमवान् पर्वतो वह्निव्याप्यालोकवांश्चेति परामर्शसत्त्वे आलोकलिंगकानुमि
तिर्जायतामितीच्छायामनुमित्सापत्तिरिति वाच्यं। स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वस्वीयव्याप्तिप्रकारतानिरूपितविशेष्यतावच्छेदकत्वोभयसंबं
धेन परामर्शविशिष्टत्वेन धर्मस्य विशेषणीयत्वादिति चेन्न। व्यापकतानिरूपकानुव्याप्तिधर्मिताश्च विशिष्यानिवेश्यप्रविष्टानानिवेशासंभवस्य प्रकारे
णाग्रे व्यक्तीकरिष्यमाणत्वात्। अनिवेशे चेति पाठेऽग्रे विशिष्येव निवेशेऽपीत्यपिः निवेशासमुच्चायकः। तथा चाननुगमो दोषः प्रथमतः सामान्यतो निवे
शेऽपीति लभ्यते तथाप्यननुगमं दर्शयति व्याप्तीत्यादिनेति व्याख्येयं। तद्धर्मेति। धूमत्वावच्छिन्नविशेष्यकव्याप्तिज्ञानत्वादिरूपधर्मावच्छेदेन वह्न्याद्यनुमि
तिसामान्यनियतपूर्ववर्त्तित्वं बाधितं। तथाविधान्यलिंगकानुमितिपूर्ववर्त्तितायाः तद्धर्मावच्छिन्नेऽसत्त्वात्। किंतु तादृशधर्मद्वयाद्यवच्छेदेन तथाविधज्ञा
नविशिष्टानुमितित्वावच्छिन्ननियतपूर्ववर्त्तित्वमेवोभयवादिसिद्धमित्यर्थः। विशिष्टेति ज्ञानद्वयकल्पोपलक्षणं। अनुपदमेव दंडचक्रादिवदित्यभिधास्य
मानत्वात्। विशिष्टपरामर्शत्वावच्छेदेनापीत्यपि दृष्टान्तार्थः। तथा च यथा ज्ञानद्वयत्वावच्छेदेन तादृशज्ञानविशिष्टानुमितिनियतपूर्ववर्त्तित्वं प्रतद्वयसिद्धं

ग.टी. ३० 20

तथेदृप्यपीत्यर्थः। तथा च विशिष्टपरामर्शहेतुतामते एकधर्मावच्छेदेनानन्यथासिद्धत्वं कारणत्वं परमते तु धर्मद्वयावच्छेदेनेति गौरवमिति भावः। अत्र न्या-
यमते व्याप्तिविषयता निरूपितहेतुविषयता निरूपितपक्षविषयताशालिज्ञानत्वेन पक्षविषयता निरूपितहेतुविषयता निरूपितव्याप्तिविषयताशा-
लिज्ञानत्वेनेति विनिगमनाविरहात् कारणताद्वयं। न च मीमांसकमते व्याप्तिज्ञानस्य व्याप्तिविषयतानिरूपितहेतुविषयिताशालिज्ञानत्वेन हेतु-
विषयतानिरूपितव्याप्तिविषयताशालिज्ञानत्वेन वा एवं पक्षधर्मताज्ञानस्य हेतुपक्षविषयतयोर्विनिगमनाविरहेणेति कारणताचतुष्टयं शंक्यं।
न्यायमते समानाधिकरणप्रवेशाद्विनिगमनाविरहेण कारणतावच्छेदककोटिप्रविष्टविषयतासमसंख्याः कारणताः मीमांसकमते तदप्रवेशा-
त्तो न्यूना इति स्वचयितुं प्रणालीदं। न च पर्वतीयधूमव्यापको वह्निरिति परामर्शस्येव हेतुत्वमुपेयतां सामानाधिकरण्यविषयत्वाप्रवेशेन लाघवा-
दिति वाच्यं। तादृशज्ञानस्य हेतुतायां मणिकारेणैव निराकरणीयत्वात्। एतावता वह्नित्वप्रभाववदिति ज्ञानस्य हेतुसमानाधिकरण्याभावप्रतियोगि-
तावच्छेदकत्वोपलक्षिताभावस्य तत्र भानेपि न कारणत्वमित्याह विशेष्येति। विशिष्टनिरूपितविषयितेति। विशेषणावच्छिन्नतद्वृत्तिनिरूपकता-
कविषयितेत्यर्थः। ननु वह्नित्वमिति ज्ञानेपि अनवच्छेदकत्वविशिष्टवह्नित्वस्य विषयतासत्त्वात् कारणतापत्तिरित्यत आह यत्संबंधेनेति तादृशेति।
कारणतावच्छेदकतापर्याप्त्यधिकरणविशिष्टनिरूपितविषयितासंबंध एव कारणतावच्छेदकताघटक इति भावः। संबंधैक्यफलं स्फुटं। तथा वि- राम० ३०
धेति। कारणतावच्छेदककोटिप्रविष्टवह्नित्वविषयितादिभिर्विशिष्टव्याप्यभाववतीत्यादिप्रकारकमित्यादीनां आस्पर्शेः। प्रामाण्यग्रहणं धूम-

भाववत्ति धूमप्रकारकमित्यादीनां च पक्षधर्मतांशेऽप्रामाण्यग्रहाणामभावैः सह विनिगमनाविरहोऽपि बोध्यः। मीमांसकमते व्याप्त्यंशेऽप्रा
माण्यग्रहाभावानां व्याप्तिज्ञानहेतुतायामेव पक्षधर्मतांशेऽप्रामाण्यग्रहाभावानां पक्षधर्मताज्ञानहेतुतायामेव निवेशात् न च तन्मते व्या
प्त्यंशेऽप्रामाण्यग्रहाभावानां पक्षधर्मताज्ञानहेतुतायामेव निवेशात् पक्षधर्मतांशेऽप्रामाण्यग्रहाभावानां व्याप्तिज्ञानहेतुतायामेव निवेशा
द्वा विनिगमनाविरहः शंक्यः। यतः केवलसामानाधिकरण्यसंबंधेनाप्रामाण्यग्रहाभावो निवेशयितुमशक्यः तथा सति प्रथमपरामर्शेऽप्रामा
ण्यग्रहसत्त्वे तदविषयद्वितीयपरामर्शादपि अनुमितिर्न स्यात् किंतु विशेष्यत्वसामानाधिकरण्योभयसंबंधावच्छिन्नतदभावः। एवं चेदं व्या
प्तिज्ञानं व्याप्यभाववत्तिव्याप्तिप्रकारकमितिज्ञानसत्त्वे तत्र पक्षधर्मताज्ञानादनुमित्यापत्तिस्तस्याप्रामाण्यज्ञानाविशेष्यत्वात्। एवं पक्षध
र्मताज्ञानमप्रमेत्याद्यप्रामाण्यज्ञानकालेऽस्वतन्त्रव्याप्तिज्ञानादनुमित्यापत्तिस्तस्याप्रामाण्यज्ञानाविशेष्यत्वादिति। अधिक सेयनेन तादृ
शाप्रामाण्यग्रहाभावमनिवेश्यैव ज्ञानद्वयकार्यकारणभावो मीमांसकानां मते इत्युक्तं। एतन्मते इदं ज्ञानं वह्निव्याप्यत्वावच्छिन्नाभाववत्तिव
ह्निव्याप्यत्वावच्छिन्नप्रकारकमित्यप्रामाण्यग्रहाभावोऽपि निविष्टः इत्यतो नाधिकः। अथ तत्र व्याप्यत्वावच्छिन्नप्रकारतायां प्रकारतावच्छेदकाव
च्छिन्नाभाववद्वृत्तिविशेष्यतानिरूपितत्वावगाहित्वात् तत्त्वं शुद्धधूमत्वावच्छिन्ने पक्षधर्मताज्ञानादनुमितेरुदयस्य निर्बीजत्वात् तन्मते ईदृशा
प्रामाण्यग्रहाभावोऽनिविष्टः इत्येव वक्तव्यं एवं च तादृशाप्रामाण्यग्रहदशायां वह्निव्याप्यधूमवान्पर्वत इति विशिष्टज्ञानादनुमितिर्दुर्वारैवान

चधूमवान्पर्वत इति ज्ञानस्य शुद्धधूमत्वावच्छिन्नप्रकारकज्ञानत्वेन हेतुतोपगमात्रापत्तिरिति वाच्यं। तथा सति तादृशाप्रामाण्यज्ञानशून्य-
तादृशायां विशिष्टपरामर्शादनुमित्युत्पादप्रसंगात्। मैवं। तादृशाप्रामाण्यग्रहाभावो हेतुमत्ताज्ञानेन विशेषणतया निवेश्यः किंतु हेतुप्र-
कारतायामेव स्वीयवह्निव्याप्यत्वावच्छिन्नाभाववद्विशेष्यितानिरूपितत्वप्रकारतानिरूपितविशेष्यतावच्छेदकीभूतवह्निव्याप्यत्वावच्छिन्न-
प्रकारतात्वावच्छिन्नप्रकारताश्रयप्रकारतावच्छेदकीभूतधर्मावच्छिन्नप्रकारतात्वसंबंधावच्छिन्नज्ञानाभावो हेतुप्रकारतायामेव विशेषण-
तया निवेश्यत इति। धूमवान्पर्वत इति ज्ञानकाले तादृशाप्रामाण्यग्रहसत्त्वेऽनुमित्युपपत्तिः। तादृशहेतुप्रकारतायां व्याप्यत्वावच्छिन्नप्रकार-
तात्वाभावादिति। अथैवं पुरुषांतरस्य तादृशाप्रामाण्यज्ञानदशायां वह्निव्याप्यधूमवान्पर्वत इति परामर्शादनुमित्यनुदयापत्तिः तादृशपरामर्शी-
यहेतुप्रकारतायां पुरुषांतरीयाप्रामाण्यग्रहस्यैवोक्तसंबंधेन सत्त्वादिति चेन्न। तादृशप्रकारतात्वस्वसमानाधिकरणत्वविशेष्यज्ञाननिरूपितत्वो-
भयसंबंधावच्छिन्नाभावस्यैवोक्तत्वात्। तन्नानांतरविशेष्यकतादृशाप्रामाण्यग्रहसत्त्वे धूमवान्पर्वत इति ज्ञानादनुमितिनिर्वाहाय स्वविशेष्यत्व-
निवेशः। ज्ञानभेदेऽपि विषयतैक्येन तु पक्षधर्मताज्ञानस्य पक्षविशेष्यतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारतावज्ज्ञानत्वेन हेतुत्वं। प्रकारताव-
त्वं च सामानाधिकरण्यतथाविधवह्निव्याप्यत्वावच्छिन्नप्रकारतात्वाधिकरणत्वोभयसंबंधावच्छिन्नज्ञानाभाववत्त्वस्वनिरूपकत्वोभयसंबंधे- रा॰म॰
न बोध्यं। प्रकारतात्वाधिकरणत्वं च स्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वस्वाश्रयप्रकारतावच्छेदकधर्मावच्छिन्नप्रकारतानिरूपकत्वोभयसं- ३१

बंधेनेति। प्रयोजनं स्फुटं। अथाप्रामाण्यग्रहाभावविशिष्टविशिष्टपरामर्शहेतुतामते विशेष्यविशेषणभावे विनिगमनाविरहात्तल्लिंगकानुमि
तौ तल्लिंगकाप्रामाण्यग्रहाभावानां पृथगेव हेतुतेति नानाविधाप्रामाण्यग्रहाभावानामेकत्र निवेशप्रयुक्तमहागौरवं नास्तीति चेन्न। अप्रामाण्य
ग्रहाभावस्य हेतुत्वे प्रथमपरामर्शेऽप्रामाण्यग्रहसत्त्वेन तद्विषयद्वितीयपरामर्शादप्यनुमित्यनुदयापत्तेरिति। अस्माकमिति। अथान्यानियमपक्षा
वलंबनेनैवोज्जीवनं नावधारयाम इति चेदिदं। व्यापकसामानाधिकरण्यावगाहिपरामर्शादेवानुमितिरिति नियममते वह्न्यभाववद्वृत्तिमत्त्वविशिष्टत्वाव
च्छिन्नपक्षकधूमाद्यनुमितिसामग्रीणामनंतानां भिन्नविषयकप्रत्यक्षादिकं प्रति प्रतिबंधकताधिकं। अस्मन्मते च वह्न्यभाववद्वृत्तिमान्यत्वादृ
त्वे तादृशानुमितिसामग्र्यास्तत्रावश्यकत्वपातत्वप्रतिबंधकतयैवोपपत्तेस्तत्र तासां प्रतिबंधकताकल्पनात्। अथ वह्न्यनुमितिसामग्र्याः पर्वतो वह्न्य
भाववानिति बाधाभावघटितत्वात् तादृशबाधकाले तथाविधपदानुमितिसामग्रीकाले भिन्नविषयकप्रत्यक्षवारणाय तादृशसामग्र्याः प्रतिबंधकत्व
मावश्यकमिति चेत्तत्संयोगादृशप्रत्यक्षानुदयत्वाद्वच्छिन्नविधेयकतादृशविशिष्टधर्मावच्छिन्नपक्षकानुमितिसामग्र्याः पृथक्प्रतिबंधकत्वं साधितं
एवमपि तादृशविशिष्टधर्मावच्छिन्नपक्षकवह्निमत्सर्वतत्त्वनिष्ठत्वाद्यवच्छिन्नविधेयकानुमितिसामग्रीणां मन्मते प्रतिबंधकताकल्पनप्र
युक्तलाघवं दुर्वारं तादृशानुमितेः पर्वतो निर्वह्निरित्यादिबाधनिर्णयप्रतिबध्यतया तत्सामग्रीकाले बाधाभावघटितपर्वतत्वावच्छिन्नव
ह्नित्वावच्छिन्नसाध्यकानुमितिसामग्र्या आवश्यकत्वात्। अथ पर्वतो वह्निमानित्यनुमितिसामग्र्यां पर्वतो वह्निमानिति। सिद्ध्यभावस्यानि

ग०टी०
३२
32

वेश्यतया तादृशसिद्धिकाले तथाविधपक्षानुमितिसामग्रीकाले भिन्नविषयकप्रत्यक्षवारणाय तादृशसामग्र्याः प्रतिबंधकत्वकल्पनमावश्य-
कमिति चेन्न। एवमपि पर्वतविशेष्यकवह्निमत्तानिर्णयत्वावच्छिन्नस्य भ्रमत्वं पक्षतावच्छेदककोटौ साध्यतावच्छेदककोटौ वा यन्नाधिकं
निविष्टं तादृशानुमितिसामग्र्याः प्रतिबंधकत्वाकल्पनप्रयुक्तलाघवं दुर्वारं। तादृशानुमितिसामग्रीकाले पर्वतो वह्निमानिति सिद्धौ भ्रमत्व
ग्रहस्यावश्यकतया ऽप्रामाण्यज्ञानाभावविशिष्टसिद्ध्यभावघटितसामग्र्या अवश्यंभावात्। एवं साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानादे-
र्वानुमितिसिद्धिनियमः। तथा सति धूमव्यापकवह्निसमानाधिकरणधूमवत्पर्वतपक्षकबुद्ध्यनुमितिसामग्र्याः भिन्नविषयकप्रत्यक्षादि-
कं प्रतिबंधकत्वाकल्पनेन लाघवात्। एवं साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानस्यापि अनुमितिहेतुत्वमुपेयं
तथा सत्युक्तरीत्या लाघवसंभवात्। व्यतिरेकव्याप्तिज्ञानस्य लाघवांतरेणार्थापत्तिहेतुत्वं दीधितिकारा वर्णयिष्यंतीति बोध्यं। ईदृशलाघवानु-
सारेण साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानादेर्नियमेन हेतुत्वमभिमतं अनुगमस्तु नाभिप्रेत इत्याशयेन दूषयति एवमिति। साध्याभावव-
द्वृत्तित्वरूपव्यभिचारग्रहप्रतिबंधकताज्ञानस्याविरोधित्वेपि स्वरूपसंबंधरूपतत्प्रतिबंधकतावच्छेदकतापन्नविषयित्वेनानुगमं दूषयति
साध्येति। येनु व्याप्तिप्रकारतायाः स्वरूपसंबंधरूपप्रतिबंधकतावच्छेदकप्रकारतात्वेनानुगममाहुस्तन्मतं दर्शयति यत्त्विति। धर्मान्तरं द्व्यत्वा

राम०
३२

दिः स्वयं परमतं दूषयति वस्तुतस्त्विति। तेषां मीमांसकानां। कथमित्यनेनोक्तरीत्या विशिष्टपरामर्शत्वेन कारणत्वं सम्भवतीति सूचितं॥ इत्यादीत्यादिना
ज्ञानद्वयस्थले विशिष्टज्ञानकल्पनायाः फलमुखगौरवग्रस्तत्वेन तद्दोषत्वपरिहारः॥ तथा च न्यायमते केवलान्वय्यनुमानोच्छेद इष्ट एव साध्याभा
ववद्वृत्तित्वरूपव्याप्त्यवगाहि विशिष्टपरामर्श एवानुमितिहेतुरिति भावः। यदि च व्यापकताज्ञानं पक्षधर्मताज्ञानं च कारणं तानं तु केवलान्वय्यनुमानस्या
गइति मीमांसकमतं तदापि नैयायिकानां केवलान्वय्यनुमानसमर्थनकुशलतया व्यापकसामानाधिकरण्यरूपव्याप्त्यवगाहि विशिष्टपरामर्श एव हेतुः।
अन्यथा त्वन्मते व्याप्यत्वव्याप्तितत्तया सर्वत्रापि निरूप्यनिरूपकभावापन्नविषयतानामेव कारणतावच्छेदकत्वं कारणतावच्छेदकानामसमनैयत्समेव
चकारणतावच्छेदकमिति विशिष्टपरामर्शत्वावच्छिन्नकारणता एकैवेति सूचितं। अधिकमिति यदि विशिष्टपरामर्शहेतुतामते व्याप्त्यंशे पक्षधर्म
तांशे च निश्चयत्वमिति तया विनिगमनाविरहात्कारणता वाच्यास्त्वं मीमांसकमते व्याप्तिज्ञानहेतुतायामेव व्याप्त्यंशे निश्चयत्वं पक्षधर्मताज्ञानहेतुतायामेव
तदंशे निश्चयत्वमिति न विनिगमनाविरहः तदा मा प्रिविशिष्टवैशिष्ट्यावगाहित्वेन न्यायमते कारणता तया व्याप्त्यंशे निश्चयत्वमेव न किंतु पक्षधर्मतांशे
एव निश्चयत्वमिति महालाघवं। एवं च ज्ञानद्वयहेतुतामते धूमो वह्निव्याप्य इति ज्ञानदशायां वह्निव्याप्यतावच्छिन्नाभाववान् धूमवांश्च पर्वत इति
ज्ञानाद् अनुमितिरूपपद्यते तस्य धूमत्वावच्छिन्नाभावानवगाहितया पक्षधर्मतानिश्चयत्वात्। एवं च वह्निव्याप्यतावच्छिन्नाभावप्रकारकान्यत्वरूपनि
र्णयित्वस्य पक्षधर्मताज्ञाने निवेशासंभवाद् वह्निव्याप्याभाववान् वह्निव्याप्यधूमवान्वेति संशयादनुमित्यापत्तिः। ततः स्वनिरूपितप्रतियोगितासंसर्गा

ग॰टी॰ वच्छिन्नप्रकारतावच्छेदकीभूतवह्निव्याप्यतावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वोभयसंबंधेन पर्वतत्वावच्छिन्नविशेष्यतानिरूपिताभावप्र
३३ कारतावदन्यत्वस्यैव हेतुप्रकारतायां निवेशनया दर्शितनिर्णयसंशययोः संग्रहासंग्रहौ वा चोत तथा च साध्यतावच्छेदकभेदेनानंतानुका
33 रणतानुगमलाघवेन व्याप्तिविषयकत्वमवच्छेदकं वाच्यमिति। यत्तु धूमो वह्निव्याप्य इति व्याप्तिज्ञानस्य धूमलिंगकवह्निविधेयकानुमितित्वमे
वजन्यतावच्छेदकं न तत्र पक्षविषयताप्रवेशप्रयोजनाभावात् एवं धूमवान् पर्वत इति पक्षधर्मताज्ञानस्य धूमलिंगकपर्वतविशेष्यकानुमि
तित्वमेव जन्यतावच्छेदकं न तत्र साध्यविषयतानिवेशप्रयोजनाभावात्। अथ साध्यतावच्छेदकाघटितनिर्णयत्वनिर्वचनानुरोधेन साध्यवि
षयतानिवेश आवश्यकः अन्यथा धूमो घटव्याप्य इति ज्ञानसत्त्वे पर्वतो घटव्याप्यधूमवानेवेति संशयादनुमित्यापत्तेरिति चेन्न स्वनिरूपितप्रतियो
गितासंसर्गावच्छिन्नप्रकारतावच्छेदकीभूतत्तत्साध्यतावच्छेदकावच्छिन्नव्याप्यतावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वोभयसंबंधेन पर्वतत्वाव
च्छिन्नविशेष्यतानिरूपिताभावप्रकारतावदन्यत्वकूटस्यैव धूमत्वावच्छिन्नप्रकारतायां निवेश्यत्वात् धूमो घटव्याप्यः पर्वतो वह्निव्याप्यधूमवान्नि
त्यादिज्ञानद्वयाद्वह्न्यनुमितिरिष्टैवा धूमो घटव्याप्यः पर्वतो वह्निव्याप्यधूमवान्नवेति ज्ञानादनुमित्यनुत्पादस्यान्यापत्तेश्च पक्षधर्मतानिर्णयत्वाभा
वेनास्मन्मते पीष्टत्वात् पक्षसाध्यविषयतयोर्निरूप्यनिरूपकभावस्य बाधाभावादिनियम्य एव। एवमेकैकव्याप्तिज्ञानस्य एकैकसाध्यतावच्छेदका राम॰
वच्छिन्नविषयतानिवेशैकमात्रकारणताकल्पनमिति सह स्वसाध्यतावच्छेदकभेदेन सहस्रकार्यकारणभावाः एवं पक्षधर्मताज्ञानस्यापि एके ३३

कपक्षतावच्छेदकावच्छिन्नविषयतांप्रवेश्यैवैकमात्रकारणताकत्वमिति सहस्रपक्षतावच्छेदकभेदेन सहस्रं कारणता इति अस्मन्मते
द्विसहस्रंकार्यकारणभावाः नैयायिकानां तु तन्त्रे सहस्रगुणितसहस्रं तन्मते साध्यतापक्षतावच्छेदकावच्छिन्नयोरेकत्र निवेशेन पर्वतत्वमहा
नसत्वादिरूपसहस्रपक्षतावच्छेदकं निवेश्य वह्नित्वद्रव्यत्वादिरूपसहस्रसाध्यतावच्छेदकभेदेन कारणतानां कल्पनीयत्वात् । पक्षधर्मताज्ञानका
रणत्वे साध्यतावच्छेदकघटितनिर्णयत्वनिवेशानुरोधेन कार्यतावच्छेदककोटौ साध्यविषयतानिवेशापक्षेपि पक्षतावच्छेदकभेदेनानंतहेतुमता
ज्ञानकारणतायां व्याप्तिविषयतानिवेशेऽनंतस्थलेवच्छेदकगौरवं पक्षविषयताया हेतुविषयताया व्याप्तिघटकतत्तत्पदार्थविषयताया वा इत्यवि
षयतानिरूपितत्वेनावच्छेदकत्वे विनिगमनाविरहेणानंतस्थले कारणताधिक्यं अस्माकं तु व्याप्तिज्ञानस्य स्वतंत्रहेतुतया तद्घटकपदार्थविषयता
भिस्तद्विरहासंभवादतिलाघवं । ननु ज्ञानद्वयहेतुतामते व्याप्तिज्ञानस्य पक्षधर्मताज्ञानस्य कार्यतावच्छेदककोटौ ज्ञानद्वयवैशिष्ट्यस्य निवेश्यतया व्या
प्तिज्ञानपक्षधर्मताज्ञानयोः साध्यतावच्छेदकपक्षतावच्छेदकभेदेनापि कारणताभेदात् साम्यमिति चेन्न । स्वमात्रवैशिष्ट्यनिवेशेनैवोपपत्तेर्ज्ञानद्वय
वैशिष्ट्यस्य काप्यप्रवेशात् । एवं च कार्यतावच्छेदकसामानाधिकरण्यमात्रं परस्परापेक्षायां तंत्रं न तु व्याप्यव्यापकभावोपि येन व्याप्तिज्ञानादिजन्यता
वच्छेदककोटौ पक्षधर्मताज्ञानादिवैशिष्ट्यनिवेशः स्यादिति । अथैवं ज्ञानद्वयहेतुतामते धूमो वह्निव्याप्य आलोकवांश्च पर्वत इति ज्ञानद्वयसत्त्वे पर्वतो व
ह्न्यभाववानिति बाधावबलात् पर्वतो वह्निमानित्यनुमित्यापत्तिः । तादृशव्याप्तिज्ञानस्य तादृशपक्षधर्मताज्ञानस्य च तादृशबाधाभावसहकारित्वादि

ग० टी० तिचेन्नातल्लिंगकव्याप्तिज्ञानतल्लिंगकपक्षधर्मताज्ञानयोरेकत्र निवेशेपूर्ववाधाभावद्वारितसामग्र्याः फलव्याप्यत्वोपगमेनैकलिंगकव्याप्तिज्ञाना
३४ न्यलिंगकपक्षधर्मताज्ञानद्वारितसामग्र्याः कार्यफलोत्पत्तिप्रयोजकत्वाभावादिति तदसत्ताज्ञानद्वयहेतुतामते धूमो वह्निव्याप्यः आलोकवान्पर्व
तइत्येतादृशज्ञानद्वयादितोऽनुमितिवारणायहेतुतावच्छेदके निवेश्यकार्यकारणभावे तद्भेदेन कारणतावाकुल्यात् न्यायमते च साध्यव्याप्यत्वाव
34 च्छिन्नप्रकारकत्वेन धूमालोकादिनिखिलपरामर्शानामेकहेतुत्वेन लाघवात्। अथ धूमो वह्निव्याप्यः धूमवान्पर्वतइत्यादिनिर्णयानामनुमितौ
न स्वतंत्रकारणतोपेयते येन गौरवं स्यात् किंतु धूमो न वह्निव्याप्यः स्यादिसायतो धूमो वह्निव्याप्य इति निर्णयस्य वाधाभावमुद्रयाऽप्यास्ति विशिष्टवोधा
दौ च विशेषणतावच्छेदकप्रकारकनिर्णयमुद्रया हेतुतासर्ववादिसिद्धैव तत्रायत्तिताद्दिकमनिवेश्यापि वह्नितो तरत्वसंसर्गेणतादृशनिर्णयमात्र
स्यैव जन्यतावच्छेदकत्वमुपेयतेऽनुमितिस्थतादृशजन्यतावच्छेदकवत्त्वेवेति नस्वतंत्रकारणत्वापत्तिः। एवं धूमवान्पर्वतइतिनिर्णयस्य पर्वतो
निर्धूमः स्यादित्यापत्तो धूमविशिष्टपर्वतवैशिष्ट्यवोधादौ चकारणत्वेन निर्वाहइति। इत्यां तु विशेषः यद्धूमो वह्निव्याप्यो धूमवान्पर्वतइत्यादयः प्र
त्येकं संततः आयत्तसादिक्रमुत्पादयंति अनुमितिं पुनः संभूयैव सामग्रीत्वाभावादिति चेत्तर्हि विशिष्टपरामर्शस्यापि क्रमकारणतयैव निर्वाहेऽपि
तुशंकातलालाघवगौरवाभावेनज्ञानद्वयादनुमितिस्वीकारो निर्युक्तिकः। वस्तुतस्तु धूमो वह्निव्याप्य आलोकवान्पर्वतइत्यादिज्ञानद्वयकालेमि एम०
त्रविषयकत्वप्रत्यक्षोपपत्तये धूमतावच्छिन्नविशेष्यकव्याप्तिज्ञानधूमतावच्छिन्नविशेष्यकपक्षधर्मताज्ञानताभ्यामेव व्याप्तिज्ञानहेतुमत्ताज्ञानयोः ३४

सामग्रीप्रतिबंधकतायां निवेशेन तन्मते गौरवं। न्यायमते तु धूमादिपरामर्शानामुक्तानुगमरूपेणैव निवेशसंभवान्न लिंगभेदेन सामग्रीप्रतिबंधकते
ति। अथ स्वीयव्याप्तिप्रकारतानिरूपितधर्मितावच्छेदकधर्मावच्छिन्नप्रकारताकत्वसामानाधिकरण्योभयसंबंधेन व्याप्तिज्ञानविशिष्टपक्षधर्मता
ज्ञानत्वेन दर्शितज्ञानयोः सामग्रीमध्ये निवेशादेकलिंगव्याप्तिज्ञानान्यलिंगहेतुमत्ताज्ञानद्वयदशायामुक्तप्रत्यक्षोपपत्तेस्तन्मतेपि न लिंगभेदेनानुमि
तिसामग्रीप्रतिबंधकताभेद इति चेन्न। स्वीयपक्षविशेष्यतानिरूपितप्रकारतावच्छेदकावच्छिन्नविशेष्यताकत्वसामानाधिकरण्योभयसंबंधेन ज्ञानवि
शिष्टज्ञानत्वेन दर्शितज्ञानयोः सामग्रीप्रतिबंधकतायां निवेशसंभवेन विनिगमनाविरहस्य दुर्वारत्वात्। एवं परामर्शविशिष्टानुमितित्वानामुक्तरीत्या
सिद्धावुत्तेजकत्वे न्यायमते लाघवं। व्याप्तिज्ञानपक्षधर्मताज्ञानयोरेकविशिष्टापरस्यानुमितित्वाविशेषणत्वे मीमांसकमते गौरवात्। न च मीमांसक
मते सिद्धिप्रतिबंधकतैव न कल्प्यत इति किं गौरवमिति वाच्यं। पक्षताकारणत्वस्य व्यवस्थापितत्वात्। एवं धूमो वह्निव्याप्यो धूमवांश्च पर्वत इति मीमांसक
मतसिद्धानुमितिसामग्रीकाले वह्निव्याप्याभाववांश्च पर्वत इति प्रत्यक्षादिवारणाय तेन पर्वतविशेष्यकवह्न्यनुमितिसामग्र्याः तत्र प्रतिबंधकत्वं स्वी
कार्यं। न्यायमते तु तादृशसामग्रीदशायां विशिष्टपरामर्शस्यावश्यकतया बाधबुद्ध्यैव तादृशप्रत्यक्षप्रतिबंधकत्वात् न तत्कल्पनमिति लाघवं। घट
प्रत्यक्षं जायतामिति साधाकारकेच्छानामुत्तेजकानुरोधेन सामग्रीप्रतिबंधकताभेदसिद्धेः। अथ न्यायमतेपि प्रत्यक्षानुमित्यादीनां यौगपद्ये तद्भेदे व्यक्तिकल्प
नापेक्षया तद्व्यक्तिनिर्वाहककार्यकारणभावानंत्यं च तत्र भेदे तु प्रत्यक्षत्वानुमितित्वादिसाकार्यमित्येव सामग्रीप्रतिबंधकताबीजं। गुरुतागतजातिमनंगीकु

र्वतां मीमांसकानां प्रत्यक्षत्वादेर्जातित्वाभावात् सांकर्यस्यादोषत्वात् अनुमित्सुत्वादकाले प्रत्यक्षाद्युत्पादे तस्याभावात् सामग्रीप्रतिबंधकत्वकल्पनं क्वापि
नास्तीति चेन्न। वन्ह्याद्यनुमितावुदासीनपदार्थविषयतया अनुभवविरुद्धतया सामग्रीप्रतिबंधकत्वस्य सर्वैर्मतत्व एवावश्यकत्वादिति न्यायनय
एव सम्यक्। अत्रेदमालोचनीयं अस्तु पदार्थगौरवं मीमांसकानां तथापि भिन्नविषयकप्रत्यक्षादिकं प्रति धूमवत्पर्वतत्वावच्छिन्नपक्षकवह्निव्याप्य
धूमसमानाधिकरणालोकत्वावच्छिन्नसाध्यकाद्यनुमितिसामग्रीणामनंतानां प्रतिबंधकत्वाकल्पनेन लाघवम्। तादृशसामग्रीकाले धूमत्वा
वच्छिन्नविशेष्यकव्याप्तिज्ञानधूमत्वावच्छिन्नप्रकारकपर्वतज्ञानादिरूपधूमलिंगकपर्वतपक्षकवह्निसाध्यकानुमितिसामग्र्याः आवश्यकत्वा
त्तत्प्रतिबंधकतयैवोपपत्तेः न्यायमतेतु पर्वतपक्षकवन्ह्याद्यनुमितिजनकविशिष्टपरामर्शोत्पत्तिसामग्र्या अनैयत्यात्तादृशप्रतिबंधक
कल्पनमावश्यकं। अथ पर्वतपक्षकवन्ह्याद्यनुमितिसामग्रीप्रतिबंधकतायां पर्वतो वह्निमानिति सिध्यभावस्यावश्यकतया तादृशसिद्धिकाले
दर्शितानुमितिसामग्रीसत्वे भिन्नविषयकप्रत्यक्षवारणाय तादृशानुमितिसामग्रीणां एकप्रतिबंधकत्वं प्राभाकराणामप्यावश्यकमिति चेन्न।
सिद्धेरेवतन्त्रत्वे विरोधित्वात्। अथैवमपि पर्वते बाधकाले तादृशसामग्रीसत्वे भिन्नविषयकप्रत्यक्षापत्त्या तथाविधानुमितिसामग्रीणां प्रतिबं
धकत्वं तत्प्राभाकराणामावश्यकमिति चेन्न एवमपि तादृशबाधादिप्रतिबध्यीभूतवह्निमत्पर्वतवृत्तिवह्निव्याप्यधूमसमानाधिकरणालोक 
त्वावच्छिन्नसाध्यकधूमवत्पर्वतत्वावच्छिन्नपक्षकानुमितिसामग्रीप्रतिबंधकत्वाकल्पनलाघवं तेषां दुर्वारं तादृशानुमितिसामग्रीकाले प 

पर्वतो निर्वह्निरित्येतादृशबाधबुद्ध्यभाववद्वृत्तितायाः पर्वतपक्षकवह्न्यनुमितिसामग्र्या आवश्यकत्वात् । अथ पर्वतो वह्निमानिति प्रत्यक्षशाब्दबोधा
दीनां तथाविधानुमितिसामग्र्यप्रतिबध्यतयोपदर्शितविशिष्टधर्मावच्छिन्नसाध्यकानुमितिसामग्रीत्वमेव तद्दिशोऽपि त्वं वाच्यं एवं च तत्तद्विषयमनि
वेश्य भिन्नविषयकानुमित्यन्यज्ञानत्वमेव तत्प्रतिबध्यतावच्छेदकमुपेयते इति तत एवान्यविषयकप्रत्यक्षादिवारणासंभवान्न्यायमतेऽपि न तत्प्रति
बंधकत्वकल्पनाधिक्यं । न च वह्निप्रसक्ते जायतां घटप्रत्यक्षं जायतामित्यादीच्छानां विशिष्योत्तेजकत्वानुरोधेन विषयभेदेन प्रतिबंधकत्वमावश्यकमि
ति वाच्यं । यतः स्वविषयत्वस्वहनिकृतित्वनिरूपितत्वसामानाधिकरण्ये तत्त्रयसंबंधेन सामान्यतः इच्छाविशिष्टान्यत्वस्यैव कार्यतावच्छेदककोटौ निवेशेनेच्छा
धीनज्ञाने अभिज्ञायावारणासंभवादिच्छाया उत्तेजकत्वमेव कापि नास्ति एवं संति वह्निव्याप्याभाववान्पर्वत इत्यादिप्रत्यक्षादौ पर्वतादिपक्षकवह्न्याद्यनुमि
तिसामग्रीप्रतिबंधकत्वप्रयुक्तं न मीमांसकानां गौरवं । घटादिप्रत्यक्षस्थलीयप्रतिबंधकतयैवोपपत्तेः तन्मते विशिष्य तत्र प्रतिबंधकत्वाकल्पनात् । तथा
पि प्रथमोपदर्शितलाघवं न्यायमतेऽपि निराबाधमेवेति । न चोपदर्शितोभयसंबंधेनेच्छाविशिष्टान्यत्वस्य प्रतिबध्यतावच्छेदकत्वे इच्छाकाले विशेषवि
सामग्र्यसत्त्वे तदवच्छिन्नापत्तिः तत्र सामान्यत इच्छात्वेन न प्रतिबंधकत्वसंभव इति घटप्रत्यक्षं जायतामितीच्छाकाले पटप्रत्यक्षसामग्र्यां सत्यां तादृ
शोभयसंबंधेनेच्छाविशिष्टान्यः चाक्षुषानुसादप्रसंगादिति वाच्यं । तादृशसंबंधेनेच्छाविशिष्टान्यघटचाक्षुषं प्रति घटप्रत्यक्षं जायतामित्यादी
च्छानां विशिष्य प्रतिबंधकत्वकल्पनेनैवदर्शितापत्तिवारणासंभवादिति चेन्न । अस्त्वेतादृशरीत्योपदर्शितानुमितिसामग्रीप्रतिबंधकताधिक्यप

रीहारः। तथा पितादृशसामग्र्याः प्रतिबध्यतावच्छेदकगौरवं दुर्वारमेव तथा हि अस्मन्मते तादृशसामग्र्याः प्रतिबध्यतावच्छेदकं पर्वतविशेष्य
कवह्निप्रकारकानुमितित्वमज्ञानत्वमात्रं घटप्रसक्तत्वादेस्तत्प्रतिबध्यतानवच्छेदकत्वे सति विरहात् त्वन्मते तु घटप्रसक्तादिसाधारण
वह्निमत्पर्वतत्ववह्निवह्निव्याप्यधूमसमानाधिकरणालोकत्वावच्छिन्नप्रकारतानिरूपितधूमवत्पर्वतत्वावच्छिन्नविशेष्यताभिन्नमुख्यविशेष्य
ताशाल्यनुमितित्वमज्ञानतादिकमेव केवलानुमितित्वमस्तु तथात्वे समानविशेष्यकशाब्दबोधादौ व्यभिचारप्रसंगात्। एवं चास्मत्स्वन्यानुमितिसा
मग्रीप्रतिबंधकतायामेकज्ञानविशिष्टापरज्ञाननिवेशप्रयुक्तमुपदर्शितं गौरवं मीमांसकमते न्यायमते तु तस्य लौघतादृशानुमितिसामग्रीनिय
तोपदर्शितानां तत्सामग्रीणां प्रतिबध्यतावच्छेदकगौरवमिति मीमांसकमतमेव रमणीयमित्यलं पल्लवेः। तत्र सप्रमाणकत्वे। युक्तं तर्कगौर
वस्य फलमुखत्वं। मूले सिद्ध्यसिद्धिभ्यां ताना ज्ञानाभ्यां। अदोषत्वात् प्रतिबंधकत्वान्न विषयत्वात्। तादृशगौरवज्ञानस्याप्रतिबंधकत्वादिति पाव
त्। गा० अनुकूलतर्कः अनुमितित्वे हि विशिष्टपरामर्शव्यभिचरेतदानतज्जन्याव्याप्यादिसाकारकः। धर्मपदं प्रवृत्ततेविशिष्टपरामर्श एव। अत्रत
चक्षुःसंयोगव्यक्तिमजनयित्वापि चक्षुष्मावच्छिन्नस्य चाक्षुषत्वावच्छिन्नजनकत्वाच्चक्षुःसंयोगेऽव्याप्तिरतो यद्रूपावच्छिन्नमिति। एवं चक्षुश्चा
क्षुषव्यक्तेर्निवेशे तद्भेदेनानुगतनानाव्यापारतापत्तिरतोनुगमाय यद्रूपावच्छिन्नद्वयं। यद्धर्मावच्छिन्नजन्यतावच्छेदकीभूतयद्धर्मावच्छिन्नजन रा० म० ३६
कतावच्छेदकपद्धर्मवत्त्वं निर्गलितलक्षणं तेन हस्तियकस्मरणत्वमादायनातिव्याप्तिरेतादृशार्थलाभाय दीधितावेवकारः। तथैव नियतत्व

स्वव्यापारत्वनिर्वाहकत्वोपपत्तेः॥ रूपादिचाक्षुषेपि संयोग एव व्यापारः। आवरणप्रत्यक्षे समवायस्यालक्ष्यत्वान्न दोषः॥ तस्यैवेति तथा च चाक्षु
षत्वावच्छिन्नजनने चक्षुःसंयोगत्वावच्छिन्नचक्षुष्मावच्छिन्नव्यापार इति व्यवहारार्थं उक्तः। क्रियादीति क्रियासंयोगजन्यतावच्छेदकयोर्वि
भा ३ जात्ययोः सत्त्वेपि उपलंभाभावादिति भावः॥ ततश्च संयोगत्वतत्तज्ज्ञानत्वादिकमननुगतं। अन्यतमत्वं तु प्रत्यक्षा। जनकसंयोगादिसाधारणां। चंदना
दे स्त्वादात्म्यसंबंधेन प्रकारतया भानस्यानावश्यकतां ध्वनयन्नाह स्विध्यस्तु वेति। प्रत्यक्षत्वस्यैवेति। तद्विशिष्टबुद्धित्वस्य जन्यतावच्छेदकत्वे समतो
व्यभिचारः स्मृत्यन्यत्वनिवेशे गौरवमिति भावः॥ विशेषणज्ञानादीत्यादिपदं चिंत्यं। कार्यतावच्छेदकभेदेन कार्यकारणभावभेदेपि उपनीतभा
ने प्रत्यक्षत्वस्यावश्यकतामाह स्वरूपतइति। स्वरूपतस्तज्ज्ञानपर्यंतापेक्षां प्रदर्श्योपनीतभाने प्रत्यक्षत्वव्यतिरेकमाशंकते अथेति। तदन्य
विषयकोपस्थितेरित्यर्थः। यत्तु तदितरविशेष्यतानिरूपितप्रकारतान्यतद्विषयताकोपस्थितेरित्यर्थः। विशेष्यभेदेन प्रकारताभेदादुभयविशेष्य
कबुद्धिसंग्रहादिति तन्न। घटोपरावित्यादिसमूहालंबनविलक्षणो घटपटौ द्वाविति ज्ञाने उभयांशे एकधेव द्वित्वादिविशेषणमवगाहमाने
विशेष्यभेदेपि द्वित्वादिप्रकारताया अभिन्नतया घटादीतरपटादिविशेष्यतानिरूपितत्वेन तज्ज्ञानस्य घटौ द्वावित्यादिज्ञानोत्तराजनकत्वप्रसं
गादिति पाठः। तदितरविशेष्यतानिरूपितप्रकारतान्यतद्विषयताकोपस्थितेरिति वा विशेष्यभेदेन प्रकारताभेदादुभयविशेष्यकबुद्धिसंग्र
हात्। न चैवं मात्रपदं व्यर्थं। विशेष्यभेदेन प्रकारताभेदादेवोभयविशेष्यकज्ञानसंग्रहादिति वाच्यं। पटो घटो घटपटौ द्वाविति ज्ञानयोर्वैलक्ष

ग॰टी॰ ३७ 37

णपनिर्वाहार्थं चरमस्थले उभयविशेष्यतानिरूपितद्वित्वनिष्ठप्रकारतायाः आवश्यकत्वात्तादृशज्ञानोत्तरं तादृशविशिष्टबुद्धिनिर्वाहाय
पुरूषं दंडो न वेत्यादिधर्मिविशेषणकसंदेहे समुच्चयवैलक्षण्यार्थं कोटिद्वयविशेष्यतानिरूपितैकप्रकारताभ्युपगमेन तस्य संदेहांतरादि
जनकत्वनिर्वाहार्थं च तदुपादानस्यावश्यकत्वादिति पाठांतरं। तथा च तन्निष्ठविशेष्यतानिरूपितप्रकारतान्यत्वं भेदप्रतियोगिप्रकारता वि
शेषणं मात्रपदार्थ इति भावः। अनुभूयमानारोपस्थलेपीतः शंख इत्यादौ। व्याप्तिरूपविशेषणाभाने लौकिकसन्निकर्षस्यानोपयोग इत्याशं
क्य तद्घटकं च इमं शाभाने तदुपयोगमाह व्याप्तिप्रविष्टेति। अत्र मूले परमते निर्भरः दीधितौ तद्दूषणार्थः न्यायमते वस्तुत इति निर्भर इति न सं
गच्छते दीधितिकृद्भिः सामान्यलक्षणाया निराकरणात्। अतो मतिकाराणां परमतावलंब एव सिद्धांतः वस्तुत इत्यादिकं च तद्बीजप्रदर्शकमि
त्याशयेनावतारयति एकैवेहीति। एवं च वस्तुत इत्यस्य कल्पान्तरत्वासंभवाच्चेष्टे परमार्थत इति सार्वविभक्तिकस्तसिः परमार्थेनेत्यावृत्त।
अत्रैव दीधितौ सामान्यत इति हेतुः समुदायव्यंपमाह ज्ञेनेति। दीधितिकृता व्याप्तित्वेन सामान्यतो व्याप्तिज्ञानमात्रमुक्तं एवं च तत्सत्त्वेपि व्या
प्तिमत्त्वेनव्याप्तिमत्ताज्ञानासत्त्वेनासंगतिं शंकते नचेति। तत्र च धूमत्वांशे चातन्मात्रवृत्तीति धूमत्वमात्रवृत्तीत्यर्थः। द्रव्यत्वधूमत्वान्यतरत्वादि गम॰ ३७
कं पुरस्कृत्य महानसीयधूमवृत्तित्वज्ञाने धूमत्वेन तद्ज्ञानसंभावनया योयत्रेत्यादिनियमभंग इत्याशंकाया वारणाय येत्वेकैवेहीति मूलस्य
व्याप्तिनानात्वपरत्वमाहुस्तन्मतमाह केचिदिति। उपपद्यत इत्यनुशयस्य वक्तुर्बीहि विषयादित्यनुशयबीजस्यात् तथा च प्रयोजनाभावाद्व्याप्ते

रैकं समर्थमिति भावः। आहेति व्याप्तिभेदमित्यादिः। एकैव हीति मूलस्य भावप्रधानमेवव स्तुत इत्यादिकं न तु कल्पांतरावलंबनमित्याशयेन
व्याचष्टे वस्तुगत्येति। इह मूले। एवं च प्रतियोगितावच्छेदकादीनामेकस्य कथनमपरस्य प्रयोजनत्वेन च। आहुरिति अत्रैकसामानाधिकरण्यस्या
न्यसाधारणमित्यस्य प्रयोजकत्वेन च तत्तदीयवह्निसामानाधिकरण्यावगाहिपरामर्शस्याप्यवज्ञानादिना महानसीयवन्यायमित्यनुद
यापत्तिरूढिचिवीजं। योयत्रेत्यादिनियमस्य सत्त्वेपर्वतेवह्नेः प्रत्यानवगमात त्रोपनीतभानानुपपत्तिरित्यत आह पक्षदृत्तिधूमेति। सामान्यप्र
त्यासत्त्वेपर्वतीयचत्वुपनयोऽसिद्ध एवेत्याशयेन सामान्यप्रत्यासत्तिपक्षमालंब्येति न च पृथिव्यामितरभेदानुमितिः साध्याघटितव्या
प्तिविषयकपरामर्शसत्त्वेऽपनयासंभवादुर्वीरैवेति वाच्यं। अभावत्वसामान्यलक्षणया तत्रेतरभेदभानोपगमात् किंचिद्धर्मावच्छिन्नवि
शेष्यकद्रव्यप्रकारकप्रत्यक्षं प्रतींद्रियसंयोगो हेतुरित्याशयेन धूमवान् वह्निमानित्येतावत्पर्यंतं दर्शितावृक्तं अन्यथा वह्निमानित्येतावन्मात्र
स्यैव सम्यक्त्वात्। विजातीयमिति। न च वैजात्योपगमेपि विधेयतास्वीकार्या अन्यथा वह्निमान्पर्वतो घटवानित्यनुमित्यनंतरं वह्निमनुमिनोमी
त्यनुव्यवसायापत्तेः तथा च तदवच्छिन्नकारणतयैव प्रमाणांतरत्वसंभवात् किं वैजात्येनेति वाच्यं। विधेयतया आपत्त्यादिसंधारणतया प्र
माणांतरत्वानियामकत्वे न वैजात्यस्यावश्यकता। तात्प्रत्यक्षत्वस्याप्यप्रामाणिकतयेति। अथानुमितेः प्रत्यक्षत्वानुपगंतृनयेनुमितिसामग्रीका
लेज्ञानसन्निकर्षादिघटितसामग्रीवलात् प्रत्यक्षापत्तिवारणाय प्रत्यक्षप्रत्यनमितिसामग्र्याः प्रतिबंधकत्वकल्पने गौरवं अनुमितेः प्रत्य

ग॰टी॰ ३८ ३५

पर्वतांशे। लौकिकं वह्न्यंशे ऽलौकिकं

प्रत्यक्षत्वनये तु अनुमित्यात्मकप्रत्यक्षस्यैवोत्पादेन तादृशाप्रतिबंधकत्वं न कल्प्यत इति लाघवमित्येव प्रमाणमिति चेन्न। तन्नयेपि अनु
मितित्वस्य चाक्षुषत्वादिविरुद्धत्वमावश्यकं अनुमितिसामग्रीकाले विशेष्ये लौकिकसन्निकर्षादिघटितचाक्षुषादिसामग्र्या अनावश्यक
तया तस्य चाक्षुषत्वादिव्याप्यत्वासंभवात् व्यापकताया अमुदूरपराहतत्वात्तत्करभयेन प्रमाणाधिकरणप्रमाप्यसंभवात् एवं चानुमि
तिसामग्रीकाले चाक्षुषवारणाय तत्र तस्याः प्रतिबंधकत्वमुभयवादिसिद्धमेव प्रत्यक्षत्वावच्छिन्नं प्रति तस्याः प्रतिबंधकत्वं न कस्या
पि विशेषप्रतिबंधकतयैवोपपत्तेरिति भावः। उक्तरीत्यानुमितेश्चाक्षुषत्वाद्यसंभवेपि मानसत्वसंभवात् तद्व्यापकप्रत्यक्षत्वमावश्यकमि
त्याशंकां चानुपदमेव निराकार्येति बोध्यं। अंशप्रसिद्धेति। साध्यतावच्छेदकप्रकारकज्ञानस्य तादृशानुमितौ विरोधित्वादिति भावः। विशेष
णतावच्छेदकप्रकारकधीति अनुमितेः प्रत्यक्षत्वानुपगमे वह्नित्वविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षत्वं तादृशानुमितित्वं द्वयं कार्यतावच्छे
दकमुपेयमिति गौरवं तस्याः प्रत्यक्षत्वे तादृशप्रत्यक्षत्वमेकमेवेति लाघवमित्यर्थः। विशिष्टवैशिष्ट्यावगाहिज्ञानत्वं तु न कार्यतावच्छेद
कं स्मरणसाधारणत्वादिति सूचनाय स्मृतिमावृत्तेति। नापि तादृशानुभवत्वं अनुभवत्वस्य प्रत्यक्षत्वादनन्यत्वात्। अथेश्वरज्ञानव्यावृत्तं विशि
ष्टवैशिष्ट्यावगाहिजन्यप्रत्यक्षत्वं कार्यतावच्छेदकं वाच्यं तत्र च लाघवाद्विशिष्टवैशिष्ट्यावगाहित्वे सति स्मृतिभिन्नत्वमेव तथास्तु तथा
विषयिताया ईश्वरज्ञानेऽनंगीकारेणैवोपपत्तेः मैवं। अनुमितिसाधारणजातिविशेषात्मकजन्यप्रत्यक्षत्वमात्रं कार्यतावच्छेदकमुपेयमेता

राम॰ ३८

दृशाविषयत्वाभावेपेक्षत्वाद्यवात्। नचैवं विशिष्टवैशिष्ट्यानवगाहिजन्यप्रत्यक्षेव्यभिचारः इति वाच्यं। आत्मनिष्ठप्रत्यासत्त्या कारणतात्वोपगमेवि
षयभेदेन कारणतात्वाकल्पनात् प्रकारतानवच्छेदकताघटितसामानाधिकरण्यसंबंधेन निश्चयजन्यप्रत्यक्षत्वावच्छिन्नयोः कार्यकारणभा
वस्यापेयत्वात्। अनुमितित्वाद्यजन्यप्रत्यक्षत्वमेव विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकं अनुमितौ [illegible] तादृशज्ञानहेतुत्वांतरं
नकल्प्यते वह्नित्वादिविशिष्टवैशिष्ट्यावगाहिन्याः पर्वतो वह्निमानित्याद्यनुमितेश्च न वह्नित्वप्रकारकज्ञानविरहकाले आपत्तिः परामर्शस्यैवाभा
वात् परामर्शदशायां च वह्नित्वप्रकारकज्ञानस्यावश्यकत्वादित्याशयेनाह यदि चेति। ननु तादृशपरामर्शं विनापि स्वतंत्रे तन्मेदत्वप्रकारकज्ञान
दशायां साध्याघटितव्यतिरेकव्याप्तिज्ञानवशाद्विशिष्टवैशिष्ट्यावगाह्यनुमित्युत्पत्त्या तादृशपरामर्शविरहे किंचित्कालस्वतंत्रविशेषणतावच्छेद
कप्रकारकज्ञानापेक्षया च तद्धेतुतासिद्धिरित्यत आह स्वतंत्रेति। सर्वत्रेति इतरभेदत्वप्रकारकज्ञानशून्यकालेपि केवलान्वयिविशेष्यविशेषण
मितिन्यायेनैवानुमितिः। स्वतंत्रसाध्यतावच्छेदकप्रकारकज्ञानस्थले प्रसिद्धत्वादिति भावः। अनुमितिरूप्यत इति। विशिष्टवैशिष्ट्यावगाह्यनुमि
तौ व्याप्तिग्रहकाधिकरणांशे विशिष्टसाध्यप्रतियोगिकविलक्षणसंबंधावगाहिपरामर्शनियमादिति भावः। अत्रमानसत्वावच्छिन्नं प्रत्यनुमि
तिसामग्र्याः प्रतिबंधकत्वाकल्पनलाघवानुरोधेनानुमितेर्मानसत्वसिद्धिः। अथ वह्निसाध्यकपरामर्शजन्यानुमितौ घटादिमानस्यानुमवाविरु
द्धतया घटादिमानसेनुमितिसामग्र्या विरोधित्वं मतद्वयसिद्धमेव वन्ह्यादिमानसे तु विरुद्धत्वमतेपि नष्टथाविरोधित्वं भिन्नविषयकत्वमनिवे

गा०टी०
३९
39

शेषवत्सामान्यतो मानसत्वावच्छिन्नं प्रत्येव प्रतिबंधकत्वोपगमादिति न लाघवमिति चेन्न घटमानसं जायतामितीच्छाया उत्तेजकत्वात्तु दोषेण तत्
त्तद्घटमानसत्वादेरेवगतिच ध्यतावच्छेदकतया विरुद्धत्वमतेच वह्निमानसवारणाय पृथक् प्रतिबंधकताया आवश्यकत्वेन गौरवात्। अथ तथा
पि भिन्नविषयकचाक्षुषसामग्री कान्यनुमितिसामग्र्युभयदशायां वह्निमानससामग्र्यभावान्न दनुमितेर्मानसत्वापत्तिः। तादृशचाक्षुषसामग्री
काले कुतो न मानससामग्रीति तु न शंक्यं मानसं प्रति तादृशचाक्षुषसामग्र्या विरोधितात् अन्यथा भिन्नविषयकचाक्षुषीसादकाले नुमित्यन्यमा
नसापत्तेः। न चानुमित्यन्यमानसत्वस्यैव तत्र प्रतिबध्यतावच्छेदकत्वसोपेयतया तदानीं मानससामग्री अक्षतैवेति वाच्यं। अनुमित्यविरोधित
था विधानेन तत्सामग्री प्रतिबध्यतावच्छेदककोटावनुमित्यंशस्याधिकस्य निवेशे महागौरवात्। अनुमित्यन्यमानसत्वस्य तादृशसामग्र्यभाव
जन्यतावच्छेदकत्वे तद्बलादनुमित्युत्पादकाले ऽनुमित्यन्यमानसत्वावच्छिन्नापत्तिवारणाय तदवच्छिन्नं प्रति अनुमितिसामग्र्याः पृथग्विरोधि
ताया आवश्यकत्वाया ताच्च। अत्रेदं समाधानं तादृशानुमितेर्मानसत्वं स्वीकार्यं। न चैवमुक्तरीत्या ऽनुमित्यन्यत्वनिवेशेन गौरवमिति वाच्यं।
। यतः सर्वत्रानुमित्यन्यवन्ह्यादिमानसे पूर्वमुपनायकज्ञानादेः सत्वात् ज्ञानादिमाने विषयादधिकानपेक्षणाच्च। नियमतो वन्ह्यादिज्ञानमानमुपे
यते तत्र च ज्ञानादिलौकिकविषयतानिरूपितवन्ह्यादिविषयताशालिमानसत्वावच्छिन्नं प्रति तादृशविषयताप्रकारकमानसेच्छाविरहविशि
ष्टविरोधिसामग्रीत्वेन प्रतिबंधकत्वान्न भिन्नविषयकचाक्षुषादिसामग्रीदशायामनुमित्यन्यमानसप्रसंगः। एतेन वन्ह्यनुमितिसामग्रीदशायां

गा०म०
३९

वह्निमानसत्त्वप्रकारकेच्छाया असत्त्वे वह्निमानसत्त्ववारणाय सिद्धांतमते वह्निमानसत्त्वप्रकारकेच्छाविरहविशिष्टानुमितिसामग्रीत्वेन वह्निमा
नसत्तावच्छिन्नं प्रतिप्रतिबंधकत्वं वाच्यं । अनुमितेर्मानसत्वनये तु अनुमितिसामग्र्य वह्निमानसत्वं वह्निमानसत्वमात्रस्य तथात्वेऽनुमितित्वप्रकारके
च्छाधीनानुमितेरव्यभिचारादिति प्रत्युक्तं । ज्ञानादिविषयज्ञानमनिवेश्य पर्वतो वह्निमानित्यादिमान [illegible] से वि
रोधिसामग्र्याः प्रतिबंधकत्वस्यैवाकल्पनात् । अनुमितिसम्पत्या निवेशोऽप्यनुमितौ ज्ञानलौकिकभानाभावेनैव व्यभिचाराभावात् । नच वह्निमान
सत्तावच्छिन्नं प्रति वह्निविषयिताप्रकारकमानसेच्छाविरहविशिष्टविरोधिसामग्र्याः प्रतिबंधकत्वे लाघवं तत्र ज्ञानविषयितानिरूपितत्व
प्रवेशे प्रयोजनाभावादिति वाच्यं इच्छालौकिकविषयितानिरूपितवह्निविषयिताशालिमानसं जायतामितीच्छाकाले तादृशविषयिताशा
लिमानससामग्र्यसत्त्वे सत्त्वां च विरोधिसामग्र्यां वह्निमहं जानामीति मानसवारणाय प्रतिबध्यतावच्छेदककोटौ ज्ञानादिलौकिकविषयितां
निवेश्यापि वदर्थितेच्छाया उत्तेजकत्वस्यावश्यकत्वात् । अत्र ज्ञानं न वह्नीयमिति विषयितासंबंधावच्छिन्नबाधबुद्धिदशायां ज्ञानांशे वन्याद्यभानासं
भवाज्ज्ञानादिलौकिकविषयितानिरूपितवन्यादिविषयिताशून्यमानसप्रसिद्धेस्तदनुरोधेनावश्यकप्रतिबध्यप्रतिबंधकभावद्वयवानुमितिस्थले
निवेश्यमिति तु न शक्यं । तत्र ज्ञानांशे वह्निमानासंभवेऽपि वन्यभावभाने बाधकाभावाज्ज्ञानीयलौकिकविषयितानिरूपितवन्यभावादिविषयि
ताशालित्वरूपतादृशवन्यभावादिविषयिताप्रकारकमानसेच्छाविरहविशिष्टविरोधिसामग्रीप्रतिबध्यतावच्छेदकाक्रांततया ज्ञानादिलौ

ग॰टी॰ ५० 50 किंकविषयितामनिवेश्यप्रतिबंधकत्वांतराकल्पनेऽनुपपत्तेः। नच वह्निविषयिताशालिमानसं जायतामितीच्छाकाले विरोधिसामग्रीसत्वे
ज्ञानाद्यविषयकवन्ह्यादिमानसं प्रसिद्ध्यति। ज्ञानादिलौकिकविषयितानिरूपितवन्ह्यादिविषयिताप्रकारकमानसेच्छाविरहेण ज्ञानादिमाना
संभवादिति शंक्यं। यतस्तादृशेच्छानां ज्ञानादिलौकिकविषयितानिरूपितत्वावच्छिन्नवन्ह्यादिविषयिताप्रकारकेच्छात्वेन नोत्तेजकत्वं ज्ञानीयलौ
किकविषयितानिरूपितवह्निविषयिताशालीच्छावृत्तिलौकिकविषयितानिरूपितवह्निविषयितावन्मानसं जायतामितीच्छायाश्च वारणात्। किंतु
ज्ञानेतरलौकिकविषयितानिरूपितत्वावच्छिन्नप्रकारितानिरूपितवह्निविषयितत्वप्रकारतानिरूपितमानसनिष्ठविशेष्यताकेच्छात्वेन तत्तद्व
ह्निविषयकमानसं जायतामितीच्छासाधारण्यमिति हलादेव तत्र ज्ञानादिमानसंभव इति। अथ प्रकृतमनुसरामः। विनश्यदवस्थसन्निकर्षाधीनवन्ह्यादिनिर्वि-
कल्पकं तन्मूलकवन्ह्याद्युपनीतभाने ज्ञानादिमानासंभवः योग्यज्ञानाभावादिति चेन्नहि उपनीतभानमेवाप्रामाणिकं निर्विकल्पकस्यातीन्द्रियत्वेनु-
पनायकत्वमुपेयते इति चेन्नहि विशेष्यतावच्छेदकप्रकारकज्ञानादिसत्वे न तस्य तत्र भानोपगमसंभवात् लौकिकज्ञानमानसस्य तत्संभवः। तत्र च
ग ज्ञानादिविषयितामनिवेश्यप्रतिबध्यप्रतिबध्यप्रतिबंधकभावः। तद्सत्वे तु निर्धर्मितावच्छेदकत्वमेव वह्निमानं लौकार्यतत्प्रतिबध्यतावच्छे ग॰म॰
दककोटौ च निधर्मितावच्छेदककत्वं निवेश्यं अन्यथा पर्वतत्वावच्छिन्ने वह्निमानसं जायतामितीच्छाधीनमानसे व्यभिचारात्। तादृशेच्छासत्वे विरो -५०
धिसामग्रीदशायां पर्वतत्वावच्छिन्नविशेष्यताप्रयोजकपर्वतत्वप्रकारकज्ञानसत्वे निधर्मितावच्छेदककमानसवारणाय निधर्मितावच्छेदकक

यानसस्थलीयप्रतिबंधकतायां तादृशेच्छाया वृत्तत्वरूपेणैवेच्छायाउत्तेजकत्वस्योपगंतव्यत्वात् तथा चानुमित्तेर्निर्धर्मितावच्छेदककत्वाभावेन वा।ता
दृशभावात्काऽनुमित्स्यमत्वनिवेशप्रसंगः। अथ विरोधिसामग्रीसत्त्वे पर्वतविषयितानि(रू)पितवह्निविषयिताशालिमानसं जायतामितीच्छासत्त्वे वह्निः पर्व
तस्य च विशकलितज्ञानस्थले ज्ञानांशे केवलवह्निविशेषणकमानसं न संभवति तादृशमानसस्थलीयविरोधिसामग्रीप्रतिबंधकतायां तदिच्छाया
वृत्तत्वरूपेणैवेच्छायाउत्तेजकत्वस्योपगंतव्यत्वात् अन्यथा तादृशविरोधिसामग्रीसत्त्वे पर्वतभासकज्ञानायसत्त्वे वह्निं जानामीति मानसापत्तेः। नापि ज्ञानां
शे वह्निविशिष्टपर्वतवैशिष्ट्यावगाहिमानसं। वह्निमान् पर्वत इत्यत्र तादृशविशेषणतावच्छेदकप्रकारकनिर्णयसत्त्वात्।। नापि केवलं विशेष्ये विशेषण
मिति रीत्या वह्निमत्पर्वतं जानामीति विशिष्टविशेषणकं विषयांशे विशिष्टवैशिष्ट्यानवगाहिज्ञानादिप्रसक्षस्यानंगीकारात्। नापि केवलपर्वतविशे
षणकज्ञानमानसं तादृशमानसस्थलीयविरोधिसामग्रीप्रतिबंधकतायामपि दर्शितेच्छाया अनुत्तेजकत्वात् अन्यथा विरोधिसामग्रीसत्त्वे तदिच्छास
त्त्वे वह्निभासकज्ञानायसत्त्वे पर्वतं जानामीति मानसप्रसंगात्। तथा च कथमपि तन्न ज्ञानमानां संभवात् ज्ञानविषयतादृशमानसानुरोधेन ज्ञानादिवि
षयितामनिवेश्य सामग्र्याः प्रतिबंधकत्वं तत्साधकमते ऽनुमित्सत्वनिवेशः प्रसज्यत इति मैवं तत्र वह्निमत्पर्वतविषयकज्ञानादिभासकसामग्र्या वि
शेषसामग्रीत्वादेव तत्र पर्वतो वह्निमानिति मानसानुत्पत्तिसिद्धेः। अथ तस्याप्यनुमितेर्मानसत्वमसिद्धमेव अनुमितिकाले ज्ञानादिलौकिकविषयता
शालिवन्त्यादिमानसवारणाय तादृशमानसेऽनुमितिसामग्रीप्रतिबंधकताया विरुद्धत्वत्वादिनापि स्वीकारेण ज्ञानादिविषयतामनिवेश्य प्रतिबंध

गा०टी० ४१ ५१

कत्वांतरस्यतेनानुपगमे न च लाघवासंभवात्। तन्मतेपि ज्ञानविषयकमानसानुपगमे क्षतिविरहात्। न च विषयविशेषे समानविषयकलौकिक
प्रत्यक्षादिसामग्रीकालेऽनुमित्सावलादनुमितिर्न कदापि जायेत तत्रानुमित्साया उत्तेजकत्वाभावादनुमितिमानसोभयसाधारण तद्विषयकमा
नसत्वावच्छिन्नं प्रतिताद्दशसामग्र्याः प्रतिबंधकत्वमेकमेवेत्यनुमितेर्मानसत्वस्यैव लाघवं विरुद्धत्वनयेऽनुमितित्वमानसत्वयोः प्रतिबध्यतावच्छे
दकतया तद्द्वयमिति गौरवादिति वाच्यं। तर्हि विरुद्धत्वमतेपि विषयविशेषे लाघवसंभवात् तादृशविषयकसमानविषयवत्त्वाच्चाक्षुषसामग्रीकाले
अनुमित्सयानुमानसं न जातं किं त्वनुमितिरेव तत्र तन्मानसत्वमते विनिगमनाविरहादित्येषसामग्री प्रतिबध्यतावच्छेदकमनुमितित्वं मानस
त्वं वेति द्वयं विरुद्धत्वमते त्वनुमितित्वमेव मानसत्वासंग्रहे विक्षतिविरहादिति चेन्न। समानविषये लौकिकप्रत्यक्षसामग्री प्रतिबध्यतावच्छेद
कं विरुद्धत्वमते मानसत्वमनुमितित्वं चेति द्वयं तन्मानसत्वमतेनुमानसत्वमेकमेवेति लाघवात्। न च विरुद्धत्वमते लौकिकप्रत्यक्षान्यज्ञानत्वमेव तदि
ति वाच्यं। तादृशप्रत्यक्षान्यत्वज्ञानत्वयोर्विशेष्यविशेषणभावेन कार्यकारणभावभेदात् सादिरीत्या तन्मानसत्वसिद्धौ लाघवं दर्शयति समानविष
यकेतिद्व्यगिति। अनुमितिसामग्र्यसत्वे मानसत्वावच्छिन्नं प्रतिताद्दशसामग्रीप्रतिबंधकतायास्तन्मतसिद्धत्वादिति भावः। तादृशसामग्रीति। समा राम०
नविषयकमानसत्वप्रकारकेच्छाचनाग्रे नेजिकेतिवक्ष्यामः। अन्ये तन्मानसत्वमते कथितशाब्दादिसामग्र्याः भिन्नविषयकानुमित्सन्यमान
संप्रतिताद्दशमानसेच्छामुत्तेजकीकृत्य पृथक्प्रतिबंधकता येषां तेविरुद्धत्वमतेपि तदावश्यकतया गौरवाभावादित्याहुः अभिन्नेति। अतिप्र ४१

संगमयेनेति। समानविषयकानुमितिसामग्रीविरहदशायां तादृशानुमितित्वप्रकारकेच्छासत्त्वेऽनुमिसन्यमानसाप्तिमयेनेऽस्यर्थः। न चानुमि
तिसामग्रीविशिष्टतादृशेच्छाया उत्तेजकत्वमुपेयं तावताप्यतिप्रसंगवारणासंभवादिति वाच्यं। महागौरवात्। अत्र कथितशाब्दादिसाम
ग्रीकाले भिन्नविषयकानुमित्युत्पत्तये तत्सामग्र्या एव प्रावल्यात्तत्सरत्वेन तच्छंकायाः इति वो ध्यां जाते सनेनानुमितित्वावच्छिन्नं प्रति अनुमि
तित्वप्रकारकेच्छायुत्तेजकीकृत्य कथितसामग्र्याः अनुमितिप्रतिबंधकत्वमुपेतमिति सूचितम्। अस्तस्यामिति। मानसत्वप्रकारकेच्छासत्त्वे
कथितशाब्दादिसामग्रीसत्त्वेऽनुमित्स्यमानसोत्सर्घतादृशेच्छाया उत्तेजकत्वमुपगंतव्यं एवं च सत्सां तस्यामनुमित्सनुपपत्तिर्नसंभवती
ति अस्तसामित्युक्तं। आत्मत्वभानोपगमेनेति। ननु अनुमित्स्यमानसेतर्वेत्रनासत्वभानोपगमसंभवः कामिनीजिज्ञासाकालीनमानसेतनज्ञानासंभवा
त्कामिनीभिन्नज्ञाने कामिनीजिज्ञासाया विरोधित्वात्। न च तादृशमानसस्य विरोधिसामग्र्यप्रतिबध्यत्वेकाप्तिः तत्रेच्छाया हेतुत्वेनेच्छां विना विरो
धिसामग्रीकाले तदायस्यसंभवादिति वाच्यं इच्छाविषयकप्रत्यक्षे एव इच्छाया हेतुत्वेन तत्रानुत्पत्तयाऽइच्छाया अपि भानासंभवेन तत्रेच्छाया अन्यथा
त्वादिति चेन्न। कामिनीभिन्नविषयकप्रत्यक्षत्वेन कामिनीजितासाप्रतिबध्यतावच्छेदकं कामिनीज्ञानस्यापि तद्भिन्नकामिनीत्वतत्संबंधाद्यवगाहि
त्वात् किंतु कामिनीविषयिताभाववद्वृत्तिविषयितावज्ज्ञानत्वमेव साक्षात्संबंध्या कामिनीविषयितानिरूपितायाविषयितानकामिन्यविषयक
वृत्तिः। इत्थं च कामिनीजिज्ञासाकाले कामिनीमहं जानामीत्यात्मत्वविषयकज्ञानोत्पत्तौ बाधकाभावः। न चात्मत्वादेः प्रागनुपस्थितौ कामिनीमहं जा

ग.टी. नामीति ज्ञानं न संभवति विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वादित्यात्मत्वांशे निर्विकल्पकमानं नं वाच्यं तद्धकामिनी जिज्ञासाप्रतिबध्यमेव। आत्म
४२ त्वीयनिर्विकल्पकविषयिताया: कामिन्यविषयकज्ञानसाधारण्यादिति वाच्यं। आत्मत्वादिविशिष्टबुद्धौ विशेषणज्ञानत्वेन हेतुत्वे प्रमाणाभावेन
प्रथमात एवोक्तविशिष्टबुद्धिसंभवादिति। अथवा विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य विशिष्यकार्यकारणभावकल्पने गौरवाद्विशेष्यतान्यप्र
42 कारतासंबंधेन ज्ञानत्वावच्छिन्नं प्रति विशेष्यतान्यविषयतासंबंधेन ज्ञानत्वेन हेतुत्वमेवोपे —यते विशेष्यतासंबंधेन परामर्शं प्रति पर्वते प्रकारता
संबंधेनानुमित्यादिविरहाद्व्यभिचार इति कारणदिशि विशेष्यतान्यत्वनिवेशः। बदीयाकमिते तिशाब्दबोधस्य प्रकारतासंबंधेन घटे सत्त्वात्तन्निरुक्त
संबंधेन पदार्थोपस्थितेरभावाद्व्यभिचार इत्यतः कार्यदिशि प्रकारतान्यत्वनिवेशः। संसर्गे व्यभिचारवारणाय प्रकारतानिवेशः। विशिष्टविशेषणक
ज्ञानेपि विशेषणतावच्छेदकप्रकारकनिर्णयोऽपेक्षित इति नानुपपत्तिः परंतु नरसिंहाकारज्ञानानुपगमात्कामिनीज्ञानस्यात्मत्वांशे निर्विकल्प
कत्वमलीकमेवेति नानुपपत्तिः॥ अथवा निर्विकल्पकेपि घटत्वादिभानादिति आदिपदघटितपाठपर्यालोचनया आत्मत्वनिर्विकल्पके का
मिनीज्ञानवानात्माविशेषणत्वं तरवान्वा आत्मा भासते इत्युपेयं तत्र चात्मत्वविषयिताने केति कामिनीविषयतासमानाधिकरण्यात्मत्ववि
षयता कामिन्यविषयकज्ञाना वृत्तिरेवेति ग्रंथे लौकिकविषयितासंबंधेनेत्युपलक्षणं निर्विकल्पीयविषयितासंबंधेनात्मत्वस्यापि पृथक्प्रति ग.म.
बध्यतावच्छेदकत्वस्यावश्यकत्वात्तावतापि लाघवानपायात् निर्विकल्पीयविषयितायां वा लौकिकत्वस्वीकारात् न च कामिन्यविषयकज्ञानवृत्ति ४२

विषयतायाः कामिनीजिज्ञासाप्रतिबध्यतावच्छेदकत्वे कामिनीजिज्ञासादृशायां विनैव रूपवत्कामिनीज्ञानं जायतामितीच्छां रूपवती कामि
नीतिज्ञानापत्तिरिति वाच्यं। तादृशाज्ञानं प्रति रूपविशिष्टकामिनीजिज्ञासाविरहविशिष्टकामिनीजिज्ञासायाः पृथक्विरोधितात्वान च सुखु
स्यनंतरं विनष्टदंडस्य सन्निकर्षजन्यवन्ह्याद्युपनीतभाने आत्मत्वभानासंभवात् आत्मत्वस्य विरोधिसामग्रीप्रतिबध्यतावच्छेदकत्वं न संभव
तीति वाच्यं। तथा विशेषोपनीतभानस्यैवाप्रामाणिकत्वात्। अथ विरोधिसामग्रीदशायां वन्हेः पर्वतस्य च विशकलितज्ञानसत्त्वे पर्वतविष
यितानिरूपितवन्हिविषयिताशालिमानसं जायतामितीच्छासत्त्वे पूर्वदर्शिततरीत्या तादृशमानासंभवात् आत्ममानसमपि न स्यात् योग्यविशेषगुणा
विनिर्मोकेण तद्भानात्। एवं च तन्मानसस्यात्मत्वविषयकतया आत्मत्वस्य विरोधिसामग्रीप्रतिबध्यतावच्छेदकत्वं दुर्वारमिति चेदेवं मानस
स्यलौकिकविरोधिसामग्रीप्रतिबंधकतापादिच्छाया उत्तेजकत्वमेव न कल्प्यते तथा सति विषमभेदेन प्रतिबध्यप्रतिबंधकभावानंत्यापत्तेः किं
तु विषयत्वविषयितोभयसंबंधेनेच्छावदन्यत्वमेवेच्छाभानपदस्य सव्यभिचारात्तानायतनत्प्रतिबध्यतावच्छेदकं भवति च वर्तमानसंज्ञा
यतामिस्ये तादृशेच्छोत्तरकालीनघटादिगोचरनिखिलमानसस्य तादृशेच्छाविषयकत्वं तादृशेच्छायाः तत्राकृत्स्नेऽनियमतः सत्त्वात् तथात्वे
बाधकाभावादिति तादृशमानसे विषयत्वविषयितोभयसंबंधेनेच्छावत्त्वं। विषयतानिवेशात् परमानसेच्छाविषयकघटादिविषयकमा
नसस्य नासंग्रहः। निखिलानामेव मानसानां कालांतरीयेच्छाविषयतया विषयतासंबंधेनेच्छावदन्यमानसाप्रसिद्धिरतो विषयितानिवे

ग॰टी॰ ४३ 53 शः एवं चोपदर्शितस्थले पर्वतो वह्निमानित्यादिमानसे वह्नीयत्वेन ज्ञानादिमाने बाधकाभावः तथा सत्युक्तोभयसंबंधेन तत्रेच्छावत्त्वस्यास
त्तया विरोधिसामग्र्यभावहेतुतायां व्यभिचाराप्रसक्तेरिति। अथोक्तोभयसंबंधेनेच्छावदन्यत्वस्य कार्यतावच्छेदकत्वे इच्छां विनापि विरो
धिसामग्रीकाले मानसत्वरूपसामान्यधर्मावच्छिन्नापत्तिर्दुर्वारैव। इच्छाकालीनफलस्य विरोधिसामग्र्यभावकार्यतावच्छेदकानाक्रांततया
तदुत्पादप्रयोजकसामग्र्या असत्त्वादिति चेन्न। इच्छाधीनमानसस्येच्छाविषयकतया तत्तद्विषयविधेयेच्छायाश्च पि हेतुत्वात्तदुत्पादप्र
योजकेच्छाघटितसामग्र्या इच्छाविरहकालेऽसत्त्वात्। अथ प्रत्यक्षं प्रति विषयत्वेन हेतुत्वमते इच्छाविरहेपि विषयसत्त्वावच्छिन्नघटितसामग्री
संभवः। इच्छाप्रत्यक्षे इच्छात्वेन हेतुत्वं तु न संभवति चाक्षुषेच्छासत्त्वेपि मानसेच्छासत्त्वेपि घटज्ञानासत्त्वे घटमानसापत्तेः। इच्छाघटितसामग्र्या
असत्त्वादिति चेन्न। घटमानसेच्छादिविषयकप्रत्यक्षत्वावच्छिन्ने घटमानसेच्छात्वादिना हेतुत्वमुपेत्य सकलदोषाणां वारणीयत्वात्। अत्र
विषयभेदेनेच्छायाः निखिलमानससाधारणरूपेण सामग्र्यभावानां च हेतुत्वमेव सम्यक्। विषयभेदेनेच्छाविरहविशिष्टसामग्र्यभावहेतुत्वे
इच्छाया उत्तेजकतयानंतसामग्र्यभावानां विषयभेदेन हेतुतानामानंत्यापत्त्या महागौरवात्। पक्षतानंजायतामित्याद्यननुगतेच्छानां पर्वतो
वह्निमानितिमानससामग्रीघटचाक्षुषसामग्रीसत्त्वे मानसापत्तिवारणाय चाक्षुषसामग्र्यभावकालीनानां तत्तद्व्यक्तित्वेन कारणत्वे गौरवादि राम॰
च्छोत्तेजकत्वकल्पो युक्तः इति तन्न। अनुगतेच्छाभावानंतानननुगतेच्छाभावानां परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेणाति ४३

महागौरवान्नायमनुः इच्छानश्वरीयत्वादिबाधदशायामनिच्छामानसंभवः इच्छादीनां विषयोपधानेनैव भानादिति तज्ज्ञानमिच्छाविषयकत्वस्ये
च्छाधीनमानससंभवइति तत्र व्यभिचारात् इच्छावद्भिन्नत्वस्य निवेशितस्य मनःप्रभानकार्यतावच्छेदकत्वसंभवइति तत्तुच्छं। निर्धर्मितावच्छेदकक
ज्ञानस्य बाधबुद्ध्यप्रतिबध्यतया तादृशबाधकालेपि विषयांशे निर्धर्मितावच्छेदककेच्छाभाने बाधकाभावान्निरुक्तसंबंधेनेच्छावद्भिन्नत्वस्य त
थात्वस्यास्तु प्रसक्त्यादिति। अनुमितेरुपपादनादिति। अनुमितावात्मत्वनिरूपितलौकिकविषयिताविरहेण व्यभिचारान्नवकाशादिति भावः। ए
वं प्रतिमानसत्वस्यैव विलयापत्तिरिति चेदस्तु आत्मत्वविशिष्टप्रत्येवानुमितिसामग्र्या अपि प्रतिबंधकत्वस्य सुवचत्वात्। अथ ज्ञानत्वमेव लौ
किकवि[illegible]षयितासंबंधेन प्रतिबध्यतावच्छेदकं कुतो नोक्तमेवं कृतिसाक्षात्कारात्पूर्वं नियमतो ज्ञानासंभवात् ज्ञानत्वाविषयकस्यापि तस्य संभ
वेन तदसंग्राहकत्वेन तन्न्यायात्। इच्छाकृत्योरेवोपनायकतया विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकगुणत्वेन हेतुतया च ज्ञाना
नपेक्षणात्। अस्तु वा कृतिमानसेपि तज्ज्ञानापेक्षा तथापि सुखमानसे न तन्नियम इति तदसंग्राहकत्वात्। अत्र घटं साक्षात्करोमीति प्रतीतिर्नलौ
किकविषयित्वसाधिका तस्या घटप्रत्यक्षाव्यवहितेपि अनुमित्साधनंतरं तद्वारणासंभवात्। अथ घटोपनीतभानोत्तरे तदापत्तिः तत्र लौकिक
सन्निकर्षजन्यप्रत्यक्षस्य हेतुत्वे तु गगनाद्युपनीतभानोत्तरं गगनं साक्षात्करोमीत्यनुव्यवसायापत्तिः तादृशप्रत्यक्षाप्रसिद्ध्यात्र कार्यकारणभा
भावस्यैव कल्पयितुमशक्यत्वात् अप्रसिद्ध्या कथमापत्तिरिति वाच्यं। साक्षात्कारो नश्वरीय इति बाधबुद्धिदशायां घटं साक्षात्करोमीत्यनुव्य

ग॰टी॰
४४
९५

वसायधारणार्थं तथा विधानुव्यवसायं प्रति घटत्वादिविषयभेदेन प्रतिबंधकत्वं न कल्प्यतेनंतप्रतिबंधकताप्रसंगात् । किंतु लाघवात्स्वीयप्र
त्यक्षत्वावच्छिन्नविशेष्यतानिरूपितविषयतासंबंधावच्छिन्नप्रकारतावच्छेदकतासंबंधेन लौकिकमानसत्वावच्छिन्नं प्रति स्वीयप्रत्यक्षत्वा
वच्छिन्नविशेष्यतानिरूपिताभाववनिष्ठप्रकारतानिरूपितविषयतासंबंधावच्छिन्नप्रतियोगितानिरूपितानुयोगितासंबंधावच्छिन्नप्रकार
तावच्छेदकतासंबंधेन निर्णयस्य प्रतिबंधकत्वोपगमात् गगनत्वे तादृशसंबंधावच्छिन्नबाधाभाववत्त्वान्मानसापत्तौ फलतो गगनं साक्षा
त्करोमीति प्रतीत्यापत्तिसंभवात् । न चानुव्यवसायं प्रति लौकिकसन्निकर्षजन्यव्यवसायस्य विषयभेदेन कारणत्वे महागौरवात्स्वीयप्रत्यक्षत्वाव
च्छिन्नविशेष्यतानिरूपितविषयतासंबंधावच्छिन्नप्रकारतावच्छेदकतासंबंधेन मानसत्वावच्छिन्नं प्रति स्वाश्रयवृत्तित्वसंबंधेन लौकिकप्रत्यक्ष
सामग्र्याः कारणत्वात् गगनत्वे तद्विरहेण न तादृशप्रतीत्यापत्तिरिति वाच्यं । विनश्यदवस्थसामग्रीजन्यव्यवसायाद्यनुव्यवसायोदयेन व्यभिचा
रात्तादृशकारणताया एवासंभवात् अनापत्त्या विषयं निवेश्यैव व्यवसायानुव्यवसाययोः कार्यकारणभावात्तदापत्तिवारणासंभवात् । लौकिक
विषयतास्वीकारे तु स्वीयप्रत्यक्षत्वावच्छिन्नविशेष्यतानिरूपितलौकिकविषयतासंबंधावच्छिन्नप्रकारतावच्छेदकतासंबंधेन लौकिकमानसं
प्रति लौकिकविषयतावच्छेदकतासंबंधेन व्यवसायस्य हेतुता गगनत्वादौ तादृशकारणाभावान्न तदापत्तिरिति लौकिकविषयतासिद्धिर्निष्प्रत्यू
हैव । यदि च बाधाभावस्योक्तरीत्या कारणत्वं न कल्प्यते नाप्यतिरिक्तलौकिकविषयता किंतु साक्षात्कारेण घटीयः न पटीय इत्यादिबाधकानां नाम स

एम॰
४४

मवायेन प्रतिबंधकत्वमेव लघुत्वात् तथा च गगनं साक्षात्करोमीति प्रतीतेरलीकत्वमेव नापत्तिसंभव इत्युच्यते। तदाप्याह सौरभं न पश्यामीति। ननु
लौकिकसन्निकर्षाधीनविषयतायामेव चाक्षुषत्वसाक्षात्कारत्वावच्छिन्नत्वमुपेयते अन्यत्र ज्ञानत्वावच्छिन्नत्वं तावतापि घटाद्युपनीतभानानंतरं
घटं साक्षात्करोमीति न प्रत्ययः सौरभं न पश्यामीति प्रत्ययश्च चाक्षुषत्वाद्यवच्छिन्नविषयितायाः सौरभमनिरूपितत्वादिति लौकिकविषयितावैयर्थ्य
मिति चेदत्राहुः। घटाद्युपनीतभानानंतरं घटो न साक्षात्क्रियत इति प्रतीत्यन्यथानुपपत्त्या तत्सिद्धिः। तत्प्रतीतेः साक्षात्कारत्वावच्छिन्नविषयिताविर
हविशिष्टप्रसक्तमुख्यविशेष्यकत्वे प्रथमांतघटपदोल्लेखासंगतेः। तादृशविषयितानिरूपकत्वाभावविशिष्टघटमुख्यविशेष्यकत्वे कर्माख्यातपदा
संगतिः। अस्माकं तु साक्षात्कारनिरूपितलौकिकविषयिताभावविशिष्टघटमुख्यविशेष्यकत्वेन नानुपपत्तिः। न चातिरिक्तविषयितोपगमेऽपि निर्विकल्प
के सन्निकर्षप्रयोज्यानिरवच्छिन्नविलक्षणविषयताया आवश्यकीत्वे व्यवसाये स्वीकार्या सन्निकर्षसत्त्वात् एवं च घटाद्युपनीतभानोत्तरं घटो न साक्षात्क्रि
यत इति न प्रत्ययः। उपनीतभाने निरवच्छिन्नविषयताविरहात्। न चैवं जातिमानिति प्रत्यक्षेऽपि निरवच्छिन्नघटत्वविषयत्वापत्त्या स्वरूपतो घटत्वविशि
ष्ट[illegible]बुद्धिप्रसंग इति वाच्यं। स्वरूपतस्तद्विशिष्टबुद्धिं प्रति विशेष्यताभिन्नतन्निष्ठप्रकारताकान्यत्वविशिष्टतन्निष्ठविशेष्यताकत्वाभावविशि
शिष्टतन्निष्ठविषयतावज्ज्ञानत्वेन विशेष्यतान्यतन्निष्ठप्रकारतानवच्छिन्नतन्निष्ठविषयतावज्ज्ञानत्वेन वा हेतुतायां तन्निष्ठविशेष्यताकत्वे वैशि
ष्ट्यांतन्निवेशाज्जातिमान् घटत्वांश्चेत्यादिज्ञाने संग्रहः। लाघवभानेऽलौकिकविषयतासिद्धिस्तु अपसिद्धांतग्रस्तेति चेन्न। घटत्वेन नेमं साक्षात्करो

ग.टी.
४५
55

मीतिप्रतीत्यनुरोधेन तत्सिद्धेः। घटत्वावच्छिन्नघटनिष्ठलौकिकविषयतातदभाववयोरेव तत्र भानात् निरवच्छिन्नतद्विषयत्वभानोपगमे घटत्वेनेसाक्षात्का
रकत्वानुपपत्तेः। न च तत्र घटत्वनिष्ठप्रकारकतानिरूपितेदंत्वावच्छिन्नविशेष्यताकत्वसामानाधिकरण्येनेदंपदार्थवृत्तिनिर्विकल्पकीयविषयताक
त्वादिकमेव विषयोऽस्त्विति वाच्यं। तथा सति घटत्वादिलौकिकप्रत्यक्षोत्पादकसंस्थानविशेषावच्छिन्नलौकिकसन्निकर्षासत्त्वे घटादौ कथंचिच्चक्षुः
संयोगसत्त्वे घटत्वेनैतद्घटज्ञानसत्त्वे परे तद्व्यक्तित्वेनैतद्व्यक्तेरलौकिकं घटत्वेन तद्व्यक्तेरूपनीतभाना[illegible]त्मकं प्रत्यक्षं तदुत्तरं घटत्वेनेमं साक्षात्क
रोमीति प्रत्यक्षापत्तेः घटत्वेन नेमं साक्षात्करोमीति प्रत्यक्षानुत्पत्तेश्च तत्र घटत्वनिष्ठप्रकारतानिरूपितेदंत्वावच्छिन्नविशेष्यताकत्वेदंपदार्थवृत्ति
निर्विकल्पकविषयताकत्वयोः सत्त्वात्। न च घटत्वनिष्ठनिर्विकल्पकीयविषयताकत्वविशिष्टतादृशविशेष्यताकत्वसामानाधिकरण्येन तत्तद
भावादिकं विषयः संस्थानसन्निकर्षाभावेन तत्र निर्विकल्पकीयघटत्वनिष्ठविषयताकत्वाभावेन तदापत्तिवारणादिति वाच्यं। तत्रैव व्यक्त्यंतरे सं
स्थानसन्निकर्षवशे[illegible]नानंतरं विशेष्यकघटत्वलौकिकसमूहालंबनरूपतथाविधप्रत्यक्षोत्तरमेव घटत्वेनेमं साक्षात्करोमि घटत्वेन नेमं साक्षा
त्करोमीत्यनुव्यवसाययोरुपपादनीयत्वादिति एतदभिप्रेत्यैव लौकिकत्वाख्येति। घटवान् अयं घटो ज्ञेसादिव्यवसायसाधारण्यानुरोधाद्विशेष्यता
प्रकारताद्रूपैवेयं। एवं लौकिकविषयितानामनुगमकं लौकिकविषयितात्वमप्यनुगतप्रतीत्यनुरोधेन उपेयं न तु लाघवेन तथा सति धूमादिप राम०
रामर्शीयपत्किंचिद्विषयिता— अखंडधर्मस्वीकारेणोपपत्तौ व्याप्त्यादिविषयतानां कारणतावच्छेदकत्वविलयप्रसंगात्। प्रत्यक्षत्वावच्छिन्नविष ४५

यितात्वे न नानुगमसंभवः चाक्षुषत्वाद्यवच्छिन्नविषयितात्वकल्पनापत्त्या महागौरवप्रसंगात्। अन्यथा गंधो न दृश्यते रसो नाघ्रायते शब्दो न दृश्य
ते रूपं न श्रूयते किंतु साक्षात्क्रियते इत्यादिप्रत्ययानामनुपपत्तेरिति। चाक्षुषादिभेदेऽपि लौकिकविषयिता एकजातीयैवेत्याह तद्विशिष्टेति। सौरभं पश्य
श्यामि सादि प्रतीतिवारणाय चाक्षुषत्वस्य तद्विशिष्टत्वस्य च निवेशः। एवं पश्यामीत्याद्यनुव्यवसायमत्तद्विशिष्टवैशिष्ट्यावगाहित्वेन ज्ञानं विषयिताचे
त्यतस्तदनुदयात्। अनुपस्थितविषयिताभानपक्षेऽप्येवमेव फलसाम्यानुरोधादिति सूचनाय विशिष्टपदं। चाक्षुषेति यद्यपि घ्राणजादिनिष्ठसौ
रभीयलौकिकविषयिताप्रसिद्ध्यानन्दभावोऽपि संभवति तथापि गगनं न पश्यामीत्यादिस्थले तथाविधत्वाद्बाधाभावे न तत्रैवोक्तं पादर्शं विषय
विशेषयस्य लौकिकं प्रत्यक्षमेव तादृशविषयविशेषं नानुमिनोमीत्यत्र लौकिकविषयताभावस्यानुमितौ विषय इति अर्थ इति। नञः सत्त्वे यत्र विशे
षणतद्विशेषणयोरुभयोर्बाधः तत्र तद्बाधद्वयमेवैकेन नञा गम्यते तेनांधो घटं न पश्यति सचक्षुराकाशं न पश्यतीत्यादौ नञर्थस्य द्वेधाभानप्रसंगः नापि
सचक्षुर्घटं पश्यतीत्यादौ प्रमात्वप्रसंगः। न च सचक्षुर्घटं न पश्यतीत्यत्रापि प्रमात्वमेवोपेयते कं तुयीवादिमान् नातीत्यादावेव नञ् प्रतीतेर्भ्रमत्वसंभ
वादिति वाच्यं। तथा सति तत्र सकलजनसिद्धभ्रमत्वोच्छेदापत्तेः। एवं घटो न घटजनको दिशादावपीति। प्रतीत्यनुरोधेनेति। अत्र घटादिप्रत्यक्षविषयक
लौकिकमानसत्वावच्छिन्नं प्रति लौकिकसन्निकर्षजन्यघटादिव्यवसायत्वेन न हेतुत्वे गौरवात् लाघवबलेन तत्र घटत्वावच्छिन्नलौकिकविषयिताशालि
निश्चयत्वेन हेतुतायामुपेक्षातिरिक्तविषयतासाधनेऽपसिद्धान्तः स्यात्। अन्यथा धूमालोकादिपरामर्शेषु अतिरिक्तविषयतामुपेत्यैव लाघवेन वन्ह्याद्यनु

ग॰टी॰
४६
५८

मितिहेतुत्वसंभवात्कारणाव्यवहितोत्तरत्वस्यास्मादिविषयत्वे च प्रवेश्य कार्यकारणभावस्य समस्तनिबंधकारसंमतस्योच्छेदापत्तेरिति लाघवानुरोधसा
गः। यत्तु लाघवेन चक्षुःसंयोगादिजन्यतावच्छेदकतया लौकिकविषयतासिद्धिरन्यथा तत्रोपनीतभानादेर्व्यभिचारादिति तन्न चक्षुःसंयोगादिरू
पकारणानां विशिष्यैव तत्तत्कार्यतावच्छेदकत्वात् अन्यथा मंडूकवसाञ्जनादिदोषविशेषाधीनलौकिकविषयिताशालिन्युग्रधूमे व्यभिचारापत्तेः। उ
क्तां साक्षात्करोमीतिप्रतीत्या तत्रापि लौकिकविषयतासत्त्वात् न च चक्षुःसंयोगशून्ये रूपादौ तद्विशिष्टप्रत्यक्षोत्पत्त्या व्यभिचार इति वाच्यं। स्वविषयत्वस्या
व्यवहितपूर्ववर्त्तितावृत्तिचक्षुःसंयोगवृत्त्युभयसंबंधेन वा स्वविषयत्वावच्छिन्नं प्रति चक्षुःसंयोगत्वेन हेतुत्वात् युक्ततरमेवेति। अनुमितेर्मानसत्वनयेऽपि व
न्याय्यनुमितिकाले घटादिमानसलौकिकविषयितासंबंधेनात्मत्वावच्छिन्नं वा न जायत इति स्वीकार्यं। अथ घटत्वावगाहिवह्न्यनुमित्यात्मकमानसोत्प
देर्बाधकाभावः न च तदुत्तरं घटमेकं जानामीत्यनुव्यवसायापत्तिरिति वाच्यं। अनुमितिवृत्तिविषयतासंबंधेन तादृशानुव्यवसायं प्रति विधेयता
निरूपकज्ञाननिरूपितघटादिविषयतात्वेनोद्देश्यविधेयत्वेऽनुगम्यतादृशविषयतानिरूपकव्यवसायस्य तादात्म्यसंबंधेन हेतुत्वेन तादृशानु
मितेस्तथाविधघटादिविषयित्वानिरूपकतादृशानुव्यवसायापत्त्यभावात् न चानुमितिवृत्तिविषयतयानुसत्तावयि सामान्यतो विषयतासं
बंधेनानुमितिभिन्नज्ञाने तादृशानुव्यवसायोत्पत्तेः तादृशसंबंधेन तत्तदापत्तिर्दुर्वारैवेति वाच्यं। अनुमितिभिन्नवृत्तिविषयतासंबंधेनानुव्य
वसायं प्रति अनुमितिभेदहेतुत्वांतरस्य त्वयैवस्वहमितत्वात् एवं च सामान्यविषयतासंबंधेन कार्योत्पादकसामग्र्या अनुमितिवृत्तिविषय

राम॰
४६

तातद्भिन्नवृत्तिविषयताख्यपरसंबंधेनानुव्यवसायोत्पादकसामग्रीसहिताया एव कार्योत्पादकत्वान्न दोष इति चेन्न। अननुव्यवसीयमानविषयविषयि
ताया अप्रामाणिकत्वात्। अनुमितौ घटभानासिद्धेः तद्धारणार्थं च सामान्यत एव मानसं प्रति अनुमितिसामग्र्याः प्रतिबंधकत्वमुपेयं न तु घटा
दिमानसे एव स्यात् घटानुमितिसामग्र्याः महागौरवादिति। सन्निकर्षविरहादिति च मौलप्रक्रियया तत्र विवक्षितेत्यनुमानसं प्रति अनुमितिसाम
ग्र्याः प्रतिबंधकत्वं नाधिकं भिन्नविषयकचाक्षुषादिकं प्रति प्रतिबंधकत्वेनैवोपपत्तेः॥ चाक्षुषत्वप्रकारकेच्छाविशिष्टचाक्षुषसामग्रीकाले
चाक्षुषोत्पादनिर्वाहाय चाक्षुषेच्छाविरहविशिष्टत्वेन तत्सत्त्वाः प्रतिबंधकता नोपेयते गौरवात्। किं त्वव्यवहितपूर्वक्षणवृत्तित्वसंबंधेनानुमितिम
त्त्वेनैव तदानीं चानुमित्युत्पत्तेन रूपेण प्रतिबंधकासत्त्वात् चाक्षुषनिर्वाहः। एवं च तेन रूपेण मानसं प्रत्यपि प्रतिबंधकत्वसंभवान्न पृथ
क् प्रतिबंधकता। मानसेच्छाकाले चानुमित्यभावादेव मानसनिर्वाहः। अनुमित्यन्यज्ञानत्वं च प्रतिबध्यतावच्छेदकमिति तदस्तु। अनुमित्य
नुत्पादचाक्षुषोत्पादयोः परस्पराधीनतया अन्योन्याश्रयात्। अस्मन्नाते च चाक्षुषेच्छाविरहविशिष्टानुमितिसामग्रीप्रतिबंधकतायां चाक्षुषो
३ त्पादेच्छाधीन इति नान्योन्याश्रयः। वस्तुतस्त्वनुमितिसामग्रीप्रतिबंधकतायामिच्छाया उत्तेजकत्वं कापि नोपेयते विषयादिभेदेन प्रतिबंध
कताभेदापत्तेः। किं त्विच्छाधीनज्ञाने व्यभिचारवारणाय स्वविषयत्वस्ववृत्तिकृतित्वस्वसामानाधिकरण्यैतत्त्रितयसंबंधेनेच्छावदन्यत्वं का
र्यतावच्छेदककोटौ निवेश्यते। भवति च घटचाक्षुषं जायतामितीच्छाधीनं घटचाक्षुषादिकं तादृशत्रितयसंबंधेनेच्छाविशिष्टं अतो न तत्र

ग॰टी॰
५७
57

विरोधिसामग्र्यभावहेतुतायां व्यभिचारः स्पार्शनादीच्छोत्तरचाक्षुषादिसंग्रहाय स्वविषयत्वनिवेशः। इच्छानाशोत्तरज्ञानसंग्रहाय द्वितीयसं
बंधः। पुरुषान्तरीयचाक्षुषेच्छोत्तरतच्चाक्षुषपुरुषीयचाक्षुषसंग्रहाय तृतीयसंबंधः। एवं च चाक्षुषादिस्थले अनुमितिसामग्र्याः प्रतिबध्य
तावच्छेदकं न चाक्षुषत्वादिकं किंतु मानससाधारणानुमितिभिन्नत्वमेवेति विरुद्धत्वमतेन प्रतिबंधकत्वकल्पनाधिक्यं। अत्र चेच्छाकाली
नचाक्षुषे इच्छाया हेतुत्वमुपेयं अन्यथा विरोधिसामग्रीसत्वे इच्छासत्वे यादृशसामग्रीबलाच्चाक्षुषं जायते इति इच्छाशून्यकाले तादृशसामग्रीब
लाच्चाक्षुषापत्तेः। अथैवमपि समानविषयकचाक्षुषादौ व्यभिचारवारणाय प्रतिबध्यतावच्छेदककोटौ भिन्नविषयकत्वमावश्यकं तथा च समा
नविषयकमानसं दुर्वारमिति चेत्। समानविषयकचाक्षुषोपनीतभानं प्रति अनुमितिसामग्र्याः प्रतिबंधकत्वस्यावश्यकतया तत्रैवलौकिका
न्यप्रत्यक्षत्वं मानससाधारणं प्रतिबध्यतावच्छेदकमुपेयानुमितिसामग्रीकाले तादृशमानसस्यापि वारयितुं शक्यत्वात्। एवं समानविषयक
शाब्दबोधादिसामग्रीकाले सिद्धांतिनाप्यनुमितित्वावच्छिन्नं मानसत्वावच्छिन्नं च पृथक् प्रतिबंधकत्वं नोपेयं तो मानसत्वानुमितित्वप्रकारके
च्छयोः पृथक् उत्तेजकतापत्तेः। भिन्नविषयकानुमित्सन्यमानसस्थले भिन्नविषयकेच्छायुत्तेजकीकृत्य पृथक् प्रतिबंधकत्वापत्तेश्च। किंतूक्त
संबंधेनेच्छावदन्यत्वे सति शाब्दान्यत्वमेवेत्यनुमितेर्मानसत्वनयेपि महागौरवादिति। साध्यसन्निकर्षेण वप्रत्यक्षत्वविरहप्रयोजकः अतस्व
पर्वतसन्निकर्षेपि पर्वतो वह्निमानित्यनुमितेर्न प्रत्यक्षत्वमत आह साध्यांशइति। इत्यादीति। आदिना अप्रसिद्धाभावप्रत्यक्षविशेष्यकानुमि राम ५७

ति नेर्पेयते विधेयोध्ये विशेषणतामिति न्यायेन तत्स्वकारकत्वसंभवादेवं च नोपनयस्य व्यभिचार इत्यस्य परिग्रहः। इत्यादीत्यादिना निरुक्तत्व
न्ति तो यगमेपि तत्त्वव्याप्यग्रहदशायां अप्रसिद्धसाध्यकानुमितिर्निराबाधैवेत्यस्य परिग्रहः। धर्मिताइति एतदेवावधार्य स्वधर्मपदरूपविशिष्टसमा
नाधिकरण्याभावेत्यादिव्याप्तिनिरुक्तौ विशिष्टपदोपादानस्यावश्यकत्वं दर्शितं तस्मान्नैवं। पक्षवृत्ताविति पक्षवृत्तित्वं धर्मितावच्छेदकीकृतस्य व्यभि
चाराभावावच्छेदकस्य तद्व्याप्यस्य वा व्याप्यतावच्छेदकस्य निश्चयो ग्योऽस्तित इत्यर्थः। परामर्शान्तरस्यापि दुर्घटकत्वमाह पक्षवृत्तितावच्छेदेने
ति पक्षवृत्तित्वसामानाधिकरण्येन व्यभिचारसंशयदशायां तथाविधनिश्चयोपपत्तेरवच्छेदेनेति। दुर्घट इति। तस्य व्यभिचारविशिष्टसंशया
पादकत्ववद्व्यभिचारविशिष्टसंशयापादकत्वादिति भावः। एतेन साध्याभाववद्वृत्तिमान्निति ज्ञाने व्याप्तिधर्मितावच्छेदकतया व्याप्यभाना
दुपस्थितोपि व्यभिचारेण भासते धर्मितावच्छेदकग्रहाभावात् निर्धर्मितावच्छेदककसंशयानुपगमादिति निश्चयत्वं तस्याप्यस्तमिति समा
हितं। मूलोपर्यस्तत्तोनपकाशपतेद्द्स्सशयेनाहृश्यवेतितिनविनैवेति। विषयतावैलक्षण्यादिति भावः। यतो विशेषणविशेष्यत्वे इति
। तथा च न धूमे पर्वतः धूमवान् पर्वत इति ज्ञाने पर्वते धूमे प्रतियोगित्वं पर्वते चानुयोगित्वं भासते इति भावः। व्याप्यांशे इति। व्याप्यतावच्छिन्न
विषयतानिरूपितसंसर्गसंसर्गविधया प्रतियोगित्वविषयतानिरूपितायाः प्रकृतपक्षविषयतानिरूपितसंसर्गसंसर्गविधयानुयोगित्व
विषयतानिरूपितहेतुतावच्छेदकसंबंधवृत्तित्वांशे सांसर्गिकविषयतानिरूपकत्वं निश्चयत्वविशिष्टं कारणतावच्छेदकमिति भावः।

ग॰टी॰ ४८ अथसंबंधांशग्रहेपिविशिष्टज्ञानत्वस्योपपाद्यादितत्वादिसमभिधायव्याप्यविशेष्यकात्पक्षविशेष्यकाच्चपरामर्शाद्दिसादिनाउभयपरामर्शापेक
हेतुतायामनुमितिलक्षणप्रवेशोदर्शितः तथाचानुयोगित्वादिघटितधर्मस्यतदवच्छेदकत्वंदुर्लभमित्यतः प्रकारांतरमाहेदंत्विति। प्रमा
त्वापातादिति। पक्षेतादृशवैपरीत्यवादिनायन्नस्यानुयोगिकसंयोगसंबंधेनप्रकारतातत्रविशेष्येतत्प्रतियोगित्वस्यैवप्रमात्वनियामक
तायावक्तुंशक्यत्वात्तापत्तिरितितन्नातथासतिगौरवात्। पक्षविशेष्यकेति। अथव्याप्यविशेष्यकपरामर्शस्यहेतुत्वोपगमेपिप्रतियोगित्वा
देर्विशिष्टबुद्धाविषयत्वेपिनक्षतिर्यतोहेतुतावच्छेदकसंबंधानवच्छिन्नप्रकारतान्यसाध्यव्याप्यत्वावच्छिन्नविषयतानिरूपितायाहेतु
तावच्छेदकसंबंधावच्छिन्नाधेयतासंबंधानवच्छिन्नप्रकारतान्यप्रकृतपक्षतावच्छेदकावच्छिन्नविषयतातत्त्वालिनिश्चयत्वंकारणतावच्छेदकमु
पगम्यतेतन्नाधेयतासंसर्गकव्याप्यप्रकारकेवह्निव्याप्यधूमेपर्वतइतिज्ञानेआधारतासंबंधेनपक्षप्रकारकपर्वतवान्वह्निव्याप्यधूमइतिज्ञानेचा
तिप्रसंगवारणायान्यांतद्वयं। नचपर्वतीयवह्निव्याप्यधूमेपर्वतइतिवह्निव्याप्यधूमवत्पर्वतवान्वह्निव्याप्यइतिचज्ञानयोरसंग्रहइतिवाच्यं। प्रथमभे
दप्रतियोगिप्रकारतायांतादृशाधेयत्वसंसर्गावच्छिन्नप्रकृतपक्षप्रकारत्वानिरूपितत्वस्यद्वितीयभेदप्रतियोगिप्रकारतायांसाध्यव्याप्यत्वावच्छि
न्नप्रकृतहेतुतावच्छेदकसंबंधावच्छिन्नप्रकारत्वानिरूपितत्वस्यचनिवेशनीयत्वात्। वस्तुतस्त्वाधेयतासंबंधावच्छिन्नपर्वतप्रकारतानिरूपितवि रामः
शेष्यतातोभिन्नेवाधेयतासंबंधावच्छिन्नव्याप्यप्रकारतायोद्वितीयेचहेतुतावच्छेदकसंबंधावच्छिन्नव्याप्यप्रकारतानिरूपितपक्षविषयतातो ४८

98

भिन्नैव वह्निव्याप्यविषयतानिरूपितप्रकारतेति न कश्चिद्दोषः। अथ निश्चयत्वं हेतुतावच्छेदकसंबंधावच्छिन्नवह्निव्याप्यधूमाभावाप्रकारक
त्वे सति चाधेयतासंबंधावच्छिन्नपर्वतत्वाभावाप्रकारकत्वं तेन पर्वतो वह्निव्याप्यधूमवान्न वा वह्निव्याप्यधूमः पर्वतीयो न वेत्यादिसंशयात्रानु
पा.३ मित्यापत्तिः त[illegible]च पर्वतो वह्निव्याप्यधूमवान् वह्निव्याप्यधूमः पर्वतीयो न वेति वह्निव्याप्यधूमः पर्वते पर्वतो वह्निव्याप्यधूमवान्न वेति संशयाप
योर्हेतुतापत्तिरिति चेन्न। संशयस्य समुच्चयो वैलक्षण्यानुरोधेन कोटिसंसर्गावच्छेदकतया विरोधभानोपगंतृमते साध्यव्याप्यविषयितायां स्व
निरूपकज्ञाननिरूपितत्वस्वनिरूपितविशेष्यतावच्छेदकीभूतधर्मावच्छिन्नविशेष्यतानिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नसाध्यव्याप्यत्वाव
च्छिन्नप्रकारतातोभयसंबंधावच्छिन्नप्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितविरोधावच्छिन्नविशेषणतासंसर्गावच्छिन्नप्रकृ
तसाध्यव्याप्याभाववत्तावच्छिन्नप्रकारतात्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वस्य विवक्षणात्। पर्वतो वह्निव्याप्यधूमवान् वह्निव्याप्यधूमः पर्व
तेन वेति संशये चोक्तोभयसंबंधेन साध्याभावप्रकारतावद्भेदसत्त्वात्संग्रहः। एवं प्रकृतपक्षविषयितायामपि विरोधावच्छिन्नविशेषणतातासंबं
धावच्छिन्नायाप्रकृतहेतुतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतपक्षतावच्छेदकावच्छिन्नाभाववत्तावच्छिन्नप्रकारतानिरूपकतासंबंधघटित
सामानाधिकरण्यस्वनिरूपितविशेष्यतावच्छेदकीभूतधर्मावच्छिन्नविशेष्यतानिरूपितपक्षतावच्छेदकावच्छिन्नप्रकारतातोभयसंबंधावच्छि
न्नतन्निष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वं न तु स्यात्तेन संशयात्मत्वं निवेश्यमितिनानुपपत्तिः। शुद्धविशेषणतासंबंधेन व्याप्याभावप्रकार

ग॰टी॰
४९
५९

कात्पक्षाभावप्रकारकात्संशयादनुमित्सापत्तिवारणाय निरुक्तभेदवदंशे विरोधानवच्छिन्नसंसर्गतानिरूपकत्वं निवेशनीयंस्तु हेतुताव
च्छेदकसंबन्धेन व्याप्यप्रकारकाच्छुद्धाधेयतासंबन्धेन पक्षप्रकारकात्संशयादनुमित्सापत्तिवारणाय निरुक्तभेदो विशेष्यतया निवेशितः। वि
शेषितः। विरोधावच्छिन्नसंसर्गतानिरूपकतयोर्निश्चयीयव्याप्यपक्षप्रकारतयोर्विरोधविशिष्टविशेषणतासंबन्धावच्छिन्नव्याप्याभावपक्षाभाव
प्रकारतयोः स्वनिरूपकतत्तत्संशयीयान्तर्भावेणासामानाधिकरण्यसत्वान्निरुक्तभेदो बाधितइतित्तुनाशंक्यं। ज्ञानभेदे न विषयिताभेदमनुरुन्धानानां
प्राचीनानां मतमालंब्यैव दीधितिकारैर्व्याप्यपक्षोभयवैशिष्ट्यावगाहितानयोरनुगतरूपेणाहेतुतायाउक्तत्वात्। यदि च वह्निव्याप्यधूमवान्पर्व
तइत्याकारकैककोटिनिश्चये वह्निव्याप्याभावीयविरोधविशिष्टसंयोगादिसंबन्धावच्छिन्नव्याप्यप्रकारकत्वं पर्वते वह्निव्याप्यधूमइतिनिश्चये च प
क्षाभावविरोधविशिष्टताद्दशाधेयतासंबन्धावच्छिन्नपक्षप्रकारकत्वं चोपगम्यते तदास्तुद्वविशेषणतासंबन्धावच्छिन्नप्रकृतसाध्यव्याप्याभाव
प्रकारताविशिष्टविरोधविशिष्टप्रकृतहेतुतावच्छेदकसंबन्धावच्छिन्नप्रकृतसाध्यव्याप्यतावच्छिन्नप्रकारताभेदं तादृशसंसर्गतानिरूपकत्वे
नाविशेषितं पूर्वोक्तभेदं च व्याप्यप्रकारतां निवेश्य पक्षप्रकारतानिरूपकत्वेनाविशेषितं पूर्वोक्तभेदं निवेश्यैव वस्तुद्वविशेषणतात्तासंसर्गावच्छिन्न
पक्षाभावप्रकारताविशिष्टविरोधविशिष्टताद्दशाधेयतासंबन्धावच्छिन्नप्रकृतपक्षप्रकारताभेदोपि निवेश्यः। उभयत्रापि प्रकारतावैशिष्ट्यं स्वनि राम॰ ४९
रूपकज्ञाननिरूपितत्वस्वनिरूपितविशेष्यतावच्छेदकीभूतधर्मावच्छिन्नविशेष्यताकत्वोभयसंबन्धेन। प्रतियोगितावच्छेदकताघटकसंबन्धः

पूर्वोक्तः संशयेऽभावांशे विशेषभाने प्रथमभेदासत्त्वाद्भावांशे तद्भाने द्वितीयभेदासत्त्वात् असुदासः। तादृशनिश्चयस्य च स्वाभावप्रकारताविशि
शिष्टविशेषावच्छिन्नभावप्रकारतावद्भेदवत्त्वात्संग्रहः। एवं विशेषस्य प्रकारतावच्छेदकत्वमते प्रकारतायामेव विशेषावच्छिन्नत्वं निवे
श्यं। अवच्छेदकावच्छेदेनान्यतरकोट्यवगाहित्वानं संशय इति मतेतु विशेषभानवद्दलमालोचनीयं। विषयितैक्यमते तु साध्यव्याप्यतावच्छि
न्नाभावविषयिताविशिष्टप्रकृतपक्षाभावविषयितावदन्यत्वे सति साध्यव्याप्यतावच्छिन्नविषयितायाः प्रकृतपक्षतावच्छेदकावच्छिन्नविषयि
ताविशिष्टायाः अधिकरणत्वमेव तथाविधनिश्चयत्वं तत्र वैशिष्ट्यस्य निरूपितत्वस्वसामानाधिकरण्योभयसंबंधेन। सामानाधिकरण्यघटकप्र
स
थमाधिकरणत्वं च साध्यव्याप्यतावच्छिन्नप्रकारतानिरूपितप्रकृतपक्ष[illegible]विशेष्यताकत्वाधिकरणतावदन्यत्वविशिष्टायाः साध्यव्याप्यतावच्छि
न्नविशेष्यतानिरूपितविशेषावच्छिन्नविशेषणतासंबंधावच्छिन्नप्रकृतपक्षतावच्छेदकावच्छिन्नाभावत्वावच्छिन्नप्रकारिताधिकरणतातद्
दन्यत्वविशिष्टस्वाधिकरणता। द्वितीयाधिकरणत्वं च साध्यव्याप्यतावच्छिन्नविशेष्यितानिरूपितप्रकृतपक्षप्रकारिताधिकरणतावदन्यत्ववि
शिष्टायाः साध्यव्याप्याभावप्रकारितानिरूपितप्रकृतपक्षविशेष्यित्वाधिकरणतातद्दन्यत्वविशिष्टस्वाधिकरणत्वसंबंधेन। एवं च साध्य
व्याप्यवान्पक्षः साध्यव्याप्यः पक्षे न वेति साध्यव्याप्यः पक्षे साध्यव्याप्यवान्न वा पक्ष इति ज्ञानयोरपि संग्रहः। ससंतोपादानात् पर्वतो वह्निव्या
प्यवान्न वा पर्वते न वा वह्निव्याप्य इति संमूहालंबनसंशयस्य सुदासः। संशये विशेष्यितयोः प्रकारतयोर्वाऽवच्छेद्यावच्छेदकभावमते तन्न निरव

ग॰टी॰
५०
50

च्छिन्नत्वं कोटितात्वविषयतामते च तदन्यत्वमेवेति सर्वं समंजसं। अत्र प्रकृतसाध्यव्याप्याभाववद्वृत्तिविशेष्यतानिरूपितप्रकृतसाध्यव्याप्यप्र
कारताकमिदमित्यप्रामाण्यज्ञानस्य स्वीयसाध्यव्याप्याभाववद्वृत्तित्वप्रकारतानिरूपितविशेष्यतानिष्ठप्रकारतानिरूपितनिरूपितत्वनिष्ठ
प्रकारतानिरूपितविशेष्यतावच्छेदकत्वाश्रयप्रकृतसाध्यव्याप्यत्वावच्छिन्नत्वविशिष्टप्रकारतात्वसंबंधावच्छिन्नशुद्धज्ञानत्वावच्छिन्नाभा
वः निरुक्तव्याप्यत्वावच्छिन्नविषयितायां निवेश्यः। एवं प्रकृतपक्षविषयतायां इदं प्रकृतपक्षाभाववद्वृत्तिविशेष्यतानिरूपितप्रकृतपक्ष
प्रकारकताकमित्यप्रामाण्यज्ञानस्य स्वीयप्रकृतपक्षाभाववद्वृत्तित्वप्रकारतानिरूपितविशेष्यतावृत्तिप्रकारतानिरूपितनिरूपितत्वनिष्ठ
प्रकारतानिरूपितविशेष्यतावच्छेदकत्वाश्रयप्रकृतपक्षतावच्छेदकावच्छिन्नप्रकारतात्वसंबंधावच्छिन्नशुद्धज्ञानाभावो निवेश्यः न तु स
मवायसंबंधावच्छिन्नशुद्धतादृशतादृशाप्रामाण्यज्ञानत्वावच्छिन्नाभावः सामानाधिकरण्यसंबंधेन। साध्यव्याप्यवान्पक्ष इति ज्ञानात्प
क्षप्रकारकत्वघटिताप्रामाण्यग्रहदशायामनुमित्यनुत्पादापत्तेः। अत एवाप्रामाण्यग्रहाभावकूटस्य पृथक्कारणत्वमपि परास्तं। न च व्याप्यप्र
कारकत्वघटिताप्रामाण्यज्ञानास्कंदितव्याप्यवत्तापरामर्शोत्तरं तदनास्कंदितव्याप्यवत्तापरामर्शात्तु हृषांतरीयतादृशाप्रामाण्यज्ञानास्कंदि
तपरामर्शाद्यानुमित्यनापत्तिरिति वाच्यं। स्वीयतदप्रामाण्यप्रकारतानिरूपितविशेष्यताश्रयीभूतपक्षत्वसमानाधिकरणज्ञानत्वनिरूपितत्वनि
रुक्तविशेष्यतावच्छेदकीभूततद्धर्मावच्छिन्नप्रकारतात्वोभयसंबंधावच्छिन्नशुद्धज्ञानत्वावच्छिन्नाभावत्वं निरूप्यतस्य निरुक्तविषयिताद्वय

राम
५०

विशेषणतातत्प्रकारतात्वावच्छेदकत्वस्योपगमात्। अथैवं विषयितामेदमतेऽगतिः स्वविशेष्यत्वस्वसामानाधिकरण्योभयसंबंधेन स्वविशिष्ट
मभ्रमात्मकज्ञानानां कंदिनमेवस्वीयप्रकारीयज्ञानांतन्निरूपितत्वस्य ज्ञानांतरीयप्रकारतायां सत्त्वादिति चेन्न। प्रकृतपक्षे विषयितानिरूपितत
त्वसामानाधिकरण्यसाध्यसाध्यधूमत्वावच्छिन्नविषयितावज्ज्ञानत्वेन हेतुत्वं विषयितावत्त्वं च स्वाधिकरणत्वस्वनिष्ठप्रकारितानिरूपकतावच्छे
दकव्याप्यत्वविशिष्टप्रकारतानिरूपितविशेष्यत्वस्वसामानाधिकरण्योभयसंबंधावच्छिन्नज्ञानाभाववत्त्वोभयसंबंधेन। वैशिष्ट्यं च स्वावच्छि
न्नाभाववन्निरूपितविशेष्यितावच्छिन्नत्वावच्छिन्नत्वस्वावच्छिन्नप्रकारितात्वावच्छिन्नत्वोभयसंबंधावच्छिन्नस्वावच्छिन्नाभाववद्वृत्तिविशेष्यता-
निरूपितत्वावच्छिन्नत्वस्वावच्छिन्नप्रकारतात्वावच्छिन्नत्वोभयसंबंधावच्छिन्नत्वोपादेयं एवं च ज्ञानांतरविशेष्यकाप्रमात्मकग्रहदशायां न दोषः।
अत्र साध्याभाववद्वृत्तित्वरूपव्याप्तिपक्षे इदं ज्ञानं वह्निव्याप्यालोकाभाववति वह्निव्याप्यालोकप्रकारकमित्यप्रमात्मकग्रहदशायां धूमपराम
र्शादनुमित्यनापत्तिः। तादृशप्रकारितानिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्मत्वेन निवेशे तु तस्मादिदं व्याप्याभाववति व्याप्यप्रकारकमित्य
प्रमात्मकग्रहदशायामनुमित्यापत्तिः। अतः स्वविषयप्रकारितानिरूपकतावच्छेदकतापर्याप्त्यधिकरणीभूतस्वविशेष्यनिरूपितप्रकारतावच्छे
दकीभूतधर्मघटकधर्मवैशिष्ट्यं निवेश्यम् अवच्छेदकतापर्याप्तिघटितं निरूप्यस्वावच्छिन्नप्रकारितात्वावच्छिन्नत्वेति द्वितीयसंबंधस्थाने वृत्ति
त्वे सति स्वविशेष्यनिरूपितप्रकारतावच्छेदकीभूतधर्मनिष्ठवृत्ति अवच्छेदकतानिरूपितस्ववृत्ति अवच्छेदकतानिरूपितायाप्रकारितानिराव

ग॰टी॰ ५१

51

छेद्यतावृत्तित्वावच्छेदकतात्वान्निरूपितत्वेति खंडशो निरुक्तं च तद्वृत्तिज्ञानाभाववत्त्वं निवेश्यं। एवं चोक्ताप्रमात्पक्षतानयोः व्याप्याभावव
त्ति व्याप्यधूमप्रकारकमित्वप्रमात्पक्षतानस्य व्याप्याभाववत्तिधूमप्रकारकमितिज्ञानस्य च संग्रहासंग्रहनिर्वाहः। धूमाभाववत्तिधूमप्रकारक
मित्वप्रमात्पक्षतानसंग्रहाद्गुरोर्धेन व्याप्यत्वधर्मितावच्छेदकत्वावच्छेदकोपि धर्मस्तद्विशिष्टप्रकारतानिरूपितविशेष्यत्वसामानाधिक
रण्योभयसंबंधावच्छिन्नज्ञानाभावः पृथगेव व्यापकसामानाधिकरण्यरूपव्याप्तिपक्षेपि निवेश्यः। वैशिष्ट्यं पूर्ववत्। पक्षतावच्छेदकावच्छि
न्नविषयितावत्त्वं च पक्षतावच्छेदकधर्मविशिष्टप्रकारतानिरूपितविशेष्यत्वसामानाधिकरण्योभयसंबंधावच्छिन्नज्ञानाभाववत्त्वस्याधिकार
णात्वोभयसंबंधेन पक्षतावच्छेदकनानात्वेनानुगतिः। केचित्तु व्याप्यपक्षोभयविशेष्यकपरामर्शस्य व्याप्यतावच्छिन्नविषयतानिरूपितपक्ष
तावच्छेदकावच्छिन्नविषयताशालिनिश्चयत्वेनैव हेतुत्वं। न च वह्निव्याप्यधूमे पर्वत इति ज्ञानस्यापि कारणतापत्तिः पक्षनिरूपिताधेयत्वावगा
हित्वे सति वह्निव्याप्यतावच्छिन्ननिरूपिताधारत्वावगाहित्वे सति वा तादृशज्ञानत्वेन हेतुत्वात्। उक्तज्ञाने तादृशाधारत्वाधेयत्वयोरविषयत्वात्
न च व्याप्यवान् पक्ष इति ज्ञाने तादृशाधारताभानेन तादृशाधेयताभासत्ते व्याप्यः पक्ष इति ज्ञाने च तादृशाधेयताभानेपि न तादृशाधारतेति वाच्यं।
आधारताधेयत्वयोस्तुल्यवित्तिवेद्यताभ्युपगमात्। अथात्र निश्चयत्वनिवेशात्कारणताद्वयं दुर्वारं तथाहि न तावन्नव्याप्याभावाप्रकारकत्वं पर्व
तीयो नवेति संशयावारणात्। नापि पक्षाभावाप्रकारकत्वं व्याप्यवान् नवेति संशयावारणात्। नापि पक्षाभावाप्रकारकत्वे सति व्याप्याभावाप्रका

एम॰ ५१

प्या

नपक्षविशेष्यतानिरूपिताधिकरणत्वप्रकाराभावप्रकारता निरूपितव्याप्यतावच्छिन्नविशेष्य३

एकत्वेचसतिपक्षसाध्यवैशिष्ट्यावगाहित्वंव्याप्यःपर्वतेपर्वतश्चव्याप्याभाववानितिज्ञानासंग्रहात्मैवं।संशयस्योभयप्रकारकैकविशेष्यकत्वा
न्निरूपितत्वसामानाधिकरण्योभयसंबंधेनव्याप्यविषयिताविशिष्टपक्षविषयितायानिवेशनीयत्वात्सामानाधिकरण्यंचव्याप्याभावप्रका
रतानिरूपितप्रकारतानिरूपिताधिकरणत्वोभयसंबंधेनपर्वतोवह्निव्याप्यधूमवान्नवापर्वतोव्याप्यइतिसमूहालंबनस्यचव्याप्यपक्षविशेष्यते
भिन्नएव।वस्तुतस्तुसंशयेपिविशेष्यताभेदएव।व्याप्यतावच्छिन्नविषयतायाःप्रतियोगितासंसर्गावच्छिन्नपक्षतावच्छेदकावच्छिन्नप्रका
रताविशिष्टव्याप्यतावच्छिन्नविशेष्यतात्मत्वेनपक्षतावच्छेदकावच्छिन्नविषयतायाश्चप्रतियोगितासंसर्गावच्छिन्नव्याप्यप्रकारताविशिष्ट
पक्षतावच्छेदकावच्छिन्नविशेष्यतात्मत्वेनविशेषणीयत्वात्नदोषः।वैशिष्ट्यंचस्वनिरूपिताभावप्रकारतानिरूपितधर्मितावच्छेदकावच्छि
न्नत्वस्वनिरूपकज्ञाननिरूपितत्वोभयसंबंधेनतेनव्याप्यवान्नवेतिसंशयस्यतादृशसंबंधेनव्याप्यप्रकारताविशिष्टपक्षविषयताशालितया
पर्वतीयोनवेतिसंशयस्यपक्षप्रकारताविशिष्टव्याप्यविशेष्यतयाव्युदासः।व्याप्याभाववान्पक्षःपक्षेव्याप्यइत्यादिसमूहालंबनस्यापि
संग्रहः।संशयनिष्ठयोर्विषयतैकेतुव्याप्यविषयिताविशिष्टपक्षविषयित्वमेववाच्यंतत्रपक्षविषयितानिरूपिताभावविषयितानि
रूपितप्रतियोगितासंबंधावच्छिन्नव्याप्यविषयितापक्षप्रकारतानिरूपितव्याप्यविशेष्यतानाश्रयत्वोभयानधिकरणत्वविशिष्टत्वाधि
करणत्वंप्रथमसंबंधः।एवंद्वितीयसंबंधंनिरूपयतेमसंबंधेनस्वाधिकरणज्ञानगर्भसामानाधिकरण्यघटितोभयसंबंधः।व्याप्याभाववद्वि

शेष्यतानिरूपितत्वप्रकारतानिरूपितविशेष्यतावच्छेदकीभूतप्रकारितात्वसंबंधावच्छिन्नज्ञानाभाववैशिष्ट्यं व्याप्यप्रकारिताविषयिता
यां पक्षाभाववद्विशेष्यतानिरूपितत्वप्रकारताविशेष्यतावच्छेदकप्रकारतात्वसंबंधावच्छिन्नज्ञानाभाववैशिष्ट्यं पक्षविषयितायां नि
वेश्यं तेन नाशाभासप्रज्ञाननिवेशानुरोधेन कारणताद्वैविध्यापत्तिः। शेषं पूर्ववत्। अथवा ज्ञानविशिष्टज्ञानत्वेनैव हेतुत्वं वैशिष्ट्यं च स्वी
यपक्षतावच्छेदकावच्छिन्नविषयित्वाभावविशिष्टव्याप्यतावच्छेदकावच्छिन्नविषयितानिरूपितायास्वीयव्याप्यतावच्छेदकावच्छिन्नवि
षयित्वाभावविशिष्टप्रकृतपक्षविषयतातच्छालित्वतादात्म्योभयसंबंधेन। तादृशविषयित्वाभाववैशिष्ट्यं च स्वनिरूपिताभावविषयता
निरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकीभूतधर्मावच्छिन्नत्वसंबंधेन। निश्चयात्मकपरामर्शे चाधिकरणीभूततादृशसं
बंधावच्छिन्नप्रतियोगिताक एव तादृशविषयित्वाभावो वर्त्तते तत्र स्वनिरूपिताभावविषयताविरहात् न च ज्ञानभेदेन विषयताभेदाभ्यु
पगमे तादृशसंबंधेन तादृशविशेष्यतावैशिष्ट्यं चेत् व्याप्यप्रकारतायां संशयमादाय वर्त्तते तदा तस्यां निश्चयमादाय कथं चन वर्त्तते इति
वाच्यं स्वीयविशेष्यत्वाभावे ज्ञाननिष्ठनिरूपितत्वसंबंधावच्छिन्नावच्छेदकताकविषयत्वाभावस्योक्तत्वात्। संशयात्मकज्ञाननिष्ठावच्छेदक
ताकविशेष्यत्वाभाववैशिष्ट्यविरहेपि निश्चयात्मकज्ञाननिष्ठावच्छेदकताकविषयताभावविशिष्टविषयत्वसंबंधेन स्ववैशिष्ट्यस्य। त्मिन्नेव
वर्त्तते संशयात्मकज्ञाननिष्ठावच्छेदकताकत्वं तु तज्ज्ञानवैशिष्ट्यानियामकरूपेण तज्ज्ञानीयविशेष्यताविशिष्टत्वेन तादृशविशेष्यत्वाभावव्य

टित्तसंबंधेन ज्ञानवैशिष्ट्यं दुर्लभमस्मादिति संशये निश्चयवैशिष्ट्यं वा र्तायत्तादात्म्यनिवेश इति वदंति इति चेन्न । नहि जनकतावच्छेदक निर्वच
ना संबंधेन ज्ञानवैशिष्ट्यं दुर्लभमस्मादिति संशये निश्चयवैशिष्ट्यं वा (र्ता) यत्तादात्म्यनिवेश इति वदंति इति चेन्न । नहि जनकतावच्छेदकनिर्वचना
संभवेन तदनभ्युपगमः किंतु महागौरवभयेन तस्य जनकतावच्छेदकत्वं नोपेयते । अतएव त्वात्तंत्रेणाव्याप्यप्रकारकपक्षविशेष्यकज्ञा
नत्वेन पक्षप्रकारकव्याप्यविशेष्यकज्ञानत्वेन च हेतुताद्वयं नोपेयते व्याप्यः पक्ष इति ज्ञानस्यानुमितिजनकत्व एव लाघवात् । एवं च वह्निव्या
प्यपर्वतीयधूमे रूपमित्यादीनां हेतुत्वे व्याप्यादिविषयितांशे विशेषणीभूतपक्षादिविषयितानिरूपकत्वेऽवतादृशव्याप्यादिप्रकारतातावच्छि
न्नत्वसंबंधेन व्याप्यादिप्रकारकत्वघटितापामात्पग्रहाभावो निवेश्यः । तादृशपरामर्शीयपक्षप्रकारतानिरूपितधूमादिविषयतायां प्रकारता
त्वसत्त्वेपि तस्या न प्रकारतात्वेन पक्षविषयतानिरूपकत्वमपि तु विशेष्यतात्वेनेति तन्निष्ठपक्षविषयतानिरूपकत्वे तादृशव्याप्यप्रकारता
तावच्छिन्नत्वसंबंधेन तादृशप्रामाण्यग्रहस्याभावः सुलभ एवेत्यस्यार्तः । संयोगावच्छिन्नाधेयतासंसर्गकत्वेनैवेति । यद्यपि संयोगस्य हेतुतावच्छेद
कसंबंधत्वे संयोगावच्छिन्नाधारतासंसर्गकत्वेन हेतुत्वमपि सुलभं तथापि यत्र संयोगावच्छिन्नाधारतैव हेतुतावच्छेदकसंबंधः तत्र तत्संसर्गक
त्वेन हेतुत्वस्यावश्यकत्वात्स्यागः तत्र संयोगावच्छिन्नाधेयतासंसर्गकं ज्ञानं हेतुतावच्छेदकसंबंधायनवगाहित्वान्न कस्यापि मते कारणमिति प्र
चामपि न तदनुगमापेक्षा । अथैवं यत्र संयोगो हेतुतावच्छेदकसंबंधः तत्र पक्षे तेन संबंधेन व्याप्यप्रकारकमिव व्याप्ये तेन संबंधेन पक्षप्रका

ग॰टी॰ ५२ रकं च कारणमात्रं व्याप्यविषयतानिरूपितसंयोगत्ववृत्तिसांसर्गिकविषयतानिरूपितपक्षविषयताशालिनिश्चयत्वेन च तयोरनुगमः संयोगसं
बंधावच्छिन्नाधेयतासंसर्गकं च ज्ञानं न हेतुः व्याप्यः पर्वतवान् व्याप्यपर्वत इति ज्ञानद्वयवारकविशेषणाप्रवेशाच्च लाघवं अनुमितित्वस्य
53 त्रापि पक्षमुख्यविशेष्यके वसाध्यविशेष्यकानुमितौ साध्ये पक्षस्थितेः प्रतिबंधकत्वात्। न च साध्यविशेष्यकानुमित्यप्रसिद्धेः प्रतिबध्यतावच्छे
दकं दुर्वचं विधेयनिष्ठप्रकारतासत्ता विधेयतावच्छेदकनिष्ठप्रकारतासत्ताबाशुद्धानुमितित्वज्ञानत्वाभ्यामेव प्रतिबध्यप्रतिबंधकभावकल्पनात्।
पक्षताग्रंथे विस्तरः॥ विलक्षणानुमितिस्वीकारे परामर्शकारणतावृद्धेः अनुमितिसामग्रीप्रतिबंधकतावृद्धेश्च। न चैवं संयोगस्य हेतुतावच्छेदक
संबंधत्वस्थले पक्षविशेषणकज्ञानस्य हेतुत्वं न युक्तं अन्यथा साध्यशून्येपि समवायकसंबंधेन हेतुवृत्तौ साध्यानुमानापत्तेरिति वाच्यं तादृश
स्थले हेतुसंयोगिनः साध्यशून्यत्वे व्यभिचाराप्रत्ययात्तत्र हेतुसंयोगानुपगमादिति चेन्न। यतः समवायसंबंधेन हेतुत्वे वह्निव्याप्यतद्रूपरूपत्ववद
ति परामर्शाद्रूपत्वे विशेषणीभूतपक्षे साध्यशून्ये साध्यानुमितापत्तात्तत्र पक्षविशेष्यकस्यैव हेतुत्वमावश्यकमिति संयोगस्य हेतुतावच्छेद
कसंबंधत्वे पक्षविशेष्यकत्वमेवानुमित्यौपयिकं। वस्तुतस्त्वनुगतरूपेण परामर्शद्वयस्य हेतुत्वे पक्षविशेष्यकपरामर्शसत्त्वे सिद्धिसत्त्वे व्याप्य रा॰म॰
विशेष्यकपरामर्शेणानुमिनुयामितीच्छायामनुमित्यापत्तिः व्याप्यविशेष्यकपरामर्शस्थले सिद्धिसत्त्वेपि तदिच्छावशादनुमित्युत्पत्तेः। एवं व्याप्यवि ५३
शेष्यकपरामर्शसत्त्वे सिद्धिसत्त्वे पक्षविशेष्यकपरामर्शेणानुमिनुयामितीच्छाकाले अनुमित्यापत्तेः पक्षविशेष्यकपरामर्शस्थले सिद्धिसत्त्वेन दि

च्छायानुमितिस्थलत्ते रिति समासः। गगनादेस्तादात्म्येन विषयितया वा गगनादिकं प्रति व्यापकत्वाद्धूमपदे व्यर्थः। रूपादेः संयोगेन द्रव्यत्वादिव्यापकत्वापा
दनसंभवादवृत्तिपदं च तथैव ततो व्याचष्टे येन येनेति साध्यासामानाधिकरण्यस्य विरोधत्वात् साधारण्येनासंभवादाह एतन्मते चेति। व्याप्यत्वं चान्व
यव्यतिरेकव्याप्त्यन्यतरात्मकं। तेन साध्यव्यापकीभूताभावप्रतियोगित्वसंग्रहः। साध्यासामानाधिकरण्यं तु तज्ज्ञानस्य विरोधित्वे बाधः हेत्वन्यनिष्ठं
तु तन्न दोषः। तं देहादेवेत्येवकारोऽसाधारण्यव्यवच्छेदार्थः। वीप्सा व्यापकत्वप्रतिपादने च्छाद्दिताद्वृत्तिर्वीनतत्समभिव्याहारइत्यतो वीप्सितेति। दी
धितौ समभिव्याहारादीत्यादिना प्रमेयमभिधेयमेवेत्यादावेवकारसमभिव्याहारपरिग्रहः। तत्रापि तत्समभिव्याहारवशात् विधेयतावच्छेदकीभूताभि
धेयत्वे उद्देश्यतावच्छेदकप्रमेयत्वव्यापकत्वबोधस्य सर्वानुभवसिद्धत्वात्तादृशोद्देश्यगतेति। उद्देश्यतावच्छेदकइत्यनभिधायोद्देश्यधर्मइत्यभिधा
नं वीप्साविरहे उद्देश्यतावच्छेदकस्यैव वीप्साप्यत्वे वीप्सितपदघटितवाक्यजन्यबोधीयोद्देश्यधर्मनिष्ठतया तात्पर्यविषयो धर्मस्तत्संग्रहार्थं। ए
वं विधेयं विधेयतावच्छेदके इतिवानभिधाय विधेयधर्मेइत्यभिधानं वीप्सितपदे तादृशरूपोद्देश्यवाचकपदस्थले विधेयविधेयतावच्छेदकयो
र्विवक्षितरूपस्य पदस्य स्थले समभिव्याहृतवाक्यान्तरजन्यबोधीयविधेयतया तदवच्छेदकतया वा तात्पर्यविषयो यो धर्मस्तत्संग्रहार्थं। तत्र विधेयधर्मप
दयोः कर्मधारयेण तत्पुरुषे वा न तदुभयलाभ इत्यतो व्याचष्टे विधेयनिविष्टधर्मइति निष्ठधर्मइत्यभिधाने विधेयालाभ इत्यतो निविष्टेति। उदाहरिष्यते त
त्स्फुटयति। स चेति वाक्यान्तरस्थो वाक्यान्तरधीनबोधविषयतया तात्पर्यविषयः। तद्वतो रिति। दीधितौ तद्वृत्तिइत्यस्य विधेयकोटिनिविष्टधर्मवृत्तिइ

स्यर्थः। अप्रतियोगित्वाभ्यामिति। नच धूमादिसमानाधिकरणान्योन्याभावाप्रतियोगित्वयोर्वह्नितद्वत्तोरसत्त्वात् प्रतियोगितानवच्छेदकावच्छिन्नता
ग०टी० नुधावनं तत्तस्य यो यो वह्निमान् स धूमवानित्युदाहरणापत्तिः तथापि धद्व्यत्वाद्यवच्छिन्नत्वस्य वन्ह्यादौ सत्त्वादिति वाच्यं। प्रतियोगितानवच्छे
५४ दकीभूतधर्मत्वेन तादृशबोधविषयतया तात्पर्यविषयसमभिव्याहृतवदोपस्थाप्यतावच्छेदकावच्छेदकधर्मावच्छिन्नत्वस्य तदर्थत्वात्। ननु
54 भासत इत्यनेनेति। नचान्योन्याभावघटितहेतुव्यापकताज्ञानत्वापेक्षया प्रतियोगिवैयधिकरण्यघटितसाध्यात्यंताभाववद्वृत्तित्वज्ञानत्वस्य
गुरुतया तेनरूपेणाहेतुतापाव्यापकसामानाधिकरण्यज्ञानकारणतावादिभिरनाशंकिततया तथाहेतुतात्वं नार्थमुदाहरणजन्यबोधेउ
द्देश्यधूमादिविशिष्टे विधेयधर्मात्यंताभावस्यावच्छेदमानखंडनस्य प्रकृतानुपयुक्तत्वमिति वाच्यं। उद्देश्यधर्मवतितया विधेयधर्मात्यंताभा
वानधिकरणत्वं न भासते तथेति दृष्टांतमुद्द्येव विधेयधर्मात्यंताभावानधिकरणत्वभानत्वं निस्याभिधानात्। ननु वह्निमानेव धूमवानित्या
दाविव यो यो धूमवानित्यादौ धूमादिमति वन्ह्यादिमदन्यत्वस्यावच्छेदबोधेपि धूमादौ वन्ह्यादिमदन्यवृत्तित्वस्यावच्छेदाभानेपशानभिमतप्रतिक्षे
पप्रसंग इत्यत आह धूमवतीति। यथा शंखः पांडुर एवेति वाक्याधीनबोधोत्तरं शंखत्वादिसामानाधिकरण्येन पांडुरान्यत्वशंकानुदयस्य सर्वा
नुभवसिद्धतया विशेषणासंगतेवकाराद्विशेष्यतावच्छेदकावच्छेदेन विशेषणायोगव्यवच्छेदभानमुत्सन्निसिद्धां यथा पार्थ एव धनुर्ध रम०
र इति विशेष्यसंगतेवकारात्तदधीनबोधोत्तरं धनुर्धरत्वसामानाधिकरण्येन पार्थान्यत्वशंकानुदयानुरोधेन विशेषणतावच्छेदकावच्छेदेन विशे ५४

व्याप्यत्वस्यावच्छेदमानं तथा वह्निमानेव धूमवानिति वाक्ये एवकारस्य विशेष्यसंगततया विशेषणतावच्छेदकधूमाद्यवच्छेदेन वह्निमद्वृत्ति
त्वावच्छेदबोधजनकत्वमावश्यकं अन्यथा धूमादिसामानाधिकरण्ये न वह्निमदन्यत्वरूपव्यभिचाराशंकापात् वह्निमदन्यत्वावच्छेदस्य वह्नि
स्वरूपः इति धूमादौ तद्वदन्यावृत्तित्वरूपतदनतिरिक्तवृत्तित्वमानमावश्यकं। न चैवमपि वन्ध्यादिमद्देशाभाववत्त्वेन वह्निमदन्यावृत्तित्वरूपव्याप्ति
मानेपि तादृशव्याप्तेर्वह्नित्वादिना वन्ध्यादिसिद्ध्यनुपयोगितया तादृशोदाहरणस्य न प्रकृतोपयुक्तत्वमिति वाच्यं। तस्य नियतनिविशेषणक
वह्नित्वादिविशिष्टापेक्षया वन्ध्यादिमद्देशाभाववत्त्वविशिष्टस्य गुरुत्वेन तादृशविशिष्टावच्छिन्नभेदस्याप्रसिद्ध्या तद्वृत्तितानतिरिक्तवृत्तित्वस्याप्र
सिद्ध्या तादृशोदाहरणस्याप्रमाणतापत्तिरतः पारिभाषिकावच्छेदकत्वघटिततया तादृशविशिष्टासंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकनि
र्विशेषणक वह्नित्वादिविशिष्टावच्छिन्नप्रतियोगिताकभेदवद्वृत्तित्वरूपव्याप्तेस्तत्र भानस्योपगंतत्वात् न्यायदिच पारिभाषिकावच्छेदकत्वभान
मपि न सह्यते धर्मितावच्छेदकव्यापकतायाः प्रकारांशे संसर्गांशे वा भानमुपेयते तदाप्याह अर्थादिति। एतादृशरीत्यनादरे अन्ययोगव्यवच्छेदेनो
दाहरणाशरीरमिति मूलस्यासंगतिं सूचयति अत एवेति। विधेयधर्माभावाप्रसिद्धेरिति। तथा च तज्जन्यबोधस्य भ्रमभिन्नत्वाभावेन तत्प्रयोक्तुः
भ्रांतत्वापत्तिरिति भावः। एतच्च योयो धूमवान् स वह्निमानित्यादौ यत्पदार्थधूमादिमत्तोऽभेदेन भानस्य सम्मत्या एव वन्ध्यादिमद्देशव्यवच्छेदविशि
ष्टधूमादिमदनुयोगिकत्वविशिष्टसंयोगादिसंबंधेन धर्मिपारतंत्र्येण वन्ध्याद्यन्वयबोधप्रयोजकत्वमभिप्रेत्य। अन्यथा धूमादिविशिष्टेऽभेद

ग.टी. संबंधेन वह्न्यादिविशिष्टभानसामग्र्या एवकथंचित्तादृशभानप्रयोजकतया तादृशसामग्रीविरहसत्त्वे च सर्वत्रोदाहरणाधीनबोधे तादृशभानविर
५५ हप्रयोजकतयाऽभिधानौचित्यसंभवादिति। व्यापकताबोधेति ग्रामत्वादिरूपोद्देश्यतावच्छेदकव्यापकताबोधेत्यर्थः। अथ यो यो धूमवानित्यादौ धूम
55 व्यापकताविशिष्टवह्निमदादिप्रतियोगिकाभेदसंबंधेन वह्निमदादिप्रकारकबोधो न संभवति उद्देश्यतावच्छेदकव्यापकान्यधर्मावच्छिन्नाभे
दसंसर्गताया अव्युत्पत्तिकत्वात् तत्र तत्र व्यापकताप्रकारकबोधो वाच्यः। तथा सत्यव्याप्तित्वप्रकारकबोधं दर्शयति। अस्तु वेति द्विरुक्त
प्रवृत्तिकविभक्तिस्थले व्यापकतायाः प्रकारतां निराकरोति ग्रामं ग्रामं ददातीति द्वितीयार्थः कर्मता तत्र ग्रामत्वव्यापकतावच्छेदकतावि
शिष्टदानकर्मतात्वविशिष्टाधेयतासंबंधेन ग्रामत्वप्रकारकतया सिद्धान्ते ग्रामत्वादिरूपोद्देश्यतावच्छेदकव्यापकताबोधनिर्वाहादिति भावः।
एवमेव गृहे गृहे अश्वा इत्यादौ सर्वत्रापि सप्तम्यर्थआधेयतात्मसां गृहत्वनिरूपितनिरूपितत्वसंबंधावच्छिन्नव्यापकतावच्छेदकतावच्छेदका
श्वाधेयतात्वविशिष्टनिरूपितत्वसंबंधेन गृहप्रकारको बोधः इत्यादिक्रमेणोद्देश्यतावच्छेदकव्यापकत्वस्य विधेयांशे भानं द्रष्टव्यं। यत्तु यो यो व
ह्निमान् स धूमवानिति व्यवहारवारणाय वह्निव्यापकताविशिष्टधूमवत्प्रतियोगिकत्वविशिष्टाभेदसंसर्गको धूमवत्प्रकारको बोधो वाच्यः।
एवं ग्रामो ग्रामो रमणीय इति व्यवहारवारणाय ग्रामत्वव्यापकताविशिष्टरमणीयत्ववदभेदबोधः। ग्रामं ग्रामं ददाति गृहे गृहे अश्वा इत्यादिव्यव रा.म.
हारवारणाय ग्रामत्वव्यापकताविशिष्टकर्मत्वगृहत्वव्यापकताविशिष्टाधेयतात्वादिबोधः। तथा च नञ्पदघटितव्यवहारानुपपत्तिः। वह्नित्वव्या ५५

पकत्वादेर्धूमादावप्रसिद्ध्यात्तद्घटितत्वामेदसंबंधावच्छिन्नमेयादिवोधासंभवादितितदघटनायत्तोवीक्षितपत्सदघटितवाक्याधीनवोधेविधेयको
टिनिटिनिविष्टतयाभासतेयद्धूमादिर्व्यापकतावच्छेदकतासंबंधेनतद्वच्छिन्नेधर्मेविशिष्टप्रतियोगिकत्वंप्रकृत्यर्थवह्नित्वावच्छिन्नस्यम
त्वर्थसंबंधेसंबंधःस्वीक्रियतेएवंचयोयोवह्निमानित्यादौस्वव्यापकतावच्छेदकत्वसंबंधेनवह्निविशिष्टोयोधर्मःवह्नित्वादिःतदवच्छिन्नप्रति
योगिताकत्वसंबंधेनप्रकृत्यर्थधूमत्वविशिष्टेमत्वर्थघटकसंबंधेऽवयान्नादृशवाक्यस्यप्रामाण्यंनत्वघटितवाक्यस्यचनिरुक्तसंबंधेन
वह्निविशिष्टवह्नित्वविशिष्टप्रतियोगिकत्वरूपसंबंधस्यधूमत्वादिविशिष्टप्रतियोगिकतयातथाविधस्याधिकरणसंबंधेनधूमत्वविशि
ष्टस्याभावोमत्वर्थसंबंधेऽस्तुइतिप्रामाण्यंनचवह्निव्यापकतावच्छेदकद्रव्यत्वाद्यवच्छिन्नतन्नद्धूमादिनिष्ठप्रतियोगितातोधूमत्वाद्यवच्छि
न्नतन्नद्धूमादिनिष्ठप्रतियोगितायाअभिन्नतयानिरुक्तसंबंधेनवह्निविशिष्टद्रव्यत्वावच्छिन्नप्रतियोगिताकत्वरूपधूमत्वविशिष्टप्रतियोगि
कत्वसत्वेनतत्संबंधेनधूमत्वविशिष्टाभावस्यमत्वर्थसंबंधेवाधात्कथंतद्वाक्यस्यप्रामाण्यमितिवाच्यंवीक्षितपत्सदघटितवाक्यजन्यवो
धेविधेयकोटिप्रविष्टतयाभासतेयद्वह्निमत्वादिकंव्यापकतावच्छेदकतासंबंधेनतद्वच्छिन्नविशिष्टधर्मःसंबंधघटकःतत्पदतत्पदघटित
वाक्याधीनवोधेविधेयकोटिनिविष्टतयाभासतेयद्धूमत्वादिकंतदन्यतत्समानाधिकरणंयत्तदन्यत्वेनविशेषणीयत्वात्वह्निविशिष्टद्रव्यत्वा
देःधूमत्वान्यतत्समानाधिकरणतयातदन्यत्वाभावेनवारणात्नचयोयोऽभिधेयवद्वान्प्रमेयवद्वानित्यादौतत्पदघटितवाक्यजन्यवोधे

ग॰टी॰ विधेयकोटिनिविष्टतयाभासमानंमेयत्वावच्छिन्नंतदन्यत्वमप्रसिद्धमितिवाच्यंसाध्यतावच्छेदकतापर्याप्त्यधिकरणांशेपादृशंतादृशापर्याप्तिस
५६ विषयतापर्याप्त्यधिकरणत्वरूपपारिभाषिकतदन्यत्वनिवेशात्।गृहेगृहेऽश्वाइत्यादौनिरूपकतासंबंधावच्छिन्नस्वनिष्ठभेदप्रतियोगिता
वच्छेदकतावच्छेदकत्वसंबंधावच्छिन्नस्वावच्छिन्नभेदवदश्वाधेयतात्वनिरूपितत्वोभयसंबंधेनप्रकृत्यर्थगृहादेःसप्तम्यर्थाधेयतायामन्व
यइतियावत्।गृहेऽश्वसत्त्वेप्रामाण्यं।अश्वाधेयतात्वेगृहनिष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकतायाअसत्त्वेननिरूपकत्वसंबंधेनगृहाभावस्या
बाधात्।एवंनञ्पदघटितवाक्यस्थलेकिंचिद्गृहेऽश्वः।सत्त्वेप्रामाण्यं।अश्वाधेयतात्वादौगृहादिनिष्ठतादृशभेदप्रतियोगितावच्छेदकतावच्छे
वृद् दकत्वसत्त्वेनतादृशसंबंधावच्छिन्नस्वावच्छिन्नभेदस्याश्वाधेयतात्वादिरूपसंबंधस्याव्यधिकरणतयातेनव्यधिकरणसंबंधेनगृहाद्यभावस्यत
दाधेयतायांसत्त्वात्।एवंग्रामंग्रामंददातीत्यादेरपिप्रामाण्यंप्रकृतग्रामेदानकर्मत्वसत्त्वेस्वनिष्ठभेदप्रतियोगितायाआश्रयतासंबंधाव
च्छिन्नावच्छेदकतावच्छेदकतायाःचैत्रापदानकर्मतात्वेबाधेनतादृशसंबंधावच्छिन्नस्वावच्छिन्नप्रतियोगिताकभेदवच्चैत्रीयदानकर्मतात्वाधे
यत्वोभयसंबंधेनकर्मतात्वसामानाधिकरण्येनग्रामादेःकर्मतायामबाधात्।यत्किंचिद्ग्रामादेश्चैत्रेणदत्तत्वेनञ्घटितवाक्यस्यचतादृशसंबं
धावच्छिन्नभेदवच्चैत्रीयदानकर्मतात्वरूपव्यधिकरणसंबंधघटितोभयसंबंधावच्छिन्नतदभावस्यकर्मतात्वावच्छेदेनाबाधात्।ग्रामोग्रामो गम॰
रमणीयइत्यादौचप्रत्यक्षविशेष्यतयाभासमानस्यापिग्रामादेःरमणीमादौस्वनिष्ठभेदप्रतियोगितावच्छेदकत्वसंबंधावच्छिन्नस्वावच्छि ५६

न्नप्रतियोगिताकभेदवद्रमणीयत्ववत्त्वाभेदोभयसंबंधेन विशेषणतया ऽन्वयः । धूमवत्त्वस्य धर्मो वह्निव्याप्य इत्यादौ मुख्यविशेष्यत
यामाश्रमान धूमादेर्हेत्वन्तर्व्याप्त्यादिपदार्थघटकाधिकरणांशे यथान्वय उपेयते तु सति वैचित्र्यात्तद्वत् तथा च कस्यचिद्ग्रामस्याश्रमणीय
त्वेनत्र समभिव्याहृते निरूढभेदवद्रमणीयत्ववत्त्वसंबंधस्य व्यधिकरणतया तद्वदितोभयसंबंधेन ग्रामाद्यभावस्य रमणीयादौ सत्त्वेन
प्रामाण्यं । न च ग्रामो ग्रामो रमणीय इत्यादौ ग्रामादिव्यापकताविशिष्टाभेदसंबंधेन ग्रामादौ रमणीयादेर्नञ्स्थले च तत्संबंधावच्छिन्नतदभावा
देरन्वये नोपपत्तेः किंतु तद्देतिवाच्यं ग्रामादिनिष्ठभेदप्रतियोगितारूपव्यापकताप्रसिद्धेस्तन्निष्ठभेदप्रतियोगितानवच्छेदकरमणीयत्व
रूपतद्व्यापकताविशेषितभेदसंबंधत्वेन नञ्स्थले तादृशसंबंधाप्रसिद्धेः । यो यो धूमवान् स स नायोगोलकमित्युदाहरणाधीनबोधे मनुवर्थसं
बंधविशेषणतया अयोगोलकभेदाभानेपि अयोगोलकभेदत्वरूपसाध्यतावच्छेदकापर्याप्तविषयतापर्याप्त्यधिकरणांशपदयोलकभेदवृत्ति
तदन्योयः स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकतावच्छेदकत्वसंबंधावच्छिन्नस्यावच्छिन्नप्रतियोगिताकभेदवत्त्वरूपस्वव्यापकता
वच्छेदकत्वसंबंधेन वन्ह्यादिविशिष्टो धर्मस्तदवच्छिन्नप्रतियोगिताकत्वविशिष्टस्वरूपसंबंधेन तत्पदार्थायोगोलकभेदादेर्भानोपगमान्नद्व्यत्र यो
स्याप्रामाण्यं । अयोगोलकभेदत्वादेर्वन्ह्यादिव्यापकतानवच्छेदकत्वात् तथाविधवृत्तभेदत्वादिप्रतियोगिकत्वविशिष्टस्वरूपसंबंधेनायोगोल
कभेदादेर्भानात् एवं च यो यो वह्निमान् स स नायोगोलकमिति नञ्घटितवाक्यस्याप्रामाण्यं निरूढहृदभेदत्वघटितव्यधिकरणसंबंधेनायोगोल

ग॰टी॰
५७
57

कभेदाद्यभावस्य तत्पदार्थेऽसत्त्वात् तावन्मात्रादिव्यापकभेदत्वावच्छिन्नायोगोलकभेदादिप्रतियोगिकस्वरूपसंबंधेनायोगोलकभेदस्य तत्पदार्थे
सत्त्वेनोक्तशंकानवकाशस्य प्रामाण्यवारणाय निरूक्तसंबंधघटकभेदे वह्निमन्निरूक्तान्यत्वांतं निवेशः। यत्तु शङ्काधूमपदार्थधूमे लक्षणया तत्पदार्थ
स्य वह्निसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वस्वरूपव्यापकत्वस्य स्वरूपसंबंधेन धूमत्वावच्छेदेनान्वय उपेयते नामद्वपार्थस्यैव भेदेना
न्वयस्याव्युत्पन्नत्वात् तथा एकत्र नामार्थयोर्भेदेनान्वयेऽक्षमभावात्। नादृशव्यापकत्वस्य धूमत्वावच्छेदेन वाधाच्चाप्रामाण्यं न न्यूनत्वे तु प्रामाण्यमि
ति तत्रापी यो धूमवान् स नायोगोलकं यो यो धूमवान् स न ह्रद इत्यादावगतेः। प्रयोगद्वितीयविरोधस्य प्रामाणिकार्थेऽनुपगमे विद्दरोऽस्तीतिवाका
ह्वरः पटोऽस्तीतिबोधस्य गुणतोऽस्तीतिवाक्याद् गुणो घटोऽस्तीतिबोधस्य चानुसादस्य सर्वैरनुभवसिद्धतया एकपदवृत्तिद्वयोपस्थाप्ययोः परस्प
रमन्वयानुपगमाच्च। न च तत्र परत्वविशिष्टघटे लक्षणैवोपेयतामितिवाच्यं। अप्रसिद्धार्थलक्षणाया अप्यसत्त्वात्। एकपदाद्वृत्तिद्वयोपस्था
प्यार्थयोः परस्परमन्वयबोधस्य व्युत्पत्तिसिद्धत्वे एकपदस्यान्वयबोधाजनकत्वव्युत्पत्तेर्निर्बीजतापत्तेश्चेति। प्रामाणिकत्वे इति। एतच्च तत्स्य
दे अव्यावृत्तिरेवं धूपकीतिशंकावारणाय मानसस्यैवेति। परामर्शत्वं न जातिरित्यग्रे ग्रंथ एव स्फुटं। अनुमितौ पक्षविशेषणकपरामर्शजन्यसाध्य
विशेष्यकानुमितौ। पक्षइतीति। पक्षसंबंधप्रत्यक्षेतत्संबंधावच्छेदकभागावच्छेदेनेन्द्रियसंयोगस्य हेतुत्वादितिभावः। कथंचिदिति। व्यापकताज्ञा राम॰ ५७
नेसहचारज्ञानं न कारणं पूर्वं दूषितत्वात्। योग्यत्वेत्यादिनियमस्याप्रामाणिकः। एवं च धूमत्वेऽनुमितस्य वह्नित्वेन मानसोपनीतभानमितिभावः।

ग०टी०
५८
58

ननु कंबुग्रीवादिमज्जातीयादेः प्रमात्वानुरोधेन कंबुग्रीवादिमत्समानाधिकरणाभावप्रतियोगितानवच्छेदकनिर्विशेषणकघटत्वावच्छिन्ना
भावावगाहित्वानुपपत्तिः। अन्यथा तादृशघटत्वस्य निर्विशेषितघटत्वापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकतया प्रमात्वापत्तेरि
ष्टत्वात् आह भावेति। द्वितीयार्थस्तु एकतरत्वे क्रियाजन्यसंयोगस्थलानुरोधेन कार्यनिरूपितयत्किंचिदधिकरणतागर्भमेव कारणत्वं एवं च गंगास्ना
नादिजन्यस्वर्गव्यावृत्तवैजात्यस्य कार्यतावच्छेदकत्वेपि तदपरिचयेपि च स्वर्गत्वरूपसामान्यधर्मावच्छिन्ननिरूपिताधिकरणतानाविशेषगर्भजनक
ताया एवेष्टसाधनतारूपतया तद्बोधसौलभ्यमिति॥ ॥ ९ ॥ अथ लिंगकारणताग्रंथः॥ ॥श्रीगुरुगोविंद ॐ सूर्य्यगणेसमहालक्ष्मी शि
वविष्णु ॥४

राम

पत्रे ५८

श्लोक

३५२६